॥६०॥ श्रीजिनाय नमः श्रीगणेशाय नमः ॥ ध्वस्तैरपि यन्नमोभिरखिलैर्नैस्स्वरूपं निजं चञ्चत्कालकलाभिरप्य
नुकलेयत्नीयते न स्वयं तेजोभिः स्फुरितैः परैरपिहताऽऽक्रम्यते यन्न तत्तेन सर्वजगत्प्रकाशनपटु ज्योतिष्परं नंदतु
१ योध्यानेन निमूलकाषमकषत् द्वेषादिविद्वेषिणो यस्त्रैलोक्यविलोकनैकरसिकं ज्योतिः किमप्याप्तवान् यः
सद्भूतमशेषमर्थमवदत् दुर्वादिविद्रावकः देवार्च्यः शिवनाभिरस्तु स विभुः श्रीवर्द्धमानस्सतां २ स्वगुरूणां
मादेज्ञां चिंतामणिसोदरं समासाद्य श्रेयस्कृते करोमि प्रवचनसारस्य वृत्तिमिमां ३ इह हि शिष्टाः क्वचिदभीष्ट
शास्त्रप्रकरणादिवस्तुनि प्रवर्त्तमानाः श्रेयस्कामया विशिष्टाभीष्टदेवतानमस्कारपुरस्कारेणैव प्रवर्त्तंते स च
यद्यपि कायमनोभ्यामपि क्रियमाणो निखिलविलसद्विघ्नविनाशकत्वेन प्रारिप्सितशास्त्रप्रकरणादिपरिस
माप्तये संपद्यते तथापि शास्त्रादौ श्रोतॄणां सर्वेपि शास्त्रादिश्रवणोत्सुकांतःकरणाः सकलविघ्नसंघात
विघातनिमित्तमवश्यमभिमतदेवतास्तवाभिधानपूर्वमेव प्रवर्त्तंतामिति श्रोतॄणामभीष्टदेवतास्तवविष एम
यमनीषोन्मेषपरिग्रहार्थमादावभीष्टदेवतास्तवोऽभिधेयस्तथा यत्किमपि शास्त्रं प्रकरणादि वा कर्तुमिष्यते १
तत्रावश्यमादौ प्रेक्षावतां प्रवृत्त्यर्थमभिधेयमभिधातव्यमितरथा किमत्र शास्त्रे प्रकरणादौ वाभिधेयमि

ति शंसयानाः न तत्र ते प्रवर्त्तेरन् वदेयुश्च यथा नारब्धव्यमिदं शास्त्रं प्रकरणादि वाभिधेयशून्यत्वात् काकदंतप
रीक्षावदिति यदाहुः श्रुत्वाभिधेयं शास्त्रादौ पुरुषार्थोपकारकं श्रवणादौ प्रवर्त्तंते जिज्ञासादिनोदिताः नाश्रु
त्वा विपरीतं वा श्रुत्वालोचितकारिणः काकदंतपरीक्षादौ प्रवर्त्तंते कदाचनेत्यादि तथाभिहितेप्यभिधेये न प्रयो
यहृद जनश्रवणमंतरेण सहृदयास्तदाद्रियंते प्रेक्षावत्तास्तत्प्रसंगात् यदाहुः प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्त्त
ते एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत् अभिदध्युश्च ते यथा नारंभणीयमिदं शास्त्रं प्रयोजन[illegible]
[illegible]शून्यत्वात् कंटकशाखामर्दनवदिति ततः शास्त्रप्रकरणादिप्रारंभप्रयासनिःफलताशं
काशंकुसमुद्धरणाय शास्त्रप्रकरणादौ प्रयोजनमपि वक्तव्यं तथा प्रयोजने दर्शितेपि न परंपरया सर्वज्ञमूल
तावगतिमंतरेण शिष्टा नातींद्रियार्थसार्थप्रतिपादके शास्त्रादौ सुधियः प्रवृत्तिमातन्वीरन् प्रतिपादयेयुश्च
ते यथा नारंभणीयमिदं शास्त्रादि स्वबुद्धिकल्पितत्वात् स्वेच्छाविरचितशास्त्रवदिति ततस्तेषां शास्त्रप्रकरणा
दिप्रवृत्तौ विशिष्टादरनिमित्तं परंपरया अर्हन्मूलतासंस्थापनार्थमादौ गुरुपर्वक्रमलक्षणः संबंधोपि वक्तव्य
इत्यादि परिभाव्य प्रेक्षावतां प्रवृत्त्यर्थं पूर्वप्रयुक्तप्रयोगाणां चासिद्धतादिदोषोद्भावनार्थमिमादिगाथामा

प्रवचनवृत्ति
२

१ नमिऊण तोसारि अत्र वचनरचनसमानन्तत्वज्ञयः सौगताः संगिरंते नन्विदं भवतां गेहे नर्दितमिव प्रतिभासते यतः सर्वमे ×मानं
वेदं भवद्भिः कथ्यमानं शोभनं परि शास्त्रार्थयोः कश्चित्संबंधो भवेत्तत्रासौ विचार्यमाणो धारिमाणामंवनिदुलिषोरिति वट×
वंधस्तादात्म्यलक्षणस्तदुत्पत्तिलक्षणो वा तत्र न तावच्छास्त्रार्थयोस्तादात्म्यलक्षणः संबंधः सत्त्विधिणार्थे स एव शास्त्रे
यएव शास्त्रं स एवार्थ इत्येवं भवेदेवं च मोदकादिशब्दोच्चारणे मोदकादिनामुखपूरणं भवेत् क्षुरिकादिशब्दोच्चारणे
च वदनपाटनादिकं संपद्येत ततस्तादात्म्यः शास्त्रार्थयोर्न च घटामटाघते न तदुत्पत्तिलक्षणोपि संबंधः स्योत्स
मते तथाहि किं शास्त्रादर्थ उत्पद्यते अर्थाद्वा शास्त्रमिति तत्र न तावच्छास्त्रादर्थ उत्पद्यते घटादयो हि मृदादिभ्य एवो
त्पद्यमाना दृश्यंते न शास्त्रादिति यदि तु शास्त्रादपि घटादयो भावाः भवेयुः तदा नमृदादिपरिशीलने क्लेशमनुभवे
युः कुंभकारादयः नाप्यर्थाच्छास्त्रमुत्पद्यते ताल्वोष्ठपुटदंतादिभ्यः पुरुषप्रयत्नसहितेभ्य एवोत्पत्तिदर्शनात्
ततः शास्त्रार्थयोस्तादात्म्यतदुत्पत्तिलक्षणसंबंधद्वयाभावेनाभिधेयमभिधेयादिसूचकं निरर्थकमेवेति तत्र २
वक्तृमोः नाभ्युपगतो यावन्मेनकेवरेणोपक्रे शमनुभवद्भिर्भवद्भिरेव मा भ्यां निरर्थकमेवकर्तव्यं तो नरात्वयस्मा
भिः शास्त्रार्थयोस्तादात्म्यतदुत्पत्तिलक्षणः संबंधः इष्यते किंतु सर्वत्र हृदये समस्तो वाच्यवाचकभावलक्षण एव

तत्र न किंचिद्विरुध्यते यदि च शब्दस्य प्रामाण्यं नाभ्युपगम्यते तदा त्वागमप्रामाण्यमूलानामखिलव्यवहाराणामु
च्छेदः स्यात् उक्तं हि लौकिकव्यवहारोपि न यस्मिन्नवतिष्ठते तत्साक्षात्वविज्ञाने व्यामोहोपनिबंधनमिति अ
त्र च वक्तुर्वक्तव्यं न तु नोच्यते ग्रंथगौरवभयादिति वः तत्र नमिऊण नत्वा युगादिजिनं युगमेतदवसर्पिणी रूपः
पः कालविशेषस्तत्रादौ भवतीत्यादिः प्रथमः सर्वांसौ जिनश्च रागद्वेषादिदुर्जयारातिजेतानं वृषभदेवस्वा
मिनमित्यर्थः भवति हि सौढविशेषणादनुक्तेपि विशेष्यप्रतिपत्तिर्यथा ध्यानैकतानमनसो विगतप्रचाराः पश्यं शेद्बोधि×
ति यं कमपि निर्मलमद्वितीयमित्यत्र ध्यानैकतानमनसो विगतप्रचाराइति सौढविशेषणसामर्थ्याद्योगिन
इति विज्ञेयस्यानुक्तस्यापि प्रतिपत्तिस्तथात्रापि नाभेयदेवस्येति बोद्धव्यं सर्वभावानां निर्मलं निजगुणनिकर
माहात्म्यं तत्सिद्धिगमनयोग्यानां प्राणिनां ज्ञानं निमित्तं प्रवचनस्य द्वादशांगस्यादिशासनस्य सारोद्धारं प्रधानक
तिपयपदार्थोद्धारं गुरुपदेशाद् उद्धृत्य नात्मनासेनसंक्षेपेण। तिणपायसार्थस्त्वेन मिऊण युगाइजिणमित्य
नेन युगादिदेवस्य नमस्कारकरणेन विघ्नविनाशार्थ स्याद्दोषकलकल्याणमूलं भावमंगलं वस्से प्रवचनसा
रोद्धारमित्यनेनाभिधेयं भव्यानां ज्ञानं निमित्तमित्यनेन प्रयोजनं च प्रस्तावितं तच्च द्विधा प्रकरणकर्तुः श्रोतुश्च एके

कमपि द्विविधमनंतरं परंपरं च तत्र प्रकरणकर्तुरनंतरप्रयोजनं प्रवचनसारभूतकतिपयपदार्थप्रतिपादयतः स-
त्त्वानुग्रहः परंपरं तु परमपदावाप्तिः भव्यसत्त्वानुग्रहप्रवृत्तो हि निखिलसुखनिकरप्राज्यसाम्राज्यमनिसर्गरमणीयरम-
णीवर्गविभ्रमोल्लसितसंसर्गं प्राज्यसाम्राज्यादि परंपरया परमपदमवश्यमवाप्नोत्येव यत उक्तं सर्वज्ञोक्तोपदेशेन यः सत्त्वाना-
मनुग्रहं करोति दुःखतप्तानां स प्राप्नोत्यचिरेण शिवं श्रोतृणां पुनरनंतरप्रयोजनं यथावत्प्रवचनसारभूतकतिपय-
पदार्थपरिज्ञानं परंपरप्रयोजनं तु तेषामपि परमपदप्राप्तिरेव तथा हि ते यथावद्विज्ञातप्रवचनसारभूतकतिप-
यपदार्थाः प्रक्रमसमासादितसंसाराद्विरज्यंते ततः परमपदावाप्तये निःसपत्नं प्रपन्नमाचरंति ततो निखिलश्रेयस्कारणं ज्यं
निःश्रेयसमासादयंति यत उक्तं सम्यग्भावपरिज्ञानाद्विरक्ता भवतो जनाः क्रियासक्ता ह्यविघ्नेन गच्छंति परमां ग-
तिं संबंधस्तु द्वेधा उपायोपेयलक्षणो गुरुपर्वक्रमलक्षणश्च तत्र प्रथमस्तर्कानुसारिणः प्रतिप्रत्यायं वचनरूपा-
पन्नं शास्त्रमिदमुपाय उपेयं सम्यगेतच्छास्त्रार्थपरिज्ञानं मुक्तिपदं वा तस्याप्यतः पारंपर्येण प्राप्तेः श्रद्धानुसारिण- २
स्तु प्रति गुरुपर्वक्रमलक्षणः संबंधस्तत्क्रमश्चायं प्रथमं हि घनाघनपटलरयातिप्रसारिणि पद्युतजंममाण ख-
रकिरणकरनिकर [illegible] प्रकाशसंकाश [illegible] कमनीयकेवलालोकप्रकाशिनि घनघातिकर्मनिचये प्रचंडप्रभं-

जनप्रसारेण वा शुक्लध्यानेन प्रलयमापादिते निःशेषमपायबहुले जीवाजीवादिपदार्थावभासिनि समुत्पन्ने
निःसपत्ने केवलज्ञानालोके नाकिनगरगुरुतरविभूतिसमृद्धिसंभारतिरस्कारकारिणां पापायां नगर्यां सकललो-
कलोचनानंदामंदोत्सवकारिणि निरुपमप्राकारत्रयोल्लासितसमवसरणमध्यभागप्रवस्थापितविचित्ररत्नखचितवि-
ताहिंहासनोपविष्टेन विशिष्टमहाप्रातिहार्यादिपरमार्हत्यसमृद्धिमहिम्ना भगवता श्रीमन्महावीरेण सुरासुरकिंनर-
नरेश्वरनिकरपरिकरितायां परिषदि प्रवचनसारभूताः सर्वेपि पदार्थाः प्रथमतो निवेदिताः ततस्तदनु प्रवचनाधिपतिना
सुधर्मस्वामिना तदनु सूत्रतो रचिताः अ[illegible]भासुर श्रीहारस्तुतिंगं पेति [illegible] गणाधिपत्यनिक्षेपणमिस्मार्थवचनात् ततस्तदनु जं-
बूस्वामिप्रभव [illegible] भवयशोभद्रसंभूतिविजयभद्रबाहुस्थूलभद्रमहागिरिसुहस्तिस्वामिश्यामार्यप्रभृतिभिः
सूरिभिः स्वकीयस्वकीयसत्त्वेषु विस्तृततमविस्तृततरविस्तरतेषु प्रतिबध्यमाना भव्यजनेभ्यश्च प्रकाश्यमाना एता-
वतीं भूमिकां यावदानीतास्ततस्तेभ्योपि सत्त्वेभ्य ऐदंयुगीनमंदमेधसामवबोधाय संक्षिप्यास्मिन्प्रकरणे प्रत्योप-
कारकं करणं धर्माय महीयसे भवतीति अधिगतपरमार्थानामविवादो वादिनामत्रेति परोपकाररसिकांतःक-
रणान्कालिकश्रुतधरणमिहितश्रुतमनुस्मरतामयामस्मद्विधेने इत्येवं पारंपर्यासर्वज्ञिनमूलमिदं प्रकरणमर्थमा-

श्रिमेन पुनर्मर्यादान्तर्वर्तिना किंचिदवशेषते रसवशात् तद्द्वारानामभ्यासानामिदमुपादेयं भवतीति इदानीं प्रवचनसारभूतापेक्षि
तस्मिन्नाः पदार्थास्तेषां षट्सप्तत्यधिकद्विशतीसंख्यानि द्वाराणि गाथाचतुःषष्ट्यानुगतबोधाय मुद्दिशन्नाह चिइवं
दणाइ तत्र सकलकुशलमूलत्वात् प्रथमं चैत्यवंदनाद्वारं चित्तस्य भावाः कर्माणि वा वर्णदृढादिभ्यः ष्य इति
ष्यञि चैत्यानि जिनप्रतिमास्ता हि चंद्रकांतसूर्यकांतमरकतमुक्ताशैलादिदलनिर्मिता अपि चित्तस्य भावेन कर्म
णा वा सत्यात्तीर्थकरबुद्धिं जनयंतीति चैत्यान्यभिधीयंते तेषां वंदनं स्तवनं कायवाङ्मनःप्रणिधानं चैत्यवंदनं त
च्च विधिभणनेन वक्ष्यमाणमत्र च प्राकृतलक्षणात् प्रथमैकवचनस्य सेर्लुक् कृतं दशप्रमिति तदनु वंदनकद्वारं वंद्यंते
पूज्यगुरवो येनेति वंदनं तदेव वंदनकं स्वार्थे कः २ पडिक्कमणंति तदनु प्रतिक्रमणमिति द्वारं प्रतिशब्दोऽयमुपसर्ग
ः प्रतीपार्थे प्रातिकूल्ये वा वर्तते क्रमु पादविक्षेपे इत्यस्य भावे ल्युट् तस्य प्रतीपं प्रतिकूलं वा क्रमणं प्रतिक्रमणमि ५
ति ३ पच्चक्खाणमिति प्रत्याख्यानमिति द्वारं तत्र प्रतिशब्दः प्रवृत्तिप्रातिकूल्ये तथा आमर्यादया ख्या विवक्षितकालादिमान
यामाख्यानं प्रकथनं प्रत्याख्यानं मूलगुणोत्तरगुणविषयमिति ४ उस्सग्गोत्ति उत्सर्गस्तत्र घञि भावे सुकृते इत्यभावे निग
म्यते तथा चायं केचिदेवनसम्प्रदायागमात्कायोत्सर्ग इति इष्टव्यं तत्र चोत्सर्जनमुत्सर्गः कायस्योत्सर्गः उच्छ्वासाद्याकार

स्थानमौनध्यानक्रियाव्यतिरेकेणान्यक्रियांतराध्यासमधिकृत्य परित्याग इत्यर्थः ५ चउवीससमहियसयमिति चतुर्विंशत्यधिकं
शतं गर्हस्थप्रतिक्रमणातिचाराणां भणनीयमिति द्वारं ६ एवं प्रथमगाथायां षड्द्वाराणीति भरहेमीसाइ भारतेक्षे
त्रे भूतानां प्रतिभविष्यत्तीर्थकराणां नामानि ७ एरवतेऽपि क्षेत्रे तानि नामानि जिनानां प्रतिभविष्यंतां तानीमानि कभा
विना न पुनरतीतानागामिसर्पिणीतनानीति क्रियाध्याहार इति द्वितीयगाथायां सप्तमं द्वारं उसभाइसाइ ऋषभा
दिजिनेंद्राणां चतुर्विंशतिसंख्यानामपि आइमत्ति आदौ भवा आदिमाः प्रथमा इत्यर्थः तावदिमइत्ति सूत्रेण इमप्रत्यये
ऽस्मिन्नपि च आदिम इति रूपं ततः आदिमाश्च ते गणधराश्च आदिमगणधरास्तेषां नामानि ८ ग्रंतः स्थितस्य नाम शब्दस्येहा
पि संबंधात् स्थानानि तथा आदिमप्रवर्तिनीनां नामानि वक्तव्यानि तथाऽर्हतां जिनेन्द्राणां तीर्थकरपदोपार्जने यानि स्थाना
नि कारणानि तानि वक्तव्यानि ठाणाइ इति प्राकृतशैल्या पुंस्त्वानि दृश्यन्ते ११ जिनानां जननीनामानि जनकाश्च पितरस्ते
षां नामानि वक्तव्यानि तथा तेषामेव गुणानां(?) शेषाणां कस्यां गतौ गमनमिति गतिर्वक्तव्येति तृतीयगाथायां मष्ट
मादीनि द्वादशांतानि पंचद्वाराणि भणितानि उक्किठ इत्यादि उत्कृष्टं जघन्याभ्यां पदाभ्यां मितिं गम्य विहरन्तीर्थनाथा
नां संख्या भणनीया कियंत उत्कृष्टतो विहरमाणास्तीर्थनाथा एककालं लभ्यंते जघन्यतश्च कियंतः तथा जन्मसमए

त्रिजन्मसमयेपि संख्या उत्कृष्टजघन्यकाल उत्कृष्टजघन्यभवा तेषां तीर्थे नाथानां भगवतां यैककालमुत्कृष्टतः कि
यंतः कर्म्मभूमिषु ते जायंते कियंतश्च जघन्यत इति चतुर्थगाथायां त्रयोदशचतुर्दशसप्तदशद्वारत्रयमभिहितं जिणग
णहरेत्यादि अत्र जिनशब्दः प्राकृतशैल्या षष्ठी बहुवचनांतो मंतव्यः ततो जिनानां सर्वेषां ये गणधराश्च मुनयश्च श्रमण्यश्च
वैक्रियकाश्च वादिनश्च अवधिपश्च केवलिनश्चेति इदं सप्तदशं द्वारं गणधरमुनिश्रमणीवैक्रियवाद्यवधिकेवलि
नश्चेति तत्र गाथापर्यंतवर्त्तिसंख्या उ इति शब्दः संबध्यते जिनानां ऋषभादीनां प्रत्येकं ये गणधरास्तेषां संख्या भणनी
या तथा तेषामेव ये मुनयः साधवस्तेषां संख्या तथा तेषामेव याः श्रमण्यो व्रतिन्यस्तासां संख्या तथा विकुर्व्विक्रियाया
मिति धातुर्विकुर्वणमिति हलश्चेति घञि विकुर्वस्तेन चरंतीति तेन चरतीति ठक् इकादेशो वैक्रियकास्ते
षां संख्या तथा वादिनां देवासुरैरप्यजेयानां संख्या अवधिः अवधिमर्यादा तदभेदादवधीनामवधिज्ञानवतां संख्या तथा के ५
वलिनां संख्या तथा मनःपर्यवज्ञानिनां संख्या तथा चतुर्दशपूर्विणां चतुर्दशपूर्वधराणां संख्या श्राद्धा
नां श्रावकाणां संख्या तथा श्राविकाणां श्राविकाणां संख्या वक्तव्येति पंचमगाथायां पंचदशादीनि पंचविंशतितमां
तान्येकादश द्वाराण्यभिहितानि जिणजक्खेत्यादि जिनानां यक्षास्तथा देव्यः शासनदेवतास्तथा तनुमानं शरीरप्रमाणं

छ
तथा लांछनानि चिह्नानि तथा वर्णा रक्तादयस्तथा व्रतस्य परिवारः कः कियता परिवारेण सह व्रतमगृहीदिति तथा स
र्वायुष्कं च समुच्चयेन तथा शिवगमनपरिवारो मोक्षगमनसमये कः कियता परिवारेण गत इति वाच्यमेवं षष्ठगा
थायां षड्विंशतितमादीनि त्रयस्त्रिंशत्तमांतानि अष्टौ द्वाराण्यभिहितानि निव्वाणगमणेत्यादि जिनानां निर्वाण
गमने पश्चादनंतरमभिधेयं तथा जिनांतराणि एकस्माज्जिनादपरो जिनः कियता कालेनावधानेन सिद्धस्तेषु संरू
पाणि च समुच्चयेन तथा तीर्थस्य व्युच्छेदश्च चतुर्वर्णश्रमणसंघस्य व्यवच्छेदः कदा कुत्र कस्य जात इति भणनीयं तथा
दशचतुरशीतिर्या ज्ञानदर्शनादीनामाशातनाश्च तावर्जनीया आशातनास्तथा प्रातिहार्याणि प्रतिहारकर्म्माणि तानी
र्थकृतामभिधेयानि इति सप्तमगाथायां चतुस्त्रिंशत्तमादीनि एकोनचत्वारिंशत्तमांतानि षड् द्वाराणि दर्शितानि
ह
चउतीसेत्यादि चतुस्त्रिंशदतिशयानामर्हतामाख्या तथा दोषा अष्टादश अर्हत्प्रतिपंथिनो भणनीयास्तथा अर्हच्चतु
ष्कं नामार्हदादिभेदेनाभिधेयं तथा निःक्रमणोदीक्षायां ज्ञाने केवलज्ञानोत्पत्तौ तथा निर्वाणे च जिनानां तेषां
सिवासानि इत्यष्टमगाथायां चत्वारिंशत्तमादीनि पंचचत्वारिंशत्तमांतानि षड् द्वाराण्युक्तानि भाविजिणेत्या
दि भाविनामप्यनंतरोत्सर्पिण्यां भविष्यतां जिनेश्वराणां जीवा वक्तव्यास्तथा उत्कृष्टो धरित्र्यां लोके सिद्धानां संख्या

भिधयाएकस्मिन् समये कियंतः सिध्यंतीत्यर्थः तथानेसिद्धाः पंचदशभिर्भेदैः प्रतिपादिता इति नवमगाथायां पंचच-
त्वारिंशादीन्येकोनपंचाशत्तमांतानि चत्वारि द्वाराणि उक्तानि अवगाहणाइत्यादि अवगाहंते जीवा यस्यामिसो
गणादिकेन प्रसयेः वगाहनातनुस्तस्यामुत्कृष्टायामेकसमयेन कियंतः सिद्ध्यंति जघन्यायां तस्यां कियंतो मध्यमा
यां कियंतः इत्यभिधेयं च समुच्चये तथा गृहिलिंगे गृहस्थलिंगे जटाधरादि अन्यतीर्थिकलिंगे स्वलिंगे च रजोहरणा
दिलिंगे एकसमयेन सिद्ध्यतां संख्या भणनीया इति दशमगाथायां पंचाशत्तमेकपंचाशत्तमे द्वारे अभिहिते बत्तीसा
इत्यादि द्वात्रिंशत् इत्यत्र आदिशब्दात् अष्टचत्वारिंशत् षष्टिः द्विसप्ततिः चतुरशीतिः षण्णवतिः द्व्युत्तरशताष्टोत्तरशतानि
गृह्यंते ततश्चैकस्मादारभ्य द्वात्रिंशदंताः सिध्यंति निरंतरं यावदष्टाभिरधिकं ततोष्टभिः समयैरेकैकोतेपीव
देकसमयांतरमप्यवश्यमेकस्मिन्समये एको द्वौ वा यावद्द्वात्रिंशत्सिध्यंति एवं द्वितीयादिष्वपि समयेष्वष्टसं
तेषु नैरंतर्यमंतरं तथा पूर्ववदष्टचत्वारिंशदादय एकादयो वा सप्तसमयान्यावन्निरंतरं सिध्यंति ततोवश्यमंतर ६
मित्यादिस्वरूपं भणनीयमित्येकादशगाथायां द्विपंचाशमेकं द्वारं थीवेएइत्यादि स्त्रीवेदे पुंवेदे नपुंसकवेदे च सि ए४
द्ध्यतां संख्या वाच्या तथा सिद्धानां संस्थानं तथावस्थितिः स्थानं च सिद्धानां यमिति द्वादशगाथायां त्रिपंचाशच्चतुः

पंचाशत्पंचपंचाशद्रूपाणि त्रीणि द्वाराणि ॥ अवगाहणेत्यादि अवगाहनातनुः अत्र समुच्चये तेषां सिद्धानामुत्कृष्टा
यां मध्यमायां तथा जघन्यायां वाच्या तथा स्थानानामभिधानानि चतसृणामपि दिशां प्राक्प्रभृतीनां सिद्धानां प्रति
६ मानामिति त्रयोदशगाथायां चतुःपंचाशदादीनि एकोनषष्ठ्यंतानि चत्वारि द्वाराणि ॥ उपगरणेत्यादि उपकरणं स्था
जिनानां जिनकल्पिकानां तथा स्थविराणां गच्छवासिप्रव्रजितानां तथा साध्वीनां चार्याणां तथा च समुच्चये तथा जिनक
ल्पिकानां संख्या उत्कृष्टा एकस्यां वसतौ वा इति चतुर्दशगाथायां षष्टितमादीनि त्रिषष्ठ्यंतानि चत्वारि द्वाराणि
यं विद्याचारणानां च गमनशक्तिरभिधेयेति पंचदशगाथायां चतुःषष्ट्यादीनि अष्टषष्ठ्यंतानि पंच द्वाराणि परि
हारेत्यादि परिहारविशुद्धिकानां परिहारविशुद्धितपसो वा स्वरूपं भणनीयं तथा अहालंदेत्ति यथालंदकल्पिका
णां वा स्वरूपं तथा प्रतिपन्नानशनस्य साधोर्ये नियामका आराधनाकारकास्तेषामष्टचत्वारिंशद्दूरणीयाः तथा प
चविंशतिभावनाः शुभाः तथा अशुभाः पंचविंशतिर्वा इति षोडशगाथायामेकोनसप्ततितमादीनि त्रिसप्तत्यं
तानि पंच द्वाराणि ॥ संखेत्यादि संख्या महाव्रतानां प्राणातिपातविरमणादीनां तथा कृतकर्मणां वंदनकादीनां
दिनमध्ये संख्या च समुच्चये तथा क्षेत्रे भारतादौ चारित्राणां सामायिकादीनां संख्या तथा स्थितकल्पस्तथा स्थितक-

४ छत्तीसमित्यादि षट्त्रिंशत्सूरीणां ... माचार्याणां गुणा वक्तव्याः तथा विनयोपि द्विपंचाशद्भेदः प्रतिज्ञातो वाच्यः तथा चारित्रं सप्ततिभेदं वाच्यं
तथा अंगाचारणानां

लोकालोकस्वरूपे इति सप्तदशगाथायां चतुःसप्तत्यादीनि त्र्यधिकसप्ततिस्थानानि पंचदशशतपर्यन्तानि ॥ चेइएत्यादि चैत्या
नि प्रतिमास्थानानि तथा पुस्तकानि तथा दंडकास्तथा नस्थानानि तथा चर्म्माणि तथा दृष्याणि वस्त्राणि एतानि पंचपंच
प्रत्येकं वक्तव्यानि तथा पंचाश्रवसंवरभेदास्तथा परिसर्वतः सहं तेमोस्ताचिंभितिपरीषहास्तथा मंडलः समवाया
इति अष्टादशगाथायां एकोनाशीत्यादीनि समाशीत्यंतानि नवस्थानानि भणितानि ॥ दशगुणेत्यादि दशानां स्था
नानां अवच्छेदः तथा स्थप श्रेणिस्तथा पराश्रेणिस्तथा स्कंदिलानां सा धूयोग्यम् विशेषास्तथा दस्तोथिकं च
तुःसहितत्रिंशत्सा चतुस्त्रिंशत्सधिकः सहस्त्ररत्नत्पर्यः इत्येकोनविंशतितमगाथायां अष्टाशीत्यादीनि एकनवतं ता
नि चत्वारि स्थानानि ॥ पुव्वाणमित्यादि पूर्वाणां नामानि पदसंख्यायुतानि पुक्तानि चतुर्दश पिकल्पनीयानि
तथा निर्ग्रंथाः साधवः तथा श्रमण्याभिक्षुकाः प्रत्येकं पंचपंचेव वक्तव्याः इति विंशतितमगाथायां द्विनवति
त्रिनवति चतुर्नवति स्थानानि त्रीणि ॥ गामेसएत्यादि ग्रामेषवणानां पंचकं तथा पिंडेपानेच एषणाः सप्त तथाभि
क्षाव ग्रासिषये वीथीनामाश्रेणाममेककं तथा ग्रासप्रश्निता नि इति एकविंशतितमगाथायां पंचनवत्यादीनि अ
ष्टनवत्यंतानि चत्वारि स्थानानि ॥ सामायारीत्यादि सामाचारी उघसामाम्नेतथा पदविभागे छेदग्रंथोक्तस्वरूपे तथा दश

विधा चक्रवालसामाचारी प्रतिदिनकरणीयसमाचारे वा आ तथा निर्ग्रंथत्वे साधुविशेषत्वमेकजीवस्य पंचवारान्नव
वा संसारावस्थाने इति द्वाविंशतितमगाथायां नवनवत्यादीनि द्व्यधिकशततमांतानि चत्वारि स्थानानि ॥ साहूइत्या
दि साधूनां विहारस्वरूपं तथा अप्रतिबद्धत्वं सविहारेविधान यस्तथा ज्ञानकल्पो ज्ञानकल्पश्च वक्तव्यो ज्ञानागीथा
तो मरणं ते ज्ञानाश्चागीतार्थापरिष्ठापनोच्चारकरणयोरिति त्रयोविंशतितमगाथायां त्र्यधिकशततमादीनि
षडुत्तरशततमांतानि स्थानानि चत्वारि ॥ अष्टादशेत्यादि अष्टादशपुरुषेषु तथा विंशतिस्त्रीषु तथा दशनपुंसके
षु प्रव्राजनानर्हास्तथा विकल्पा गच्छपार्श्वेति चतुर्विंशगाथायां सप्तोत्तरशततमांतानि स्थानानि चत्वारि ॥ जंमु
छेमित्यादि । यत्मूलं यस्य तत्तथा तत्मूलं यतीनां मुनीनां कल्पः कल्पनीयं वस्त्रं तथा शय्यातरस्य पिंडश्च कल्प्योकल्प्यो
चेति तथा पार्श्वस्थादिसंसक्तसम्यक्त्वमवश्यभावि तथा निर्ग्रंथ्या अपि यथा चतुर्गतिका भवंति चतस्रो नरकादयो
गतयो येषां ते चतुर्गतिका इति पंचविंशतितमगाथायामेकादशोत्तरशततमादीनि चतुर्दशशततमांतानि चत्वारि
स्थानानि ॥ खेत्तेत्यादि क्षेत्रे तथा मार्गे तथा काले तथा प्रमाणोपातीतं भणितं प्रमाणातीतं क्षेत्रातिक्रांतं कल्पंयदुद्ग
तीयं तथा शुक्लध्यानचतुष्कं तथा शुक्लध्यानचतुष्कं तथा द्वयोरध्यक्षिप्यास्थानानि इति षड्विंशतितमगाथायां पंचदशो

प्र·न·रू
८

त्तरशततमादीनि एकविंशत्युत्तरशततमांतानि सप्त द्वाराणि ॥ एगंमीत्यादि एकस्मिन्भवे बहुषु भवेषु वा आकर्षविरहाश्च
तस्मायविशेषाश्चतुर्विधेपि सामायिके श्रुतसामायिकसम्यक्त्वसामायिकदेशविरतिसर्वविरतिलक्षणे क्रियंतो भवं
ति तथा शीलस्यांगभूताः कारणभूतास्तेषां पदार्थास्तेषामष्टादशसहस्राणि वाच्यानि तथा नयानां नैगमादीनां सप्तकं वेति
सप्तविंशतितमगाथया पंचविंशत्युत्तरत्रयोविंशत्युत्तरचतुर्विंशत्युत्तरशततमानि त्रीणि द्वाराणि ॥ वंदेत्यादि वं
दनकस्य विधानं तथा अवग्रहागमा रमः पंच यथाजातं चोलपट्टकादि तथा निष्क्रमणागमो विधिस्तथा आ
लोचनादापकस्य गुरोरन्येषामन्वेषणमिति अष्टाविंशतितमगाथया पंचविंशत्युत्तरशततमादीनि एकोनवि
शत्युत्तरशततमांतानि पंच द्वाराणि ॥ गुरुपमुहेत्यादि ॥ गुरुप्रमुखाणां क्रियते हे श्रुद्धे श्रुद्धे स्ववस्तु अभिप्रायेण का
लं प्रति ज्ञा गारणामिति रोषतस्तथा उपधेर्धावनकालः प्रहालनप्रस्तावस्तथा भोजनस्य भागास्तथा वसतिशुद्धि
रिति एकोनत्रिंशद्गाथया त्रिंशदुत्तरशततमादीनि चतुस्त्रिंशदुत्तरशततमांतानि चत्वारि द्वाराणि ॥ संलेहणेत्या ८
दि संलेखनाशरीरशोषणा द्वादशवर्षाणि तथा तपसेणवलीवर्दनकर्मितनवसनेर्थ्रहणं तथो प्रसस्य प्राभुकस्या
पि जलस्य सचित्तता कालं उष्णं प्राभुकमपि जलं जातं कियता कालेन पुनः सचित्तं भवतीमर्थः इति त्रिंशत्तमगाथया पं

चतुस्त्रिंशदुत्तरपंचत्रिंशदुत्तरषट्त्रिंशदुत्तरशततमानि त्रीणि द्वाराणि ॥ तेरिच्छीत्यादि इह षष्ठ्या पंचम्यर्थत्वात्ति
र्यग्भ्यो तिर्यक्स्त्रीभ्यो मनुष्येभ्यो देवेभ्यो पत्नुणायो गुणा गुणकारो यासां तास्तथा यावता गुणकारेण
तिर्यकपुरुषादिभ्योधिकास्तिर्यक्स्त्र्यादयः स्युः सर्वं यावन्मात्रेणाधिका अमरीः स्त्रियो गुणकारादपि तदेतत् इति एए
कत्रिंशत्तमगाथया सप्तत्रिंशदुत्तरशततममेकं द्वारं ॥ अच्छेरेत्यादि ॥ आश्चर्याणां च दशकं तथा चतस्रो भाषास्तथा
वचनानां षोडशकं तथा भाषाणां पंचभेदास्तथा भेदाः प्रकारा वर्णाणां पंचैव वर्णा इति द्वात्रिंशत्तमगाथायामष्टात्रिं
शदुत्तरशततमादीनि द्विचत्वारिंशदुत्तरशततमांतानि पंच द्वाराणि ॥ लोकेत्यादि लोकस्वरूपं तथा संज्ञास्तिस्र
स्तथा नवतवे यावा तथा दशधा तत्पापं च दशधा तथा समयक्षेत्रलक्षणाभेदविशुद्धं च सम्यक्त्वमिति त्रयस्त्रिंशत्त
मगाथया त्रिचत्वारिंशदुत्तरशततमादीनि अष्टचत्वारिंशदुत्तरशततमांतानि षट् द्वाराणि ॥ एगविहेत्या
एकविधमग्रस्थितसम्यक्त्वं शाश्वतं धात्मसम्यक्त्वं प्राकृतत्रो त्रत्समामेकवचनमग्नजनमग्रेतत्परदेश्रुवबंधुमत्ता दृ
हूर्नं सध्यावित्रिविधं विविधं चतुर्द्धा पंचविधं दशविधं द्रव्यादिकाभ्यकाश्चिदुपरामभेदेवाम सम्यक्त्वं वाच्यमिति चतु
स्त्रिंशत्तमगाथया एकोनपंचाशदुत्तरशततममेकं द्वारं ॥ कुलेत्यादि ॥ कुलकोटीनां संख्या जीवानां संबंधिनी भ

प्र. न. रु. णीया तथा जीवानामेवसंबंधियोनिलक्षचतुरशीतिस्तथा त्रैकाल्यं द्रव्यषट्कमित्यादि द्रव्यस्य पोऽर्थस्तस्य विवरणं
९ तथा श्राद्धानां श्रावकानां प्रतिमा इति पंचत्रिंशत्तमगाथायां पंचाशदुत्तरशततमादीनि त्रिपंचाशदुत्तरशततमांता
नि चत्वारि द्वाराणि॥ धन्नाणमित्यादि धान्यानामजीवत्वं तथा क्षेत्रातीतानामचित्तत्वं तथा धान्यानां चतुर्विंशति
नामतः कृष्या तथा मरणे मरणस्य दशभेदं च समुच्चये इति षड्विंशत्तमगाथायां चतुःपंचाशदुत्तरशततमादीनि स
प्तपंचाशदुत्तरशततमांतानि चत्वारि द्वाराणि॥ पलिउवमेत्यादि॥ पल्योपमस्य तथा ततः सूक्ष्मतरस्य त ५४
रः सागरः एकदेशेन समुद्रायावगमात्सागरोपमं तस्य अवसर्पिण्यास्तथा उत्सर्पिण्याः स्वरूपं तथा द्रव्यक्षेत्र
कालभावैः पुद्गलपरावर्त्तो भण्यते इति सप्तत्रिंशत्तमगाथायां अष्टपंचाशदुत्तरशततमादीनि द्विषष्ट्युत्तरश
ततमांतानि पंच द्वाराणि॥ पन्नरसेत्यादि पंचदश कर्मभूमयो यत्र तीर्थंकरा उत्पद्यंते तथा अकर्मभूमयस्त्रिं ९
घ शत्[illegible]त्र धर्मादिकं न किंचिज्ज्ञायते तथाष्टौ मदस्थानानि तथा द्वे शते त्रिचत्वारिंशदधिके भेदाः प्राणातिपातस्येति अष्ट
त्रिंशत्तमगाथायां त्रिषष्ट्युत्तरशततमादीनि षट्षष्ट्युत्तरशततमांतानि चत्वारि द्वाराणि॥ परिणामाणमि
त्यादि परिणामानामध्यवसायविशेषाणां क्षेत्रेशतं तथा ब्रह्मस्वरूपमष्टादशभेदं तथा कामानां चतुर्विंश

तिस्तथा दशप्राणा [illegible] स्तथा दश च कल्पद्रुमा इति एकोनचत्वारिंशत्तमगाथायां सप्तषष्ट्युत्तरशततमा
दीनि एकसप्तत्युत्तरशततमांतानि पंच द्वाराणि॥ नरएत्यादि नारकास्तथा नारकाणामावासास्तथा वेदना नारका
णां एवं तथा तेषामेवायुस्तथा तेषामेव तनुमानं तथा तेषामेवोत्पत्तिनाशयोर्विरहस्तथा तेषामेव लेश्यास्तथा तेषा
मेवावधिस्तथा परमाधर्म्माः परमाधार्म्मिकाश्च समुच्चये इति चत्वारिंशत्तमगाथायां द्विसप्तत्युत्तरशततमादीनि
अशीत्युत्तरशततमांतानि नव द्वाराणि॥ नरएत्यादि॥ नारकादुद्वृत्तानां लब्धिः तीर्थंकरत्वादेः संभवस्तथा तेषु नारके
षु येषां जीवानामुपपातः उत्पादस्तथा संख्योत्पद्यमानानामेकस्मिन्समये नरकेषु तथा सैव नरकेभ्य उद्वृत्तमानानामे
कस्मिन्समये इत्येकचत्वारिंशत्तमगाथायामेकाशीत्युत्तरशततमादीनि चतुरशीत्युत्तरशततमांतानि चत्वारि द्वारा
णि॥ कायेत्यादि॥ कायस्थितिस्तथा भवस्थितिरेकेंद्रियाणां पृथिव्यप्तेजोवायुवनस्पतीनां विगलेंति एकदेशसमुदा
योपचाराद्विकलेंद्रियाणां द्वित्रिचतुरिंद्रियाः संज्ञिनामसंज्ञिनां च जीवानां तथा तेषामेव तनुप्रमाणं शरीरप्रमाणं
तथा इंद्रियस्वरूपमाकारविशेषलक्षणं विसउअत्ति इंद्रियाणां सह त्वविषयाश्च तेषामेवं वा आः अत्र च समाहारे
कत्वेपि प्राकृतत्वात् सा निर्देशः तथा लेश्याश्च एतेषामिति द्विचत्वारिंशत्तमगाथायां पंचाशीत्युत्तरशततमादीनि एको

१० नवसुत्तरशततमं तानि पंचदशानि ॥ एगिंदियमिस्साइ एतेषामेकेंद्रियविकलेंद्रियासंज्ञिजीवानां यच्च स्थानं ग
तिस्तथा येभ्यः स्थानेभ्य आगतिरेतेषां तथा एतेषामेव उत्पन्निमरणयोर्विरहोंतरमेकस्मिन्समये च तेषामुत्पत्तिश्च
य कियता कालेनाश्च उत्पद्यते म्रियते च तेषां संख्या तथा एतेषामेकसमयेनोत्पन्नानां म्रियमाणानां च संख्या
च समुच्चये इति चत्वारिंशदुत्तरशतगाथायां नवत्युत्तरशततमादीनि त्रिनवत्युत्तरशततमांतानि चत्वारि द्वाराणि ॥
भवणेत्यादि ॥ भवनपतिव्यंतरज्योतिष्कविमानवासिदेवानां स्थितिस्तथा भवनानि तथा देहप्रमाणं तथा ले
श्यास्तथा अवधिज्ञानं च समुच्चये ॥ इति चतुश्चत्वारिंशदुत्तरगाथायां चतुर्नवत्युत्तरशततमादीनि अष्टनवत्युत्त
रशततमांतानि पंच द्वाराणि ॥ उपपत्तीत्यादि एतेषां भवनपत्यादीनामुत्पद्यमानानां विरहस्तथा उद्वर्तमानानां
विरहस्तथा एषां एकसमयेन उत्पद्यमानानामुद्वर्तमानानां च संख्या एतेषामुद्वृत्तानां यस्मिन्स्थाने गतिस्तथा य
तः स्थानादागतिरेतेषामिति पंचचत्वारिंशदुत्तरगाथायां नवनवत्युत्तरशततमादीनि त्र्युत्तरद्विशततमांतानि पंच द्वा २
राणि ॥ सिद्धेत्यादि ॥ विरहोंतरं सिद्धिगतेस्तथा जीवानामाहारग्रहणोच्छ्वासौ तथा त्रीणि त्रीणि विषष्ट्यानि या
षड्विंशत्तथा अष्टौ समाना इति षट्चत्वारिंशद्गाथायां चतुरुत्तरद्विशततमादीनि सप्तोत्तरद्विशततमांतानि चत्वा

रि द्वाराणि ॥ भरहेत्यादि भरतक्षेत्रस्याधिपास्तथा हलधरबलदेवास्तथा हरयो वासुदेवास्तथा प्रतिवासुदेवास्तथा रत्ना
नि चतुर्दश तथा नवनिधयस्तथा जीवानां संख्या इति सप्तचत्वारिंशद्गाथायामष्टोत्तरद्विशततमादीनि चतुर्दशोत्तरद्वि
शततमांतानि सप्त द्वाराणि ॥ कम्माईत्यादि ॥ कर्माणि अष्टौ तथा तेषां कर्मणामुत्तरप्रकृतीनामष्टपंचाशदुत्तरं शतं
तथा कर्मणां बंधोदयोदीरणासत्तानां स्वरूपमिति अष्टचत्वारिंशद्गाथायां पंचदशोत्तरद्विशततमादीनि अष्टादशोत्तरद्वि
शततमानि चत्वारि द्वाराणि ॥ कम्मेत्यादि ॥ कर्मणां स्थितिः सा चाबाधा अबाधा अनुदयकालः सहास्या
बाधया सबाधा तथा हि चत्वारिंशत्स्वरूपप्रकृतयस्तथा द्व्यशीतिः पापप्रकृतयस्तथा भावषट्कं सप्रतिभेदं मिसे
कोन पंचाशत्तमगाथायां एकोनविंशत्युत्तरद्विशततमादीनि एकविंशत्युत्तरद्विशततमांतानि चत्वारि द्वाराणि ॥
जीवगुणेत्यादि जीवानां तथा गुणानां गुणस्थानानां तथा मार्गणास्थानानां प्रत्येकं चतुर्दशकं तथा उपयोगा
द्वादश तथा योगाः पंचदश चाऽत्र इति पंचाशत्तमगाथायां द्वाविंशत्युत्तरद्विशततमादीनि सप्तविंशत्युत्तरद्वि
शततमांतानि षट् द्वाराणि ॥ परलोगगइत्यादि परलोके गतिर्गुणस्थानकेषु मिथ्यात्वादिषु स्थितस्तथा तेषां गु
णस्थानकानां कालपरिमाणं तथा नारकतिर्यग्नरामराणां मुक्तशरीराणि विकुर्वणाकालश्च स्वरूप चैकपंचाशत्तमगाथा

यामष्टविंशत्युत्तरैकोनत्रिंशदुत्तरत्रिंशदुत्तरद्विशततमादीनि त्रीणि द्वाराणि ॥ पन्नत्तेत्यादि सप्तसमुद्घातानां यथाय
रूपया तथा महारकाश्चत्वारस्तथा सप्त भयस्थानानि तथाष्टौ भाषाश्च प्रशस्ता इति द्विपंचाशत्तमगाथायामे
कत्रिंशदुत्तरद्विशततमादीनि षट्त्रिंशदुत्तरद्विशततमान्तानि षड् द्वाराणि ॥ भंगाणेत्यादि श्रुतयाणां ति भंगाभेदा
दिक्षाणां तथाष्टादशपापस्थानान्यपि तथा मुनिगुणानां सप्तविंशतिस्तथा एकविंशतिश्रावकगुणानां
मिति त्रिपंचाशत्तमगाथायामष्टत्रिंशदुत्तरद्विशततमादीन्येकोनचत्वारिंशदुत्तरद्विशततमान्तानि चत्वारि द्वा
राणि ॥ तेरिच्छीत्यादि ॥ तिरश्चीनामुत्कृष्टा गर्भस्थितिस्तथा मानुषीणामुत्कृष्टा गर्भस्थितिस्तथा गर्भस्य च काय
स्थितिः कायस्यावस्थाने तथा गर्भस्थितजीवस्याहार इति चत्वारः पंचाशत्तमगाथायां चत्वारिंशदुत्तरद्विशततमा
दीनि त्रिचत्वारिंशदुत्तरद्विशततमान्तानि चत्वारि द्वाराणि ॥ रिउसहेरेत्यादि ॥ स्त्रीसंबंधि पुरुषसंबंधि रुधिरं शुक्रं संबं
धि च शुक्रं तयोर्योगे मीलने सति यावता कालेन गर्भसंभूतिस्तद्वाच्यं तथा यावन्तश्च पुत्रा एकगर्भे तथा यावन्तः पि
तर एकस्य पुत्रस्योत्पादने इति शेषः एवं पंचपंचाशत्तमगाथायां चतुश्चत्वारिंशत्तमं चत्वारिंशत्तमं पंचचत्वारिंशदुत्तर
द्विशततमान्तानि त्रीणि द्वाराणि ॥ महिलेत्यादि महिला गर्भस्यायोग्या यावता कालेन भवति अबीजश्च पुरुषो याव

ता कालेन संपद्यते तथा शुक्ररुधिरयोः पिंडकारकरूपं कुलिकादीनां सर्वेषामपि शरीरस्थितानां परिमाणं वक्तव्यमिति षट्पं
चाशत्तमगाथायां सप्तचत्वारिंशदष्टचत्वारिंशदुत्तरद्विशततमे द्वे द्वारे ॥ सम्मत्ताइत्यादि सम्यक्त्वादीनामुत्तमगुणानामे
कदा प्राप्तानां परिपतितानां सतां पुनर्लाभे तां कियत्पुद्गलरूपं भवति तथा कर्मभूमिमानवत्वं सत्त्वा जीवा ये र्वतरमुहूर्ता ॥ इ
ति सप्तपंचाशत्तमगाथायामेकोनपंचाशत्पंचाशदुत्तरद्विशततमे द्वे द्वारे ॥ पुव्वंगेत्यादि ॥ पूर्वांगस्य संख्याविशे
षस्य परिमाणं तथा पूर्वस्य परिमाणं तथा लवणस्य एककरेण समुद्रापावगमाच्छन्नलवणसमुद्रस्य सर्वत्र भिन्नो यापिशिखाम
ध्येऽवावर्त्तते तस्मात् मानं तथा उत्सेधांगुलात्मांगुलप्रमाणांगुलानां प्रमाणानि इत्यष्टपंचाशत्तमगाथायामेकपं
चाशदुत्तरद्विशततमादीनि चतुःपंचाशदुत्तरद्विशततमान्तानि चत्वारि द्वाराणि तमस्कायेत्यादि तमस्कायस्य स्वरूपं
तथा अनंतानां षट्कं तथा अष्टकं निमित्तानां तथा मानोन्मानप्रमाणं च वाच्यं तथाष्टादश भक्ष्यभोज्यानि भक्ष्यं त
रनिभक्ष्याणि गुरुधनादीनि भुजं ततनिभोज्यानि शतस्यो रत्नादीनि इत्येकोनषष्टितमगाथायां पंचपंचाशदुत्तरद्विश
ततमादीनि एकोनषष्ट्युत्तरद्विशततमान्तानि पंच द्वाराणि ॥ ठाणेत्यादि ॥ षट्स्थानेषु वृद्धिहानिश्च वस्तूनां विशेषा
तथापहर्त्तुमशक्यदेशानां तेनेन्द्रादिभिरपि यानि न शक्यन्ते तथा तद्रहितपावककाम्यास्तथा जीवाजीवानामल्पबहुत्वं च सप्तष

ये इति षष्ठितमगाथायां ष[illegible]त्तादिद्विशततमादीनि त्रिषष्ठ्युत्तरद्विशततमांतानि चत्वारि द्वाराणि॥ संलेहणादि
संख्या युगप्रधानसूरीणां श्रीवीरजिनस्तीर्थे तथा उत्सर्पिण्यां प्रतिम जिनसंबंधितीर्थस्य विच्छेदमानं चः सप्त
त्युपरसेकषष्ठिगाथायां चतुःषष्ठिपंचसप्तत्युत्तरद्विशततमे द्वारे॥ देवाणेसंगादि देवानांम विचारोऽवसरे सेवास्त
पास्वरूप अष्टानां कृष्णराजीनां भरणीयतपास्वाध्यायस्याकरणाकरणे निरोषस्तथानंदीश्वरविधानस्याष्टम
द्वीपस्य संबंधिन्याः स्थिते भर्गरणनामिति द्वाषष्ठिगाथायां पर्षष्ठ्युत्तरद्विशततमादीनि एकोनसप्तत्युत्तरद्वि
ततमांतानि चत्वारि द्वाराणि। लद्धीउरस्सादि। लब्धय आमर्षौषध्यादयस्तपांसि इंद्रियजयादीनि पुसाणि
दीराः प्राकृतत्वेन तपाणात्न्यलक्षणाः समुद्रमध्ववर्त्तिनस्तथा आहारकशरीरस्वरूपं च तथा देशाश्नार्या
स्तथा तएवार्ष्यास्तथा सिद्धानामेकत्रिंशद्गुणा इति त्रिषष्ठिगाथायां सप्तत्युत्तरद्विशततमादीनि षट्सप्तत्युत्तर १२
द्विशततमांतानि सप्तद्वाराणि॥ समयेसाहि। समयास्तिद्धांतास्तेषु उक्ता नाना शास्त्रसमाम्नेयाश्च समाज्ञिंपा
वशेषां द्वाराणां नामोत्कीर्त्तनपूर्वाण तद्वारविषया विचारणा विवरणरूपाज्ञेया इति॥ तत्र चिइवंदणाइ अयं
द्वारविवरीत्वमाह निस्सिकिनिसीहेयेसाहि गाथात्रयमत्रे तद्वारावय प्रतिपादितानि दश चतानि त्रिकाणि चैतैः सं

युक्तं निपद्यसंयुक्तमितिपाठे त्रिकाणां दशकेनेतसंयुक्तमिति व्याख्येयं वंदनकंयः कश्चिद्वंदिजिनानां तीर्थकृ
तां त्रिकालं त्रिसंध्यं करोति उपयुक्तः सोपयोगः स प्राप्नोति सर्वकर्मक्षयकरीमोक्षलक्ष्मीविधायिनीं च निर्जरा
विपुलामिति कुत्र। पिसोपारद्द सामग्रया त्राणामितिपावस्तत्रापि सामुतस्थानमोक्षमिमतर्थः इति गाथात्रयसमु
दायार्थो विस्तरार्थस्तु प्रतिपदमेवं सां कथयिष्यते अत्र च चैत्यवंदनकीदृशेन विधिना विधेयमिति विधिस्वरूप
मेव निरूपयिष्यते। चैत्यवंदनस्य च भाष्याकारिष्यते।तिविस्तरभयात् साच्छेन त्वितविस्तराविद्याबुद्धि विस्तरतो ×
मद्भिर्ज्ञेया एवमत्रापि वंदनकसत्रादी मायेणापयाप्सानं विज्ञेयं तत्र चैत्यानि वंदितु कामः कश्चिन्मह
र्द्धिकोराजादिर्भवित्वा मामवि भवेनानत्र यथारिद्धिदिस्त सद्गाएइद्धी एसत्ताएदित्ती एसत्ताएजुत्ती एसत्तबले ए
सव्वपोरिसेणमित्यादि वचनात् शासनप्रभावनानिमित्तमहद्धर्धाचैत्यादिषु याति अल्पसत्वाश्च विभवेस्तर्दौद्धत्या
दिपरिहारेण लोकोपहासं परिहरन् जनांतीति तत्र चैत्यभवेनायां विधिः पुष्पतांबूलादिसच्चित्तद्रव्याणां परिहारेण
कटककुंडलकेयूरहाराद्यचित्तद्रव्याणामपरिहारेण एकवस्त्रपीधानएकेन चोपरितनवस्त्रेणकृतोत्तरासं म
गः एतच्च पुरुषं प्रति दृष्टव्यं स्त्रीत्तु सविशेषप्रावृतांगी विनयावनतततनुलतेति जिनप्रतिमादर्शने शिरस्यंजलि।

करणेन मनस एकाग्रताकरणेन चेति पंचविधाभिगमेन नैषेधिकीपूर्वकं प्रविशति यदुक्तं भगवत्यां सच्चित्ताणं दव्वाणं
विउसरणयाए अचित्ताणं दव्वाणं अविउसरणयाए एगसाडिएणं उत्तरासंगेणं चक्खुफासे अंजलिपग्गहेणं म
णसो एगत्तीकरणेणंति क्वचित् सचित्ताणं दव्वाणं विउसरणयाए इति पाठः तत्राचित्तानां द्रव्याणां [illegible]त्रादीनामव्युत्सर
णेन त्वसर्जनेन परिहारोऽसमर्थः यस्तु राजादिश्चैत्ये संप्रविशति स तत्कालं राजचिह्नानि मुकुटचामरादीनि परिहरति
तथा च सिद्धांतः अवहट्टु रायककुहाइं पंचवररायककुहरूवाइं खग्गं छत्तोवाणह मउडं तह चामराउ पंचमया इति अवह
ट्टुत्ति मुक्त्वा राजककुदानि राजचिह्नानि इत्यर्थः चैत्यगृहे च प्रविशन् नैषेधिकीत्रयं करोति जिनगृहस्य द्वारभागे मध्यप्र
देशे गर्भगृहदेशे च तत्र प्रथमा गृहादिविषये कायका[illegible]णां व्यापाराणां निषेधेन निर्वृत्तेति नैषेधिकी द्वितीया तद्वि
षय एव वचनव्यापारविधेयानां कार्याणां निषेधेन निर्वृत्तेति तृतीया तु गृहादिविषय एव मनसा चिंतनीयानां कार्या
णां निषेधेन निर्वृत्तेति [illegible] संप्रदायः सूत्रकारेण तु नैषेधिकीत्रयं विवृण्वता घरजिणहरजि १३
णपूयावावारच्चायउ निसीहितिगमित्युक्तं तत्रायमर्थः प्रथमनैषेधिक्या गृहादिगतसकलसावद्यव्यापारपरिण
प्रतिषेधः प्रतिपादितो द्वितीयनैषेधिक्या जिनगृहविषयपाषाणादिघटापनप्रभृतिसर्वसावद्यव्यापारपरिहारः मस्षेधि

तृतीयनैषेधिक्यां तु पुष्पफलपानीयप्रदीपमुखपदार्थसाध्यस्नपनादिरूपो जिनपूजाविषयोऽपि सावद्यव्यापारोऽ
त्यज्यते आत्मसौ प्रसाधितेऽर्थे जिनपूजां कृत्वा तृतीया नैषेधिकी विधीयत इति भावः तथा सर्वत्रिकाणि सूत्रकारेण न वि
वृतानि किंतु विषमत्वात् कानिचिद्विवृतानि अमीभिश्चाविवृतानामपि संक्षेपेण स्वरूपं निरूप्यते यथा त्रिःप्रदक्षि
णा ज्ञानादित्रयाराधनाय जिनप्रतिमादक्षिणभागादारभ्य त्रिःप्रदक्षिणा कर्तव्या संडासिप्रमार्जनेन तत्कृत्पंसु
कृत्वा णाकामेदक्षिणभागस्थवंदिविधिप्रमिति तदनंतरं प्रतिमादिसंमुखं भक्तिप्रतिश्रयस्थापनाय शिरसा भूमिपीठ
स्पर्शनरूपाः त्रयः प्रणामा विधेयाः त्रिविधा पूजा पुष्पामिषस्तुतिरूपा इति पुष्पामिसत्थुइभेया तिविहा पूया मुणेयव्वा त्ति
पुष्पैर्विचित्रैः सुगंधिभिरक्षतैः शालितंदुलादिभिः स्तुतिभिश्च लोकोत्तरसद्भूततीर्थकृद्गुणवर्णनपराभिः सं
वेगजनिकाभिः त्रिविधा पूजा कर्तव्येति अत्र च यद्यपि पुष्पादीनां फलस्नानभूतानामेव श्रीभगवतः पूजाविधौ
प्रतिपादितानि ततो निःसपत्नसुवर्णरत्नमुक्ताभरणादिभिरलंकरणं विचित्रपवित्रवस्त्राभरणादिभिः परिधा
पनं पुरतश्च सिद्धार्थकशालितंदुलादिभिरष्टमांगलिकालेखनं तथा प्रवरबलिजलमंगलप्रदीपदधिघृतप्र
भृतिपदार्थढौकनं भगवतश्च भालतले गोरोचनामृगमदादिभिस्तिलककरणं तथा आरात्रिकाकरणं यदाहुः

प्र·सा·टी·
१४

पूर्व्वेगणमवत्ते· गंधवरधूवसव्वोसहीहिंउदगधाराहिंचित्तेहिंसुरहिविलेवणवरकुसुमदामबलिदीवएहिंचोसट्ठ
य·दहियसकयगोरोयणामाइएहिंजहलाभं कंचणमोत्तियरयणमाइएहिंचविहेहिंपवरेहिंसाहरणेहिंमायं·
भावेविजायपरतोनय अन्नोउववएगोएसिकयाणलद्धमतोत्ति एवंभगवन्तंपूजयित्वाऐर्यापथिकीप्रतिक्रम
णपूर्वकंशक्रस्तवादिदंडकैश्चैत्यवंदनंविधायस्तोत्रंतत्तमेरुत्तमरूविविरचितंभगवतोगुणोत्कीर्त्तनरूपात्
स्तोत्राणांचोत्तमत्वमेवमभिहितं यथापिंडक्रियागुणगतैर्गंभीरैर्विविधवर्णसंयुक्तैः आशयविशुद्धिजनकैः
संवेगपरायणैःपुण्यैः पापनिवेदनगर्भैःप्रणिधानपुरःसरैर्विचित्रार्थैःअस्खलितादिगुणसंयुतैःस्तोत्रैश्चम
हामतिग्रथितैरिति यथानानेदारकृतेज्ञात्वपरपुंढस्त्रिग्धेपिवेधोजनेनक्रोधारूणिमास्यदेरूतवकुलेशेपि
शत्रौकश्चित् भानानेशविलोकितालिलजगत्वल्लीकियारूश्रियंचरूपंपुगमयुग्मवाणजयिनश्रीवर्द्धमानम
भा·कृत्वाहाटककोटिभिर्जगदंसहारिस्वमुद्राकयं हत्वागर्द्दशयानपिस्फुटमशीन्मोहादिवंशोद्भवान्तस्या·क १४
ल्मस्यहेणमनसाकेवलमहेतुंनपत्नेधात्रीयशोरधहिजयतावीरस्त्रिलोकीगुरुःयथावा संसारमारवपथेपति
तेननाथ सीमंतिनीमरूमरीविविमोहितेनरुष्टःकृपारसनिधित्वमतःकुरुष्व नस्मापनोरयातोजिननिर्वृतिमेरसादि

स्वरूपे· स्तोत्रैर्गुणोत्कीर्त्तनरूपापूजाथीभगवतोविधेयानंतनमों ॐ मंगलातकृदाप्यभिरेवंविधैर्यथा उत्तिष्ठंमारतो
तेभस्तुरगपतोयागिनैकेनकृत्वाधत्वाचासेनवासोविगलितकवरीभारमंसेवरंत्वाभूयस्तत्कायकांतिद्युतिशिनत
इतमीतिनाशैशिरंणसंरूष्माणमालिंग्यनीतंवपुरलससहाकूलस्या·पुनातु तथापागस्तेवाखुरूपास्तदासज्जगता
यस्तुर्य्यशीर्षाग्निपिंछापिंछापिगणः यदेतिपदशोनालिप्रसिद्धास्वएविश्वश्रस्तनिवस्यतिस्त्रितिभमामीशिश्म
तेत्रिशयुतेनागैरागिपुरंस्यतेः स्यतिज्जगन्निर्वेस्यतिद्यामितिउपलस्वरणात्वाद्यत्रिविधपूजायाअष्टप्रकारायास्तक
लजनानंददायिनीअर्हतांपूजाविधेयेति यदुक्तं वरधूवगंधचोकरकणरुंहंकुसुमेहिंपवरदीवेहिंनेवज्जफल
जलेहिंयजिणस्सपूजाअट्ठहाहोइत्ति अवस्थातियभावणंवेवत्ति· आवेयपूहोइ उमत्थकेवलिसिद्धत्तेहिंजिणोअव
त्तिगंवस्माणलंवस्मत्तं वस्मावइत्तियंविभाणेयात्तिनेछद्मस्थकेवलित्वसिद्धत्वलक्षणामवस्थात्रितयंभयास्वरूपभा
वनीयमितिभावः तत्रछद्मस्थावस्थैवंभगवतोभावनीयायथाविस्फूर्त्तन्नरस्त्वागीवोराणघंटरंगत्तुंगोदूर्दहर्षोल्लास
विलासिनीमतिकरैःकिः सीमसंपादरं राज्यंप्राज्यसुखंविमुच्यभगवान्निःसंगतांप्योग्रहीद्रूमैरेवजनेरचिंसमहिमा
विश्वप्रभुर्वीस्यते धर्मध्यानानिवद्धबुद्धिरसुहृद्यत्तेषभिन्नाशायोजाग्रत्तानवतुष्टयस्याणमणिर्स्वभ्रायत्नोहे

प्र.सा.वृ.
२५

सदा निःसङ्गो विहरन्निदानरहितं कृत्वेन्द्रविचित्रं तपः सम्यग्गुणैरेव लोक्यते त्रिजगतीनाथः प्रशान्ताकृतिर्दिश्यादि केवल्या
वस्थाजिनो ऽवं भावनीया यथा रागद्वेषकलत्रशत्रुमहतीं करैर्यच्छत्त्वक्रमकीडितं लोकालोकविलोकनैकरसिकं यन्नूतना
नविस्फूर्जितं सल्लोकोत्कलितविश्वसंशयपदं तन्मूर्द्धतो गलितं धर्म्मैरेव जिनेन जगत्त्रयगुरुणा येयं समालोक्यते अहो
विहितसमवसृतिस्त्रिभुवनेऽपि भूतिर्विभोरहो कृतमहोत्सवा त्रिजगती दृशामाकृतिः अहो वचनचातुरीमुषितकल्मषो
देहिनामहो गलितनिष्ठपं सुगुणवेष्टितं चेष्टितं सिद्धावस्थाप्येवं त्रिजगतीपतेर्भावनीया यथा यस्य ज्ञानमनन्तम
प्रतिहतं तेजस्य स्फुरितो दर्शनं दोषस्य क्षमनन्तमनुत्तमतमोऽनन्तः सुखानां च यद्वीर्यस्यानुपमः स कोऽपि महिमानन्त
स्त्रिलोकाद्भुतः सिद्धत्वे प्रथितप्रभः स भगवान्धर्म्मैः सदा ध्यायते तथा त्रिदिङ्निरीक्षणविरतिर्यस्यां दिशि जिनो
ऽपि कृत्स्ना जिनमानत्त्वा संमुखमेव निरीक्षणीयं न पुनरन्यदिक्त्रयसंमुखं चेत्येवं त्रस्या नारातनादि दोषप्रसंगात् तथा
पादयोः सवर्द्ध कृतं कायेन स्थानादि रक्षणनिमित्तं सम्यक् चक्षुषा निरीक्ष्य निजचरणनिक्षेपभूमौ प्रमार्जनं त्रिवारं २५
विधेयं तत्त्वं गृहीणो वस्त्राञ्चलेन यतीनां तु रजोहरणेनेति वर्णाद्यन्तिसृमिति त्रिकृणोति वर्णस्यालंबना उवर्णादि
पविषयो यति वर्णाः अकारककारादयो वर्णाः शब्दाभिधेयमात्रं वचनं प्रतिमादिरूपमत्तन्नि त्रितयेऽप्युपयुक्तेन भवित

व्यं तत्रालंबनं यथा अष्टाभिः प्रातिहार्यैः कृतसकलजगद्विस्मयः कान्तकान्तिः सिंहस्त्रीभूषपरैरितः समदसिजनस्मेरदृष्टि
प्रपातैर्निःशेषश्रीनिदानं निखिलनरसुरैः सेव्यमानः प्रमोदादर्हन्नालंबनीयः स्फुरदुरुमहिमावन्दमानेन रेवानिशादि
मुद्रात्रिकं चेति आवश्ये जिणमुद्दा जोगमुद्दा मुत्तासुत्ती उत्ति तिन्नि मुद्दाउ त्ति जिनमुद्रा योगमुद्रा मुक्तिमुद्रा चेति मुद्रात्र द्रा
यं त्रातत्रं तिविहं च पणिहाणमिच्चादि त्रिकृणोति कायमनोवचनानां निरोधनं च तिविहं च पणिहाणमिति
कायमनोवचनानां प्रकुशलरूपाणां निरोधनेन त्रियं त्रिगुणं भुभानो चेतेषां करणमिति तत्र कायं संसुहृतं कृत्वा
विहितकरकुड्मलो जायको ऽसनमतिमेवाविंसति नामनिवाहृचरितं च समानमर्हन्तं निवेश्यपनिजमफरिमाफरी
कृतेऽमथकमाधर्मेयावाञ्चेव प्रणिधानमाधत्ते यथा जयत्रिजगतीपतेऽवारणरहितो श्रीजिनप्रभासौवर्णतलं स्फुर
तु मेविवेकः परः भवेद्भवविरागिता भवत्रुषंश्च मे निर्द्धितिः परार्थकरणोद्यमः सद्गुरुगणार्चनेऽनोपताधिस्यादिति तत्रसु
त्रयमध्ये यस्या न्नव्यापारस्तृतीयतिपंचमेस्यादि पञ्चाङ्गस्वयं वाचिविक्षितव्यापारं वेति पञ्चसपंचाङ्गप्रणिपातः
प्रणिपात दण्डकपाठस्यादावसाने च प्रणामो भवति कर्तव्यः रतिशेषः यद्यपीहपञ्चाङ्गप्रणिपातेऽसक्तं तथापि पञ्च वा
गमुद्दपाप्रणिपातदंति दृष्टं मुद्राणामेवाधिकृतत्वाद्युक्तं च पञ्चावाप्यास्त्रयमपिमुद्रात्वमनगविन्यास विशेषरूपत्वा रेग

मुद्रा भवतीति तथाऽन्यत्रपाठे राकुसताकारिरूपो भवतीति योगमुद्रया वंदनं चैत्यवंदनं अरिहंतचेइयाणमित्यादिकं जिनमु
द्रयानुसारा अत्रानुसारो द्रष्टव्यः इयं च पादाश्रिता योगमुद्रा च हस्ताश्रिते स्तुभयोरपि चैत्यवंदने आयाराः प्रणिधाने जय
वीयरायेत्यादिकं मुक्ताशुक्तिमुद्रयेति अथ पंचांगप्रणिपातलक्षणनिरूपणपूर्वकं एतासामेव मुद्राणां लक्षणं दर्श ति
यति दो जाणू दोणि करा पंचमगं होइ उत्तमंगं तु संमं संपणिवाओ नेओ पंचंगपणिवाओ अन्नोन्नंतरअंगुलिकोसागारे
हिं दोहिं हत्थेहिं पिट्टोवरिकुप्पर संठिएहिं तह जोगमुद्दत्ति चत्तारि अंगुलाइं पुरओ ऊणाइं जत्थ पच्छिमओ पायाणं उस्सग्गो
एसा पुण होइ जिणमुद्दा मुत्तासुत्तीमुद्दा समा जहिं दोवि गब्भिया हत्था ते पुण निडालदेसे लग्गा अन्ने अलग्गत्ति द्
साद्विणा व्याख्या तु इयं तत्र पंचभिरंगैः सम्यक् प्रसमीचीनतया प्रकर्षेण निपतनं संप्रणिपातो ज्ञेयः सम्यगिति समकं चा
गप्रणिपातलक्षणकारि पंचांगानीति दर्शयति द्वे जानुनी द्वौ करौ पंचमकं भवति पुनरुत्तमांगं तत्र शिरः समुच्चयार्थः चश
ब्दार्थः तथा योगमुद्रा अन्योन्यांतरिताभिरंगुलीभिः कृत्वा यत्कोशाकारात्म द्वाभ्यां हस्ताभ्यां मुदरोपरि संस्थापित २९
कूर्पराभ्यां भवतीति एषा पुनर्भवति जिनमुद्रा यत्र पादयोरुत्सर्गो तं भवति चत्वार्यंगुलानि पुरतो अग्रभागे ऊना
नि च तानि पश्चिमभागे इति मुक्ताशुक्तिमुद्रा भवति यत्र समौ मिलितौ द्वावपि गर्भितौ तु उभयतोपि सोच्चासौ पुनश्च ण

दौ हस्तौ भवतस्तौ पुनर्ललाटदेशलग्नौ कार्याविति एके मन्यंते प्रतिपादयंत्यन्ये पुनस्तत्रालग्नावेवेति नेत्रमध्यभागव व
र्त्तौ कायाग्रभागादिसर्वपः पुनर्विधिशेषमाह दाहिणवामंगेत्यादि मिति मा दक्षिणभागे स्थितः पुरुषः प्राधान्यादग्र
तोऽभिवंदने देवान् नारीगणाश्च वामपार्श्वे स्थितस्तत्रापुत्तकृत्यः षष्टिहस्तप्रमितेऽवग्रहे देवाविरोधे स्थितः स्वच्छं दते
जघन्यतस्तु एवकेनच हस्तप्रमिते देशे उच्छ्वासनिश्वासादिजनिताशातनापरिहाराय इति शेषः इदानीं पंचमंग
लएपयोपक्षिकीयाकृतसंगाटीनां संपद्वर्णानां लक्षणं अरहंतवंदणेति गाथादिमं चमंगलनमस्कारे द्वौ संपदः एयपि भा॰ह
पिका मयौ श्रावकेन च अरिहंतचेइयाणमित्यादिदंडके छी लोगस्सुज्जोयगरे इत्यस्मिन् दंडके अष्टाविंशतिः पुक्ख
रवरदीवड्ढे इत्यत्र षोडश सिद्धाणं बुद्धाणं इत्यस्मिन् दंडके विंशतिः संपदः अस्या एव पर्यायमाह वीसामा इत्ति वि
श्रम्यते विश्रम्यते गलमेते स्थितिविश्रामस्थानानीति यावत् तत्र पंचपरमेष्ठीत्यादि पंचपरमेष्ठिनमस्कारे पदे पदे विव
क्षिताभिधेयपुक्तेः नमो अरिहंताणमित्यादिके नवपुनः सुप्रसिद्ध संपदः अष्टौ सप्तसंपदः क्रमप्राप्ते विज्ञेयाः अष्टमी पुनः पर्यंते
समस्तगणसप्तमाणा मंगलाणं च सव्वेसिं पढमं हवइ मंगलमिति स्वरूपाभिनिनागणधरादिभिः अन्ये तु पर्यंत
वर्त्तिनीत्तिस्रः संपद एवं मन्यंते यथा एसो पंचनमोक्कारो सव्वपावप्पणासणो इति षोडशाक्षरप्रमाणा षष्ठी संपत् मंग

णाणं च सव्वेसिं इत्यष्टाक्षरगणिता सप्तमी पढमं हवइ मंगलमिति नवाक्षरनिःपन्ना अष्टमी संपत् यदुक्तं अंतिमचूला
इतिपसोलसअट्ठनवअक्खरजुयं चेव जो पढइ भत्तिजुत्तो सो पावइ सासयं ठाणमिति एवमेषां पदानां यथासादिष्टापि संपदि
ष्वपेयपापयंमलोत्तरगणिमतिमध्यिर्मतव्या इति अत्र च पयपि हवइ होइ इत्युभयमपि मतितं कश्चित् दृष्यते होइ मंग
लमिति च पाठे श्लोकोनाधिकाक्षरो भवति तथापि हवइ इत्येव पठितव्यं यतो नमस्कारवलयादिग्रंथेषु सर्वमंत्र
त्रा नामुत्तमाक्षरस्य कल्पितपदार्पकारौकक्रमद्भूमस्य विषविषधरशाकिनी डाकिनी याकिन्यादिनिग्रहनिर
वग्रहस्वभावस्य सकलजगद्वशीकरणक्षुद्राद्युपद्रवाभिचारिमोहनापसाधनदृष्टशूलाणेसारमतस्य पंचपरमे
ष्ठिनमस्कारस्याख्यापयति अपि तथाविधप्रयोजनोद्देशेन मंत्रपद्यादितिरश्चिनायाप्राकृतायामाप स्याहृत्त्रिंशदक्षं
पप्रमालिख्यते अतिरलं च श्लोकसंख्ये कैंकमेत्तरनिवेश्यते तथाना भोत्रपि स्त्रिंशत्प्रमसंमनवपदंनिवेशमंस्य
धानाभिभागःश्मएवस्यात् मात्रयापि च हीनेपं त्रपमारोनिवेश्यमानेन महामंत्रेत तत्साध्यविशिष्टाभीष्टफलपूर्ण
फलानवाप्तेरिति हवइ मंगलं इत्येव पाठो युक्तः तथा चैतत्संवादि पूर्वाचार्यकृतमस्करणवचनं अगस्तिश्वाकर ३८
परमाणूनिणमासणिनक्कारपदाणु अंतिमंचूलातिल्लिपमिच्छा सोलसअट्ठनवअक्खरसिद्धा इत्यादि ततोना

न त्राभिगामं वृत्तं केनापि कृतमिति विमर्शनीयं निर्मत्सरैरिति तथाप्रथमपदेषु स्थितास्तेषु यस्यां संपदि पादांतिपदानि
भवंति तस्यां तावंति सुखेनैव ज्ञायंत इत्येतदेषां पथिकीसंपदां महानामपि प्रथमपदानि दर्शयति इच्छामेत्यादि
भीमोभीमसेन इति न्यायेन ईर्यापथिक्यादिसंपदां विश्रामेषु संपत्सु एतानि इच्छामीत्यादीनि प्रथमपदानि द्रष्टव्या।
नि अत्र च प्राकृतत्वात्पुंस्त्वनिर्देशः एवं च इच्छामि पडिक्कमिउमित्यादि एका संपत् द्वितीया गमणागमणे तृतीया
पाणक्कमणे इत्यादि चतुर्थी ओसाउत्तिंगेत्यादि पंचमी जे मे जीवा विराहिया इति षष्ठी एगिंदिया इत्यादि सप्तमी
अभिहया इत्यादि अष्टमी तस्स उत्तरीकरणेणमित्यादि ठामि काउस्सग्गमिति पर्यंते॥ इदानीं शक्रस्तवसंपदामा
दिपदानि दर्शयति अरिहमित्यादि अत्र च नव संपदो भवंति तत्र प्रथमपदं कंठेक्रियापांतिपादाकमेवतत्तेसंप ह्रूं स्त
रोनगृह्यते नमोत्थुणं अरिहंतमित्यनेन पदद्वयसूचितप्रनेन नमोत्थुणं अरिहंताणं भगवंताणं चेत्येतत्प्रथमा प्रतिपादिता यतो अर्हतां भगवतां चेत्येतत्सम
स्तसूचितं आइगरेत्यनेनाक्षरस्वरूपेण पदसूचितपदत्रयनिःपन्ना द्वितीया संपत् प्रणिता एषा चेत्येतदसंपदएव प्र
धानासाधारणगुणहेतुसंपदिति यतः आदिकरणशीला एव तीर्थकरत्वेन स्वयंसंबोधतश्चैतेन भवंति पुरि
सोत्तमेत्यनेन गाथावयवेन सूचितादिपदचतुष्टयनिष्पन्नात् तृतीया संपत्प्रणिता एषा चेत्येतन्यसंपदत्वासाधारणहू

प्र·सा·ह·
२८

पारेतुसंपत्स्वपितांपुरुषोत्तमानामेवसिंहपुंडरीकगंधहस्ति धर्म्मभाक्त्वेनलोकनमलोपपत्तेः लोगोत्तमेनेनगाथाक्षर
रूपेनप्रकटिताद्यपदपंचक निर्म्मिताचतुर्थीसंपदभिहिता एषास्तोतव्यसंपद एवसामान्येनसर्वजनोपकारित्व
लक्षणोपयोगसंपत् लोकोत्तमत्वलोकनाथत्वलोकहितत्वलोकप्रदीपत्वलोकप्रद्योतकरत्वानां पदार्थत्वादिति
अभयेत्यनेनतुगाथाचतुर्थपादेनाभिअक्कादिपदपंचालापकपरिमाणापंचमीसंपदुद्दिष्टा एषाचास्याएवोपयोग
संपदोहेतुसंपत्तत्वात् अभयदान चक्षुर्दानमार्गदानशरणदानबोधिदानैः परार्थसिद्धेरिति धम्मजिगाथा
चपदेनत्वापिनाद्यपदापंचपदघटिताषष्ठीसंपन्निवेदिता एषाचस्तोतव्यसंपद एवविशेषेणोपयोगसंपद्धे
प्र तुः धर्म्मदत्वधर्म्मदेशकत्वधर्म्मनायकत्वधर्म्मसारथित्वधर्मवरचतुरंतचक्रवर्त्तित्वेभ्यएवतस्याः स्तोतव्य
संपदः अप्रतिहतवरज्ञानदर्शनधराव्यावृत्तछद्मान अपनेऽर्हतोभगवंतत्वभवंतीति जिणजावयगाथापादत्वेनप्राकृ
त्वेनाद्यपदाआलापकद्वयनिर्म्मिता सप्तमीसंपन्निवेदिता इयंचात्मतुल्यपरफलकर्तृत्वसंपत्प्रतिपादिता। २८
जिनज्ञापकत्वतीर्णतारकत्वबुद्धबोधकत्वमुक्तमोचकत्वानामेवंविधस्वरूपत्वादिति सव्वन्नूगाथास्वरूपेणसंसूचि
ताद्यपदाआलापकत्रयनिःपन्नासिवमयलपर्यंतानवमीसंपदभिहिता एषाचप्रधानगुणापरिक्षयप्रधानफलाप्त्याभय

×द्रोविशेषेणोपयोगात् अप्पजिणा गाथाक्षरद्वयेन संसूचिताद्यपदाऽलापकद्वयेन निःपन्नासप्तमीसंपदभिहिता एषाचस्तोत
व्यसंपदि दृष्टव्ये सकारणरूपा ४×

संपदभिहिता सर्वज्ञसर्वदर्शिनामेवशिवाचलादिस्थानमाप्तेर्जितभयत्वोपपत्तेरिति एतावत्संपदोऽनंतधर्म्माध्या
सितेवस्तुनिमुख्यस्तुनिमुख्यहस्तासंभवस्तेनचानेनधर्म्मात्मकत्ववस्तुनोऽनुपपन्नमितिवाच्यं तस्यान्यत्रास्मद्गुरु
णोनप्रमाणप्रकाशवादमहार्णवादिमहातर्कग्रंथेषुविस्तारेणसाधितत्वादिति शक्रस्तवसंपदां प्रथमोद्दिंग
नपदानित्येतानिषुद्दिंगानि ईहप्राकृतत्वादष्ट आलापकआश्रितपदस्थितानितानसाः मावजेअईआसिद्धा
इतिगाथायासार्थ्यंविवरणतीयाशक्रस्तवांतेपूर्वमहाश्रुतधरैरभिहितत्वादितिनपुनरौपपातिकादिषुनमोजि
णाणंजियभयाणमितिपर्यंतस्यशक्रस्तवस्यपठितत्वान्नेयं गाथास्मानिःस्वयंभणपते इतिक्रोधाग्रहस्था
नमानसैर्नवनवानस्वकल्पनाकल्पनाकुशलैराफलिकैरीवकैश्चिन्नपठनीया प्राक्तैनरशावैरनभिमानैर्गीतार्थैःस
रिभिराहतत्वपहत्वात्शरणीयत्वादिति अरिहंतचेइयाणमित्यादिदंडकेऽष्टौसंपदस्ताश्चाद्यपदनिरूपणार्थ
माह आरहंतेदणेत्यादि तत्रारिहमित्यनेनसंसूचिताद्यपदापदद्वयनिःपन्ना प्रथमासंपत् वंदणमित्यनेनसूचिता
द्यपदापदषट्कनिःपन्ना द्वितीयासंपत् सद्धेत्तिगाथाचपदेननिवेदिताद्यपदापदसप्तकनिर्मिता तृतीयासंप
त् अन्नत्थइतिगाथास्यैरणानिर्मिताद्यपदापदनवकनिर्मिताचतुर्थीसंपत्सुहुमेतिगाथाचपदेनसंसूचिता

घपदापदत्रयनिःपन्ना पंचमी संपत् ॥ एवेति गाथासारूपेण प्रकटीकृता पदापदषट्कनिष्पन्ना षष्ठी संपत् जेति
गाथास्वरेण सूचिता घपदापदचतुष्कनिष्पन्ना सप्तमी संपत् नाचेति गाथास्वराभ्यां सूचिता घपदापदषट्कनिष्प
न्ना अष्टमी संपत् इत्यर्हत्स्तवे विश्रामाः ॥ प्रथमपदानि आद्याद्यानां पदानां परिज्ञानेन मध्यमानि सुगमानि चेति
इदानीं चतुर्विंशतिस्तवदंडके ज्ञानस्तवदंडके सिद्धस्तवदंडके च कायोत्सर्गप्रणामसंपदामागममाह ॥ अट्ठावीसस्सादि
अष्टाविंशतिः षोडशविंशतिश्च यथाक्रमेण यथासंख्येन निर्दिष्टानि वेदितानाम जिनस्तवनादिषु लोगस्सुज्जोय
गरे इत्यादिषु दंडकेषु विश्रामाः पदमानेन श्लोकादिचतुर्थभागरूपेणेति इदानीमस्मिन्नेव चैत्यवंदनायां द्वादशाधिका
राणाम् यथायथं प्रदर्शनायाह दुन्नियमित्यादि द्वावधिकारौ शक्रस्तवे एकोऽर्हच्चैत्यस्तवे द्वौ श्रुतस्तवे द्वौ चतुर्विंश
तिस्तवे पंचैव सिद्धस्तवदंडके भवंति अधिकारा अधिक्रियंते समाश्रीयंते इत्यधिकाराः प्रस्तावविशेषा नानाभि
स्तवैश्चैत्यवंदने विधीयंते इति शक्रस्तवादिष्विह स्तोतव्यविशेषविषया इति तत्र यथायथं तानेव दर्शयति पढमे नमो ॥५
त्थुणं इत्यादि गाथाद्वयं नमोत्थुणमित्यारभ्य जियभयाणमिति पर्यंतेनाधिकारेणाभावार्हतां सद्भूतगुणोत्कीर्तन
प्रथमोधिकारो भावार्हतो ॥ जे अ अईया सिद्धा इत्यनेनोपलक्षितगाथया द्वितीयोधिकारः कथितो तत्र द्र

व्यार्हतां वंदना विधीयते द्रव्यार्हंतो द्रव्यभूतार्हंतो ये अर्हत्वं चतुस्त्रिंशदुपलक्षितं प्राप्य सिद्धा ये च न प्राप्स्यंति क्रमेणानेन वंधं ते ये तो यातिरX
भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके तद्द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं प्रोक्तमिति गणधरैर्द्रव्यलक्षणमुक्तं न च वक्तव्यं
द्रव्यार्हंतोप्यर्हद्भावापन्ना एव वंदनीया पत्र चाभिगता स्तुतः प्रथमाधिकारेणैव भावार्हंतो वंदितत्वात् जेय अईया सिद्ध
त्ति पुनरुक्तमिति पुनोर्वर्त्तमाना भविष्यंतश्च जिनाः साक्षादर्हद्भावा एव वंदनीयाः न नरकादिभववर्त्तिन इत्यस्याशंकायाः स्था
पनापुनरुक्तत्वादेतत्सम्पदस्येत्यास द्रव्यार्हद्वंदनो द्वितीयोऽधिकारः तथा येषां देवगृहादौ स्थापितानां जिनबिंबानां
वंदनं कर्तुमारब्धं ता अनेनार्हंतचेइयाणमिति दंडकेन वंद्यंते इति स्थापनार्हद्वंदनो नाम तृतीयोऽधिकारः लोगस्स
त्ति लोगस्सुज्जोयगरे इति दंडकेनास्यामवसर्पिण्यामेकक्षेत्रनिवासिनां भव्यजनस्य भवभाविसकलक्लेशापहारकारक
त्वेनासन्नवर्त्तिनां चतुर्विंशतेरपि तीर्थकृतां नामोत्कीर्तनेन पुरःसरं स्तवः क्रियते इति जिननामोत्कीर्तनो नाम चतुर्थोऽ
धिकारः सव्वलोए इति गाथा च पदसूचित सव्वलोए अरिहंतचेइयाणमित्यादिना अधोलोकमर्त्यलोकस्वर्गलोकस्थि
तशाश्वताशाश्वतदेवगृहस्थापितानां श्रीजिनबिंबानां वंदनं क्रियते इति सर्वलोकदेवगृहजिनस्थापनास्तवो पं
चमोधिकारः तथा पुक्खरेति गाथार्द्धरूपेण निवेदित पुक्खरवरदीवड्ढे इत्यादि परिपूर्णगाथया केन पुष्करद्वीपार्द्धभरत

प्र·सा·वृ
२०

कीर्त्तं तु जंबूद्वीपवर्त्तिनामर्हतां स्तवः क्रियते इत्यर्द्धतृतीयद्वीपवर्त्तिभावार्हत्स्तवो षष्ठोधिकारः ननु श्रुतस्तवाधि
कारएवेदानीं प्रस्तुतस्तत्कथमप्रस्तुतस्तीर्थकृतां स्तवः क्रियत इति सत्यमेतत्तथापि श्रुतस्य कारणं भगवंतस्तीर्थक
राएवतैवप्रवर्त्तितत्वात् अत्थं भासइ अरिहा इत्यागमवचनात् गणधराणामपि सूत्रकर्तृणामर्थस्य तीर्थकरैरेवप्र
वर्त्तितत्वादिति अस्मिन्हेतुदेवे श्रुतस्तवे प्रस्तुतेपि तीर्थकरस्तवकरणं ज्ञापयन्ति पलिहि च्छिकार्ये जातं क्रियते श्रेयो।
र्थिभिस्तत्स्तुतं तीर्थकृन्नमस्कारपुरःसरमेव करणीयं इत्युमेव सर्वकल्याणप्राप्तेरिति तमतिमिरेतिगाथाक्षरैः सू
चितश्चायं श्रुतस्तवः श्रुतं भगवत इति श्रुतस्तवोऽयं सप्तमोधिकारः सिद्धाणमित्यनेन निवेदितसकलगाथाकेन सिद्धस्तु
त्यभिधानोष्टमोधिकारः जो देवाण वि इति गाथाक्षरैः सूचितेन गाथाद्वयेन एतत्तीर्थस्वामिवर्द्धमानकल्याद्यासन्नतरोप
मामहोपकारकारित्वाद्भगवतो महावीरस्य स्तवनं नमस्कारफलप्रकटनपरो विधीयते इति वीरस्तवो नामायं नवमो
ज्ञं ऽधिकारः उज्जिंतसेलसिहरे अनेनापि पदेन सूचितसकलगाथाकेन सकलत्रिलोकीतिल[क]कायमानस्य भगवतः २
श्रीनेमिनाथस्य स्तवो विधीयते इति श्रीनेमिनाथस्तवो दशमोधिकारः। चत्तारि अट्ठ दस दो य इति अनयापि गाथा
या चतुर्विंशतेरपि जिनानामाहोसाकारणपूर्वं प्रणिधानं कृतमिति एकादशोधिकारः वेयावच्चगराणंति अनेनापि सूचि

तवेयावच्चगराणं संतिकराणमित्यादि कायोत्सर्गकरणतदीयस्तुतिदानपर्यंतेन द्वादशोऽधिकारः कथितः एतानि
नमोत्थुणमित्यादीनि अधिकाराद्विगतपदानि ज्ञेयानि इति गाथाद्वयतात्पर्यार्थः इदानीं यस्मिन्नधिकारे ये जिनाः
यो वंद्यंते तत्स्वयमेव सूत्रकारो दर्शयति पढमे इत्यादि गाथाद्वयं तत्र प्रथमेधिकारे शक्रस्तवरूपे जिनभावा ७
णमिति पर्यंतेन पाषष्ठे पुक्खरवरदीवड्ढे इत्यादि रूपे तथा नवमेऽधिकारे जो देवाण वि देवो इत्यादिरूपे तथा दश
मेधिकारे उज्जिंतसेलसिहरे इत्यादिरूपे तथैकादशेधिकारे चत्तारि अट्ठ दस दो इति स्वरूपे भावजिनानां द्वितीयगाथो
तेसरमीति क्रियापदकरणात्स्मरामि वंदनीयत्वेनेति भावजिनाश्च सकलत्रैलोक्यातिशायिनीमशोकाद्य
तिविशिष्टाष्टप्रातिहार्यरूपामार्यजनानिकरनयनललिनानां परमोत्सवायमानामपारसंसारपारावारनिमज्जज्ज
नतोत्तरणतरीकल्पामविकल्पकल्पद्रुमचिंतारत्नादिप्योपमानमहिमानमुश्रीलक्ष्मीमलंकेवलालोकपरि
कलितलोकालोकाप्रभुतां विभूतिमनुभवंतस्तीर्थकराः तथा अरहंतचेइयाणमित्यादिके तृतीयेधिकारे सर्वलो
एअरहंतचेइयाणमित्यादि रूपे पंचमे च यथाक्रमं साक्षाद्विवृद्धिषितदेवगृहस्थापितप्रतिमारूपान्भवनपतिव्यं
तरज्योतिष्कवैमानिकनरेश्वरमंदरकुलाचलाष्टापदसम्मेतशैलशिखरशत्रुंजयोज्जयंतादिसर्वलोकस्थितशाश्व

नाशाश्वतरैवतादिस्थापितजिनेंद्रबिंबरूपांश्च जिनान् स्मरामीति यथा तमतिमिरपडलेत्यादिके सप्तमेऽधिकारे नि
खिलकुमततिमिरनिकरापहारकारिश्रुतज्ञानं स्मरामीति तथाष्टमे सिद्धाणं बुद्धाणमित्यादिरूपे द्वितीये जेय अ
ईयाइत्तिरूपे चतुर्थे लोगस्स उज्जोयगरे इत्यादिरूपे च यथासंख्यं सिद्धान् वर्द्धमानजिनान् नेमिजिनान् अन्यांश्च जिनान् स्मरामीति तथा
वेयावच्चगराणं संतिगराणमित्यादिरूपे द्वादशाधिकारे वैयावृत्त्यकरसुरान् स्मरामीति॥ ननु ज्ञातस्ताव
च्चैत्यवंदनविधिः परमेवंविधविधिविशुद्धं चैत्यवंदनमहोरात्रमध्ये साधुभिः श्रावकैश्च कियतीर्वारं विधी
यत इति तत्राह साहूण सत्तवारा इत्यादि साधूनां सप्तवारं अहोरात्रमध्ये भवति चैत्यवंदनं गृहिणां श्रावक
स्य पुनश्चैत्यवंदनं प्राकृतत्वाल्लुप्तप्रथमैकवचनांतमेतत् तिस्रः पंच सप्तवारा इति तत्र साधूनामहोरात्रमध्ये
[illegible]-रूपेण सप्तवारं भवतीत्याह पडिक्कमणे इत्यादि प्राभातिकप्रतिक्रमणपर्यंते तत्र चैत्यगृहे तदनुभोजन
समये तथा चेति समुद्घूपे भोजनानंतरं च संवरणं संवरणनिमित्तं प्रत्याख्याने हि पूर्वमेव चैत्यवंदने कृते विधीय २१
ते तथा संध्यायां प्रतिक्रमणारंभे तथा स्वापसमये तथा नि[illegible]मोचनरूपं प्रातिबोधकालिकं च सप्तधा चैत्य द्रा
वंदनं भवति यतो जौ निर्दिष्टादेकवचनं यतीनामित्यर्थः गृहिणः कथं पंच त्रीन् च तिस्रो वाराश्चैत्यवंदनमित्याह पडि

क्रमई [illegible] त्रिसंध्यं प्रतिक्रमतो गृहस्थस्यापि यतेरिव सप्तवेलं चैत्यवंदनं भवति यः पुनः प्रतिक्रमणं न विधत्ते त
स्य पंचवेलं जघन्येन तिस्रश्चापि संध्यासु चैत्यवंदनमिति त्रिविधं ननु तस्याश्चैत्यवंदनायाः किमेक एव प्रकारः किं ति
वा जघन्यादिकृतभेदांतरमप्यस्ति वाढमस्तीत्याह नवकारेणेत्यादि जघन्यमध्यमोत्कृष्टभेदेन त्रिविधं तत्र चै
त्यवंदनं तत्रैकेन नमो अरिहंताणमित्यादि पदेन यद्वा यथाशक्ति जिनः स्वयंभूरुचिभिः एषामीकृतागस्थिता
रयोरूपादि इत्यादि स्थितवति प्रीतेः सुराणां प्रभो कायेभास्वते च नेत्रनिकरैर्दृष्टो लाञ्छिते संभ्रांतात्स्विदंगा
गनाः कृष्णमपि ज्ञात्वा तव चक्रिरे इत्यादिरूपेण श्लोकेन जघन्या चैत्यवंदना अन्ये पुनः प्रणाममात्ररूपां जघन्यां
चैत्यवंदनां वदंति प्रणामश्च पंचधा भवति यथा एकांगः शिरसो नामने द्व्यंगः करयोर्द्वयोः त्र्याणां नमने त्र्यंगः
करयोः शिरसस्तथा चतुर्णां करयोर्जान्वोर्नमने चतुरंगकः शिरसः करयोर्जान्वोः पंचांगः पंचानां नमने २ इति मध्यमा
तु स्थापनार्हत्स्तवं दंडकैकस्तुतिरूपेण युगलेन भवति अन्ये त्वेवं व्याख्यानयंति दंडकानामर्हच्चैत्यादीनां पंचकं त
था स्तुतियुगलमिति समयभाषया स्तुतिचतुष्टयं ताभ्यां या वंदना सा मध्यमा सा प्रतीतं ह्येकवारवंदने सर्पः उत्कृष्टा
तु विधिपूर्वकं शक्रस्तवोपलक्षितपंचदंडकनिर्मिता जयवीयरायेत्यादिप्रणिधानपर्यंता चैत्यवंदना भवतीति अन्ये पु

नः शक्रस्तवपंचकेन निर्मिता शक्रस्तवपंचकभणनेनोत्कृष्टा चैत्यवंदना भवतीति आवश्यके एवं च शक्रस्तवपंचकं भव
ति उत्कृष्टचैत्यवंदनया वंदितुकामः साधुः श्रावको वा चैत्यगृहादौ गत्वा यथोचितं प्रतिलेखितप्रमार्जितस्थंडिले कृत्वा
त्रैलोक्यगुरौ विनिवेशितनयनमानसः संवेगवैराग्यभरोज्जृंभमाणरोमांचकंचुकितगात्रः प्रसरत्प्रकर्षहर्षवशा
द्विसर्पद्बाष्पपूरप्लुतनयननलिनः सुदुर्लभं भगवच्चरणारविंदवंदनमिति बहु मन्यमानः सुसंवृतांगोपांगो योग
मुद्रया जिनसंमुखं शक्रस्तवमस्खलितादिगुणोपेतं पठति तदनु ऐर्यापथिकीप्रतिक्रमणं करोति ततः पंचवि
शत्युच्छ्वासमानं कायोत्सर्गं कृत्वा पारयित्वा लोगस्सुज्जोयगरेत्यादि परिपूर्णं भणित्वा जानुनी च भूमौ निवेश्य
योजितकरकुड्मलो यथास्थापितधूपकविकृतजिननमस्कारभणनपूर्वं शक्रस्तवादिभिर्दंडकैर्जिनमभिवंद्यते चतुर्थ
स्तुतिपर्यंते पुनः शक्रस्तवमभिधाय द्वितीयवेलं तेनैव क्रमेण वंदते तदनु चतुर्थं शक्रस्तवभणनानंतरं स्तोत्रं २२
पवित्रं भणित्वा जयवीयरायेत्यादिकं च प्रणिधानं कृत्वा पुनः शक्रस्तवमभिधत्ते इति चोत्कृष्टचैत्यवंदना ऐर्या न
पथिकीप्रतिक्रमणपूर्वकं भवति जघन्यमध्यमे तु चैत्यवंदने ऐर्यापथिकीप्रतिक्रमणमंतरेणापि भवत इति ॥७॥ वं
दनायेति द्वितीयद्वारमधुना व्याख्यायते तत्राह मुहणंतयेत्यादिगाथात्रयं मुखस्यानंतकं वस्त्रं मुखानंतकं मुख

वस्त्रिका तच्च देहश्च कायश्चावश्यकानि च द्वादशावर्तादीनि तेषु प्रत्येकं पंचविंशतिः स्थानानि तथा षट् स्थानानि
इच्छायेत्यादीनि तथा षट् गुणा विनयोपचारेत्यादिकास्तथा षट् वचनानि गुरोर्वचनानि छंदेणेत्यादीनि प्राकृते।
निमित्तं वंदनकं देयं तदनु इच्छामो अणुसट्ठिंति भणित्वा उपविश्य गुरुभिरेकस्यां स्तुतौ भणितायां थुइत्तियत्ति व
वर्द्धमानस्तुतित्रयं प्रवर्द्धमानस्वरेण भणनीयं तदनु सक्कत्थयंति सक्कत्थवो भणनीयस्तोत्रं चेति तदनु स्तोत्रं भण
नीयं तदनु दैवसिकातिचारविशुद्ध्ये कायोत्सर्गः कार्योपि लोकस्योद्योतकरचतुष्टयं च चिंतनीयमिदं गाथायामभणि
तमपि विज्ञेयं देवसियंत्ति इदं संध्यायां दैवसिकं प्रतिक्रमणं विज्ञेयं॥ अथ प्राभातिकमभिधीयते तत्रोह मिच्छा दुक्कडं
पणिवायदंडयं काउस्सग्गतियं करणं पुत्तियवंदण आलोयसुत्तवंदणयखामणयं तत्र भूमितलनिवेशितशिरः क
मलसकलनिशातिचाराणां मिच्छादुक्कडं कृत्वा प्रणिपातदंडकं शक्रस्तवमभिधायोत्थाय सामायिकादिसूत्रं भणि
त्वा चारित्रशुद्धिनिमित्तं कायोत्सर्गं करोति एकोद्योतकरचिंतनं कृत्वा पारयित्वा च दर्शनशुद्धिनिमित्तं लोगस्सउज्जोय

गं भणित्वा पुनः कायोत्सर्गं करोति तत्राप्येकमुद्योतकरं चिंतयति पारयित्वा ज्ञानविशुद्धिनिमित्तं पुक्खरवरदीत्ति
भणित्वा पुनः कायोत्सर्गं विधत्ते तत्र चातिचारान् चिंतयतीति कायोत्सर्गं चिंतयकरणं पारयित्वा सिद्धा
दिस्तुतिं पठित्वा उपविश्य मुखपोत्तिकां प्रत्युपेक्ष्य वंदनकमालोचनं कृत्वा उपविश्य नमस्कारपूर्वं
सामायिकादिसूत्रं वंदामि जिणे चउवीसं इति पर्यंतं भणित्वा वंदनकं ददाति ततस्तु खामणां कृत्वा वंदनाय गा
हात्रिपपाठो आसियस्स उस्सग्गो पुनिय वंदणानि पमोक्खु इति पच्चियवंदणाणि पुनर्वंदनकं आयरियउव
ए इत्यादि गाथात्रिकस्य पाठः ततः पूर्ववत् सामायिकादिसूत्रं भणित्वा षाण्मासिकतपश्चिंतनाय कायोत्सर्गं तत्र
त्र चायं चिंतयति संयमयोगानां हानिर्यथा न जायते तत्तपः प्रतिपद्येऽहमिति भावितमानसः श्रीमहावीरतीर्थे स्मिन् उ
त्कृष्टं तपः किल षण्मासान् यावत् दृष्टमुत्कृष्टं गणधरैः ततो जीव शक्नोषि त्वं संयमयोगानामबाधया
षाण्मासिकं तपः कर्तुमिति चिंतयति न शक्नोमीति परिभावयति एकदिनहीनां षण्मासान् शक्नोषि कर्तुं ए
कोनत्रिंशदादिहीनानि पंचमासान् क्षमसे न शक्नोमीति पूर्ववत् पुनर्व्याद्यादिदिनहीनानि यावदेकोनत्रिंशद्दिनहीनान्
षण्मासानिति एवं पंचमासान् चतुरस्त्रीन् द्वौ चैकादिदिनहीनान् चिंतयेदेकं च मासमेकादिदिनहीनं यावत्त्रयो

दशदिनहीनं ततश्चतुस्त्रिंशद्वात्रिंशादिकं हानिक्रमाच्चिंतयेद्यावत् चतुर्थं ततस्त्वाचाम्लनिर्विकृतिकपूर्वार्धमेका
सनादि नमस्कारसहितांतं यत्कर्तुं शक्नोति तन्मनसि धृत्वा कायोत्सर्गं पारयति चतुर्विंशतिस्तवं च भणित्वा उपविश्य
पोत्तिय त्ति मुखपोत्तिकां प्रत्युपेक्ष्य ततो वंदणंति वंदनकं दत्ते ततो नियमः प्रत्याख्यानं गुरु इति यत्ति ततः स्तुतित्रयं
प्रवर्द्धमानाक्षरस्वरं गोधिकादिसत्वोत्थापनपरिहारार्थमल्पस्वरेण भणति चिय वंदणानि ततश्चैत्यवंदनं विध
त्ते रात्रिप्रतिक्रमणे नवरं पढमो दंसणसुद्धीइ बीयउस्सग्गो सुयनाणस्स पंतइउ नवरं चिंतेइ तस्स इमं नव
रं केवलं प्रथमं उत्सर्गं चारित्रशुद्धिनिमित्तं दर्शनशुद्धिनिमित्तं च द्वितीयउत्सर्गे एकैकोद्योतकरं चिंतनं
श्रुतज्ञानस्य शुद्धिकृते तृतीये नवरं केवलं तत्रैव स्वमारांचिंतयति दृढाहत इणिसाइयारं चिंतइ चरिमम्मि किं
तवं काहमि छम्मासा एगदिणाइहाणि जा पोरिसि नमो वा ३ तृतीयउत्सर्गे निशातिचारांश्चिंतयति चरमे कायोत्सर्गे किं त
पः करिष्यामीति षण्मासान् एकदिनादिहान्या यावत्पोरुषीं नमो वेति नमस्कारसहितं वा यावच्चिंतयेदिति नवरं देव
सिकप्रतिक्रमणे प्रथमोत्सर्गे चारित्राचारः चिंत्यते द्वितीयादिकायोत्सर्गेषु चारित्रादिशुद्धिरूपः क्रियते प्राभातिकप्र
तिक्रमणे च किमिति वैपरीत्येनोत्सर्गकरणमिति चेदुच्यते प्राभातिकप्रतिक्रमणे प्रथमकायोत्सर्गे प्रबुद्धोऽप्यद्या

पिनिद्राघूर्णमानलोचनः किंचिदानम्रपूर्वपशरीरः सम्यग्न निशाति चाशानशेषानपि स्मर्तुंपरमतेन निद्राघूर्णि-
तत्वेन च परस्परयतीनां घट्टनादोषो भवति उत्सर्गानंतरं च कृतिकर्मादिके क्रियमाणे नास्खलितं संपद्यते चा-
रित्रदर्शनशुद्धिविधायिनोः कायोत्सर्गयोः कृतयोर्निद्रामुद्रयाचलेन योऽपगतामामालस्य चत्वारीरादपगते
सज्ञा[?]तपारवं मुखिनैव सम्यग्निशाति चाशाज्ञानशुद्धिहेतुं तृतीयोत्सर्गं स्मरति साधूनां परस्परघट्टनारस-
ति कृतिकर्मादिकं चास्खलितं यथा स्यादिति मनन्त्वः करोतीति प्रथमतः प्राभातिकप्रतिक्रमणे चारित्रशुद्ध्या-
दिकायोत्सर्गः पश्चादिति चाऽकायोत्सर्गइतिधराङ्कः समयवादिनः निद्रासत्त्वेनिंसारइन्दुरयारे कायघट्टनानोन्ने
किरकरणे दोषाभावो गोमा इंतिलिन्नउस्सग्गा ॥ इति प्राभातिकप्रतिक्रमणविधिः ॥ इदानीं पाक्षिकप्रतिक्रम-
णमाह मुहपोत्तीवंदणयं संबुद्धाखामणं तह आलोयवंदणयपत्तेयखामणाणि वंदणयसुत्तं च ॥ सुत्तं अब्भुट्ठाणं
उस्सग्गो पुत्तिवंदणं तह य पज्जंतेखामणायं एहविही पक्खपडिक्कमणे ॥ ८५ ॥ तत्र चतुर्दशीपर्वणि दैवसिकप्र- ५६
तिक्रमणे तिविहेणपडिक्कंतो वंदामि जिणे चउवीसं इत्येतदंतं विधाय दैवसिकआलोचना इयं पडिक्कंतं इच्छाका-
रेण संदिसह पक्खियमुहपत्ती पडिलेहेमि इति भणित्वा क्षमाश्रमणं दत्त्वा मुहपोत्तिकां प्रत्युपेक्षते

तदनु वंदनकं ददति ततः संबुद्धानां गीतार्थानां पंचानां सप्तानां क्षामणकं विदधते तथेति समुच्चये ततश्चालोचनं कुर्वं-
ति ततश्च गुरुश्चतुर्थं दत्ते चातुर्मासिके संवत्सरे षष्ठाष्टमे ततः पुनर्वंदनकं ततः प्रत्येकं यतीनां क्षामणानि
कुर्वंति ततः पुनर्वंदनकं ततः पाक्षिकसूत्रं विशालपट्टाधिके गुरुनिरोधाद्दृढस्थितो भणत्येकः शेषास्तूर्ध्वं-
स्थिता गौरवविकथादिरहिताः शृण्वंति यदि च बालवृद्धादयो वा तावतीं वेलामूर्ध्वस्थितान शक्नुवंति स्थातुं त-
दा क्षमाश्रमणं दत्त्वा गुरुननुज्ञाप्योपविश्य निद्रादिरहिताः संवेगमानशुभभावाः शृण्वंति सूत्रसमाप्तौ पुन-
रपि विशेषप्रतिक्रमणसूत्रं भणंति ततोऽभ्युत्थानं कृत्वा सामायिकादिसूत्रं च भणित्वा द्वादशोद्योतकरचिंतन-
मुत्सर्गं कुर्वंति पारयित्वा च पोत्तिं मुखपोत्तिकाप्रत्युपेक्षणं ततो वंदनकं च तथा चेति समुच्चये वंदनकप-
र्यंते क्षामणानि पंच कुर्वंतीति पाक्षिकप्रतिक्रमणविधिः । चातुर्मासिके वार्षिकेपि च प्रतिक्रमणेऽय-
मेव विधिः केवलमत्र सप्त सप्त संबुद्धक्षामणानि क्रियंते महत्ति च चातुर्मासिके कायोत्सर्गे विंशतिरुद्योताश्चिं-
त्यंते वार्षिके चत्वारिंशदेको नमस्कारश्चेति तदनुपूर्वं प्रतिक्रांतदैवसिका एव प्रतिक्रमणं कुर्वंति पा-
क्षिकादिषु च श्रुतदेवताकायोत्सर्गस्थाने भुवनदेवताकायोत्सर्गः क्रियते ननु दैवसिकप्रतिक्रमण

प्र॰सा॰ह॰ ४७ दिवसिकेपंत चतुर्विंशतिस्तवाश्चिंतनीया इति तत्राह चत्तारिथदो२ दुवालस१२ वीसं२० चत्ताय४० होतिउज्जोया देसिय१ ४ पक्खियस्स
पराइय२ चाउमासेय४ वरिसेय५ ॥१८६॥ चत्तारो द्वौ द्वादश विंशतिश्चत्वारिंशत् चसमुच्चये भवंत्युद्योता लोकस्योद्यो
तकरा दैवसिके रात्रिके पाक्षिके चातुर्मासिके वार्षिके च प्रतिक्रमणे यथासंख्यं चिंत्यंते चंदेसु निम्मलयराइत्ये
तदंताइति नवशतानिशंदे दैवसिकादिप्रतिक्रमणे कायोत्सर्गे ये तावंतउद्योताश्चिंत्यंते इति परमेषु चतुर्ण
दिवसु चंदेसु निम्मलयराइत्येतदंतेषु लोगस्सोद्योतकरेषु चिंत्यमानेषु कियंतः श्लोका भवंतीत्याह पणवीस२५
अद्धतेरस सिलोगपन्नत्तरीयबोधव्वा सयमेगं पन्नवीसं १२५ बेबावन्नाय २५२ वरिसंमि ॥१८७॥ दैवसिक
प्रतिक्रमणे लोकस्योद्योतकरचतुष्टये चिंत्यमाने पंचविंशतिः श्लोका भवंति विद्वच्छाद्धयागापादपोपिश्लो
काभणपतेनचैकस्मिन्नुद्योतकरे षट्श्लोकास्ते चतुर्गुणाः चतुर्विंशतिः एकश्च पादश्चतुर्गुणः एकश्लोक इ
तिमिलिताः पंचविंशतिश्लोकाः प्राभातिकेप्रतिक्रमणे उद्योतकरद्वये तस्मिंश्चिंत्यमाने द्वादशश्लोकाः ४७
श्लोकार्द्धंच षट्द्विगुणा द्वादश अर्द्धं द्विगुणस्तदर्द्धं भवसतोर्द्धत्रयोदश इति सिलोगपन्नत्तरी यत्ति श्लोका
नां पंचसप्ततिः पाक्षिकप्रतिक्रमणे उद्योतेषु द्वादशोद्योतेषु चिंत्यमानेषु यतो द्वादशो षट्गुणाः सप्ततिः पादश्च षु

द्वादशगुणितः श्लोकत्रयं मिलिताश्च पंचसप्ततिर्बोद्धव्याः सयमेगं पन्नवीसंति चातुर्मासिके प्रतिक्रमणे विं
शतिलोकोद्योतकरे पंचविंशः श्लोकशतं भवति यतो विंशतिः षड्भिर्गुणिता विंशत्यधिकशतं पादश्च विंशत्या तो च पंचश्लोका त्यधिकं
कं॰ मिलिताः पंचविंशत्यधिकशतमिति बेबावन्नायवरिसंमित्ति द्विपंचाशदधिकश्लोकानां वार्षिकप्रतिक्रम
णकायोत्सर्गे चत्वारिंशदुद्योतकराणां मध्ये त्वास्तनमस्कारस्य चिंतने भवतः चत्वारिंशत् षड्भिर्गुणिते पाद
चत्वारिंशतिश्च श्लोकदशकरूपा यां स्थितिनामपां द्विशते भवतो भवतः नमस्कारस्य चाष्टौ चिंतने द्वौ
श्लोकौ मिलिताश्च द्वेशते द्विपंचाशदधिकेभवति ननु कस्मिन्कायोत्सर्गे कियंतः पादाभवंतीत्याह सायस
यंगोसद्धं तिन्निवसयाइ हवंति पक्खंमि १ पंचसयचाउम्मासे ५०० वरिसे पयसअठोत्तरसहस्सं १००८ ॥१८८॥ साये
त्यत्रानुस्वारलोपः प्राकृतत्वात् कृतस्ततः सायं संध्यायां प्रतिक्रमणे शतंपादानां तत्र श्लोकस्य चतुःपादरूप
पदानां॰ त्वात्पंचविंशतिश्लोकानां चतुर्भिर्गुणने शतं पादानां भवति गोसन्निप्राभातिकोद्योतकरद्वये र्द्धशतंस्भव
ति पादानां पंचाशदित्यर्थः तिन्निवत्तपन्निपाक्षिकप्रतिक्रमणकायोत्सर्गे द्वादशोद्योतकराणां शतत्रयं भव
ति द्वादशानां पंचविंशत्या गुणने शतत्रयसंभवादिति पंचसयचाउम्मासेत्ति चातुर्मासिकप्रतिक्रमणे द्योतक

प्र० सा० वृ०
४८

र विंशत्योच्छ्वासमानायां पंचविंशत्यानि पादानां भवंति विंशतेः पंचविंशत्या गुणने पंच शतसङ्ख्या वादिशिनीलेति या।
षिकप्रतिक्रमणे त्रयो द्योतकरत्वाच्चत्वारिंशतो नमस्कारस्य च चिंतने अष्टोत्तरशतं उच्छ्वासपादानां भवति चत्वारिंशतं पं
चविंशत्या गुणने सहस्रं स्यात् नमस्कारस्य चाष्टपदरूपत्वाच्चेति पदशेषेणाच्च पादे एवं तत्तानयः प्राकृतत्वेन
रूपस्य करणं तथा पादस्यैवायं पर्यायः इह पर्यायो तेपति ननु कथं प्रतिक्रमणे क्रियं निःप्रमणकानि भवंतीत्याह
दैवसिकचातुर्मासिकसांवत्सरिकेषु प्रतिक्रमणेषु गुणस्थानेषु मतीति लिखितं तथाऽपं च मतं कमा ८८ इह दैवसि
करात्रिकपाक्षिकपोरपि ग्रहणं तुल्यवक्तव्यत्वात् ततो दैवसिकरात्रिकपाक्षिकेषु चातुर्मासिकेसां
वत्सरिके च पर्वणि प्रतिक्रमणमध्ये प्रतिक्रमणे क्रियमाणे मुनयः साधवः क्षम्यंते त्रयः पंच सप्त च क्रमा
त् यथासंख्येन सर्वे अयमभिप्रायो दैवसिकरात्रिकयोस्त्रयः साधवः क्षम्यंते पाक्षिकेपि त्रयः प्रकृतमावश्य
कृतौ पाक्षिकप्रतिक्रमणप्रस्तावे एवं जहन्नेणं तिन्नि उक्कोसेणं सव्वे त्ति चतुर्मासिके पंच सांवत्सरिके सप्त ४८
ति दृष्टा मा चाति दैवसिकरात्रिकयोस्त्रयः पाक्षिके पंच चतुर्मासिके सांवत्सरिकयोस्तु सप्त प्रकृते पाक्षिक
इत्येषा संबुद्धसमाप्तवे एवं जहन्नेणं तिन्नि वा पंच वा चाउम्मासिए संवच्छरिए पण उक्कोसेणं तिसु विगणेसु सव्वे

त्वामिच्छामि त्ति चतुर्थं प्रत्याख्यानद्वारमिदानीं तत्र च प्रतीति अविरतिस्वरूपप्रवृत्तिप्रतिकूलतया आमर्यादया।
आकारकरणस्वरूपतया आख्यानं कथनं प्रत्याख्यानं तच्च द्विधा मूलगुणरूपमुत्तरगुणरूपं च मूलगुणा यतीनां पं
च महाव्रतानि श्रावकाणामणुव्रतानि उत्तरगुणास्तु यतीनां पिंडविशुद्ध्यादयः श्रावकाणां तु गुणव्रतशिक्षा
व्रतानि मूलगुणानां हि प्रत्याख्यानत्वं हिंसादिनिवृत्तिरूपत्वात् उत्तरगुणानां तु पिंडविशुद्ध्यादीनां दिग्व्रतादीनां
च प्रतिपक्षनिवृत्तिरूपत्वात् तत्र च सप्तपंक तत्प्रत्याख्यानकाले विनयपुरस्सरं सम्यगुपयुक्तः श्रीगुरुवचनमनूच्चा
न प्रत्याख्यानं कुरुते तत्र च प्रत्याख्याने चतुर्भंगी यथा स्वयं प्रत्याख्यानस्वरूपं जानन् तत्स्यैव गुरोः पार्श्वे करोति।
इति प्रथमो भंगः गुरोर्ज्ञस्य स्वयमजानन् करोतीति द्वितीयः शिष्यस्त्वज्ञो गुरोरज्ञत्वे तृतीयः गुरोरज्ञत्वे शिष्य
स्य चाज्ञत्वे चतुर्थः न चेदं स्वमनीषिकया वोच्यते सिद्धांतेभिहितत्वात् यदाह जाणगो जाणगसगासे अजाण
गो जाणगसगासे जाणगो अजाणगसगासे अजाणगो अजाणगसगासे इत्यादि तत्र प्रथमो भंगः शुद्धो द्वि
तीयोऽपि गुरोः शिष्यबोधकत्वात् तृतीयोऽपि शुद्धो यदा गुरुरजानानः स्वयमजानानं शिष्यं संक्षेपतो बोधयित्वा प्र
त्याख्यानं कारयति अन्यथा त्वशुद्ध एवं तुर्योऽप्यशुद्धः परमेषोऽपि तथाविधगुरोरभावे गुरुबहुमानात् गुरोः सं

प्र॰ सा॰ वृ॰ वेधिनेपि नत्वमातुलकमत्र तच्छिष्यादिकमेनमपि मा स्विरणं कृत्वा मदाप्रसादभावि तदाशु इत्यनुपेक्ष्य अत एवं

४९ ति ततोऽनागतप्रत्याख्यानं प्रतिदिनोपयोगित्वेन तावद्दशधा तदाह भाविअ अइयंत कोडीसहियं

३ नियंटियं च ४ सागारं ५ अणागारं ६ परिमाणकडं ७ निरवसेसं ८ संकेयं ९ अद्धाए १० भाविन्यनागते अतीते पूर्वकाल

करणीयं कोटिसहिते चः समुच्चये नियंत्रिते च पूर्ववत् साकारं सहाकारैर्यद्वर्त्तते विगताकारमाकाररहितं परिमाणव

४ साकेयं च तन्निरवशेषं समस्तमकं च ९ अद्धा पच्चक्खाणं चरमं समये साकेयं अट्ठहा होइ अद्धापदं दसहा भवे ९१ साकेतं च कृतं संके

तेन वर्त्तत इति सांकेतप्रत्याख्यानं दशमकमिति तत्र प्रस्तुतं केतनप्रत्याख्यानं तच्चाष्टधा भवति पश्चादद्धाप्रत्याख्यानं तद् दश

धा भवेदिति गाथासंक्षेपार्थः इदानीं मूलतोऽपि सर्वाणि प्रत्याख्यानानि क्रमेण व्याख्यायंते तत्र भाविप्रत्याख्यानस्य

स्वरूपमिदं होही पज्जोसवणा इत्तस्य अंतरा वेद्धकाउं मे गुरुगणगिलाणसिस्सगतवस्सिकज्जोवलत्तेणं ९२ इयचिं ४९

तिय पुव्विं जो कुणइ तवं तं अणागयं बिंति तमइक्कंतं तेणो य हेउणा तवइ जं उद्धं भविष्यति पर्युषणादिपर्व तत्र चाष्टमा

दितपः समाराधनीयं तत्र पर्युषणादौ न तपो मया प्रभवेत् कथं मे ममकेन हेतुनेत्याह गुरुगणेति गुरवश्चाचार्या गण

गणस्य गच्छस्य ग्लानस्य रोगाभिभूतस्य शैक्षकस्य नूतनप्रव्रजितस्य तपस्विनोऽष्टमादितपश्चारिणः कार्ये प्रयोजने

वि

विश्रामणाभक्तपानानयनादिलक्षणं तेन यदाकुलत्वं तेन हेतुना इति चिंतयित्वा पूर्वमेव पर्युषणादिपर्वणोर्वा

गेव यत् क्रियते तदनागतं तप इति ब्रुवंति जिनाः अतीते पुनरिदं तमइक्कंतमिति गाथापोत्तरार्द्धं तत्र अतिक्रांतमतीतमि

त्यर्थः तेनैव हेतुना गुरुगणादिकार्यव्याकुलतालक्षणेन यत्पश्चात् तपः करोति पर्युषणादिपर्वण्यतिक्रांतेपी

त्यर्थः कोटीसहितमाह गोसे अभत्तट्ठं काउं तं कुणइ बीयगोसेवि इय कोडीदुगमिलणे कोडीसहियं तु नामा

णं ९४ गोसेत्ति प्रभाते अभक्तार्थमुपवासं तपः कृत्वा तमुपवासं करोति द्वितीयप्रभातेपि इति कोटीद्विकमिलने पूर्व

दिनकृतोपवासप्रत्याख्याननिष्ठापनालक्षणायां द्वितीयदिनप्रभातक्रियमाणोपवासप्रत्यर्पणालक्षणाया

श्च कोट्योर्मिलने तत्कोटीसहितमिति नामाप्रत्याख्यानमेवमष्टमादिष्वपि कर्तव्यं कोटिद्वयं निष्ठापनारूपमंत

श्चरतीयोपवासस्य प्रस्थापनेरूपमनयोर्मिलने तस्य कोटीसहितमेवमाचाम्लनिर्विकृतिकैकासनैकस्था

नेष्वपीति यदाहुरन्ये प्राग्वतः पट्ठवणओ य दिवसो पच्चक्खाणस्स निट्ठवणओ य जहियं समिंति दोन्निवि तं भन्नइ को

डिसहियंति इदानीं नियंत्रितमाह हट्ठेण गिलाणेण व अमुगतवो अमुगदिणंमि नियमेण कायव्वोत्ति नि

यंटियपच्चक्खाणं जिणा विंति ९५ हृष्टेन नीरोगेण ग्लानेन वा सरोगेण अमुकं तपः षष्ठाष्टमादि अमुकस्मिन्

प्र·सू·वृ·
५०

दिने नियमेन निश्चयेन समयेति शेषः कायव्वोत्ति कर्तव्यं प्राकृतत्वात् पुंस्त्वनिर्देशो नियंत्रितमिदं प्रत्याख्यानं।
जिनाद्युक्तेरिदं च प्रत्याख्यानं न सर्वकाले क्रियते किं तर्हि निरूपितकालमेव तथा चाह चउदसपुव्विसु जिणकप्पि
एसु पढमंमि चेव संघयणे एयं वोच्छिन्नं चिय थेरावि तया करेसीय ४८ चतुर्दशपूर्विषु चतुर्दशपूर्वधरेषु जिन
कल्पिकेषु प्रथमे एव संहनने वज्रऋषभनाराचाभिधे एतन्नियंत्रितप्रत्याख्यानं व्यवच्छिन्नमेवाचाह ननु तस्मि
न्नपि काले चतुर्दशपूर्वधरादय एव कृतवंतः न स्थविरास्तु न कृतमेवेत्याह स्थविरा अपि तया करेसीय स्थविरा अ
पि तदा पूर्वधरादिकाले अकार्षुः चशब्दस्येह संबंधः अथ साकारमिदानीमाह महत्तरया
गारेहिं आगारेहिं छन्नं तु आगारं आगारविरहियं पुण भणियं अणागारं नाम तंति किं तु अणाभोगा सहसागारे य
दुन्नि भणियाइ तंजेण तिणाइ वि विवइ मुहंमि निविडं अणाकुरवि २९ महत्तरयागारा मिसेस आगारा रहियमणाग
रं अपर्यापदायामपीदाव्याख्यानं मित्ति संप्रेषित्रियते विधीयते तेरूप्साकारं अनाभोगसहसाकारमहत्तराकारादयः अयं
महा नयमनयोर्निज्ञायेन महान्महत्तरो निज्ञायेत तं महत्तराविति महत्तराकारं वा कारेण महत्तराकारः सह आ
दिभिर्वर्त्तते वर्तते साकारा अन्न तेयुक्तं साकारमभिधीयते कोऽर्थो भुजिक्रियामसाख्यातेनमपा निषिद्धामपरमेव महत्तरा

आकारादिभिर्हेतुभूतैरेतेभ्योन्यत्र सर्वैः एतेषु सत्सु भुजिक्रियामपि कुर्वन्तो न भंगस्ति यत्र मध्यपीत्यागं करोति तत्साका
कारमिति अनाकारमिदानीमाह अनाकारंत्यादि आकारैर्महत्तरादिभिर्विरहितं पुनर्भणितमनाकारं नाम तत्र
किं केवलमिह अनाकारेपि अनाभोगसहसाकारश्च द्वावाकारौ भणितसौ येन कदाचिदनाभोगतोः त्तानतः सहसा
गारस्पर्शेन तृणादेर्मुखे क्षिप्ते निपतेद्वा कुलादिकस्पमपि तिकृतानाकारहितमपि शेषैर्महत्तराकारादिभिराकारैर
हितमनाकारमभिधीयते इदं चानाकारं कदा विधीयते अत्राह दुर्भिक्षवित्तिकैतार गाढरोगाइएक रुज्जादुर्भिक्षे
दुष्कालं व भावे हिंडमानैरपि अन्नपानं न लभ्यते तत इदं प्रत्याख्यानं कृत्वा म्रियते वृत्तिकांतारे वा वर्तने शरीरप
यास्यावृत्तिर्भिक्षादिकातद्विषये कांतारमिव कांतारं तद्रूपपारप्यो भिक्षा न लभ्यते तत इदं प्रत्याख्यानं कृत्वा।
म्रियते वृत्तिकांतारे वा व्याघ्रादिषु स्वभावाद्दुष्टान्तर्हिंसाकारिषु प्राप्तनदीर्दैशे बाधितेषु भिक्षादि
तत नासाध्यते तदेवं प्रत्याख्यानं तथा वेदनीयप्रतिविधेयगाढतरो रोगे सति आदिग्रहणात्कांतारे केसरिकिशोरादिन
समानाया मापरिक्षणपीति परिमाणकृतमिदानीमाह ॥ दत्तीहिव कवलेहिव घरेहिं भिक्खाहिं अहव दव्वेहिं जो भ
त्तपरिच्चायं करेइ परिमाणकडमेयं ५० दत्तिभिर्वा कवलैर्वा गृहैर्वा भिक्षाभिर्वा अथवा द्रव्यैर्यो भक्तपरित्यागं करोति

परिमाणकृतमेतत् ततः कार्पासास्थ्यादिभ्योऽवच्छिन्नधारया पतति भिक्षा यावन्मात्रा दत्तिरभिधीयते भिक्षाविच्छेदे च
द्वितीया दत्तिरेवं सिक्थमात्रेऽपि पतति भिक्षा वदत्तिरिति कुक्कुटाण्डकप्रमाणो वा ग्रासः ज्ञानपिरः कवलोऽभिधीयते अ
विकृतेन मुखेन मुखे च वा यो ग्रहीतुं शक्यते तत्प्रमाणो वा तत्र द्वात्रिंशत्कवलाः किल पुरुषस्याहारः स्त्रीणामष्टा
विंशतिः बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ पुरिसस्स महिलियाए अठावीसं भवे कवला इति वचना
त् ततश्च दत्तिभिरेकद्व्यादिभिः कवलैश्च एकद्व्यादिभिर्यावदेकत्रिंशता पुरुषस्य स्त्रियाश्च यावत्सप्तविंश
त्या गृहैश्चैकद्व्यादिभिः सप्ताभिः समस्तशादिभिः गृहस्थेन दीयमानादिभिरेकद्व्यादिभिर्द्रव्यैश्च पायसमुद्गादि
भिर्यत्तु शेषाहारपरित्यागस्तत्परिमाणकृतं प्रत्याख्यानमित्यर्थः इदानीं निरवशेषमाह सव्वं असणं सव्वं च पाणगं
खाइमं पिज्जविहं पि वोसिरइ सव्वभावेणं एयं भणियं निरवसेसं तत्राशनं भोजने अपूपतण्डुलशालिमोदनमण्डकमोदक
खज्जकादि पीयत इति पानं कर्मणि ल्युट् खर्जूरद्राक्षापानादि खाद्यं खादिमं भावे घञ् खादेन निर्वृत्तं खादिमं ५१
भागादिमणिनिति इमं निखादिमं नालिकेरफलकादि गुडधानादिकं च स्वादनं स्वादः स्वादेन निर्वृत्तं तत्पेयमनिस्वादिमं
मेलाफलकर्पूरलवंगपूगीफलहरीतकीनागरादि ततश्च सर्वमशनं सर्वपानकं खादिमं च सर्वमपि उत्सृजति प

रिसृजति खादिममपि सर्वं यत् निरवशेषं तद्भवेदयमपि साकेतमितिदानीमाह केयं गिहं तिसहतेणं चेव तेसि
अथवा केतं मिमं तु साकेयं विंधं सकेयमिवाङ्गुष्ठाकेपर्वकितनिवासं स्वस्य धातोः किलतेऽभनेः स्मिन्निति घञि केतो गृह अ
मुच्यते सह केतेन वर्त्तते इति सकेतस्य प्रमादेः साकेतागृहस्थालेषामिदं साकेरमिति साकेतं प्रत्याख्यानं प्राये
ण गृहस्थानामेवेदं भवतीति अथवा केतं चिह्नमंगुष्ठसहकेतेन चिह्नेन वर्त्तते सकेतं सकेतमेवं प्रज्ञादित्वा
त्स्वार्थे अणि साकेतं तस्मादंगुष्ठमुष्टिग्रन्थ्यादि भवति यथा कश्चित्कोऽपि पौरुष्यादिप्रत्याख्यानं कृत्वा क्षेत्रादौ गतो गृहे वा
तिष्ठन् पूर्णेऽपि पौरुष्यादिप्रत्याख्याने यावदद्यापि भोजनसामग्री न भवति तावत् क्षणमपि प्रत्याख्यानरहि
तो माभूवमिति संग्रहणार्थं चिह्नं करोति यावदंगुष्ठमुष्टिं ग्रन्थिं वा न मुञ्चामि गृहं वा न प्रविशामि स्वेदविन्दवो वा न
शुष्यन्ति यावदेतावन्तो वा उच्छ्वासा न भवन्ति जलादिमचिकादयो यावदेते जलबिन्दवो न शुष्यन्ति दीपो वा यावन्न
निर्वाति तावन्न भुञ्जेऽहमिति एतदाह अंगुट्ठमुट्ठिगंठीघरसेउस्सासथिबुगजोइक्खे पच्चक्खाणविचाले किं ठमभिग्ग
हमभिग्रहेसु विय अंगुष्ठश्च ग्रन्थिश्च मुष्टिश्च गृहं च स्वेदश्च उच्छ्वासश्च स्तिबुकश्च ज्योतिष्कश्चेति समाहारो द्वन्द्वः जोइक्खे त्ति दीपश्च
देशपारिपक्वत्वे तद्विषये क्रियाप्रवर्त्तमप्रत्याख्यानं विचाले कृत्वमिदमभिग्रहेसु यतन्ति केनचित्सो

रूप्यादिनकृतं किंतु केवल एवाभिग्रहः क्रियते यावद्रूप्यादिकं न छोटयतीत्यादि तच्चापीदं भवतिरत्नपर्य्यः तथा सा
धोरपीदं भवति यथा यापि गुरवो मंडल्यां नो प्रविशंति अमद्रूपसागारिकादिकं किंचित्कारणमजनि ततः पूर्वमपि
प्रत्याख्यानावधेः प्रत्याख्यानरहितो मा भूवमिति संगुष्ठादीनि साधुः श्रावकश्चेति इदानीमद्धाप्रत्याख्यानमाह अद्धा
कालो तस्स य पमाणं मद्धं जं भवे तमिह अद्धापच्चक्खाणं दसमं तु पुणइमं भणियं ॥ १० ॥ अद्धाशब्देन कालस्ता
वदभिधीयते तस्य च कालस्य मुहूर्तपौरुष्यादिकं यत्प्रमाणमप्रचपाणान् अद्धावदतीति शेषः तु शब्दो अपर्याप्तमिव
न्नमेव यत्प्रत्याख्याने योजितं एवं ततो अद्धापरिमाणापरिच्छिन्नं भवेत् तदिह अद्धाप्रत्याख्याने दशमं पूर्वोक्तमाज्ञप्ती
त प्रत्याख्यानादीनां चाभिमतः पर्यः तत्पुनरिदं दसमं भणितं गणधरैरिति तदेवाह नवकारपोरिसीए पुरिमड्ढ
एकासणेकढाणे य आयंबिलभत्तट्ठे य चरिमे य अभिग्गहे विगई ॥ ११ ॥ अत्र भीमसेनसमायेन नमस्कारशब्देनात्र नमस
स्कारसहितं गृह्यते ततः [illegible] नमस्कारसहितं च पौरुषी च नमस्कारपौरुष्यौ तस्मिन् नमस्कारविष ५२
ये पौरुषीविषये चेत्यर्थः पूर्वार्द्धे च एकासनं च एकस्थानं चेति समाहारे समस्येकवचनं पूर्वार्द्धविषये एकासनविष
ये एकस्थानविषये च तथा आचामाम्ले च अभक्तार्थे च आचामाम्लाभक्तार्थं तच्चाचामाम्लविषये अभक्तार्थ

विषये तथा चरिमे चरमसमये भवचरमे दिवसचरमे चेति तथा अभिग्रहे अभिग्रहविषये तथा विगतिविकृति
विषये समस्येकवचनं लुप्तसप्तम्यर्थमिति दशभेदमिदमद्धाप्रत्याख्यानं नवकारसहितप्रत्याख्यानं कथमद्धा
प्रत्याख्यानं न सूत्रकालनियमः श्रूयते सत्यमद्धाप्रत्याख्यानपूर्वाणि प्रायेणोक्तानि नादीनि क्रियंते इदमद्धाप्रत्या
ख्यानत्वेन भण्यते इति प्रत्याख्यानं चापवादरूपाकारसहितं कर्त्तव्यमन्यथा भंग एव स्यात् तत्र यावंतो नम
स्कारसहितादिषु भवंति तावंत उपदर्शयन्नाह दो चेव नमोक्कारे आगारा छच्च पोरिसीए उ सत्तेव य पुरिमड्ढे ८४
एक्कासणगंमि अट्ठेव ॥ सत्तेगट्ठाणस्स उ अट्ठेव य अंबिलंमि आगारा पंचेव अभत्तट्ठे छप्पाणे चरिमे चत्तारि ८
पंच चउरो अभिग्गहे निव्वीए अट्ठ नव य आगारा अप्पाउरणे पंच उ हवंति सेसेसु चत्तारि ॥ २ ॥ द्वावेव नमस्कारे नम
स्कारसहिते आकारौ विधीयेते प्रत्याख्यानापवादरूपौ षट्च पौरुष्यां तु पुनरर्थः सप्तैव च पूर्वार्द्धे एकासनके अ
ष्टैव सप्त एकस्थानकस्य प्रत्याख्यानस्य तु सप्त चाष्टौ वा चाम्ले आकाराः पंचैवाभक्तार्थे उपवासे षट्
पानकप्रत्याख्याने चरिमे प्रत्याख्याने दिवसचरिमभवचरिमरूपभेदद्वयरूपे भवंति आकाराः पंच चत्वारो वा अभि
ग्रहे प्रत्याख्याने निर्विकृतिके अष्टौ नव च आकाराः पंच चत्वारो अभिग्रहे त्रिप्रयुक्तः तत्स्वयमेव विज्ञेया इति अपावर

रणेसादि अप्रावरणाभिग्रहे प्रत्याख्याने पंचैव चत्वारः सप्तावधारणार्थत्वात् भवंति शेषेष्वभिग्रहेषु दंडकासि
कादिषु दंडप्रमार्जनादिषु च चत्वार आकारा इति गाथार्थः एषो भावार्थस्तु निवेद्यते नमस्कारसहिते प्रत्याख्या
नभंगपरिहारार्थं अनाभोगसहसाकारलक्षणौ द्वावाकारौ ज्ञेयौ तत्र कालस्यापूर्यमाणत्वात् संकेतप्रत्या
ख्यानमिदं प्रतिभासितं तत्कथं मुहूर्तप्रत्याख्यानमभिधीयते सहितशब्देन मुहूर्तस्य विशेषितत्वात् दोषः अ
थ मुहूर्त्तशब्दोपि न श्रूयते तत्कथं तस्य विशेष्यत्वं न खलु गगनारविंदेः सस्वमेदामोदसुंदरमिदमित्यादीनि
विशेषणानि तस्य सहृदयैर्विधीयंते अत्रोच्यते अद्धाप्रत्याख्यानमध्ये तावदस्य पाठात् पौरुषीप्रत्याख्यानस्य
च चरमाणत्वान्निश्चितं तत्पूर्वांगमुहूर्त्तमेवावशिष्यते ततस्तस्य विशेष्यत्वेनानुपपन्नमपर्यं मुहूर्त्तं द्व्यादिकमपि
कस्मान्न लभ्यते यदेकमेव मुहूर्त्तं विशेष्यतया लभ्यते अल्पाकारत्वादस्य पौरुष्यां हि षडाकाराः अस्मिंश्च प्रत्या
ख्याने आकारद्वयवति स्वल्पएवकालो ग्रहिष्यते स च नमस्कारसहितः पूर्णेपि काले नमस्कारपाठमंतरेण प्रत्या ५३
ख्यानस्यापूर्यमाणत्वात् तस्मादपि च नमस्कारपाठे मुहूर्त्ताभ्यंतरे प्रत्याख्यानभंगस्ततः सिद्धमेतत् मुहूर्त्तमात्रकाले
नमस्कारसहितं प्रत्याख्यानमिति अत्र च प्रथम एव मुहूर्त्त इति कुतो लभ्यते उच्यते सूत्र सूरेउग्गए इति वचनमात्रा

त्पौरुषीप्रत्याख्यानवत् सूत्रं चेदं सूरे उग्गए नमोक्कारसहियं पच्चक्खाइ चउव्विहंपि आहारं असणं ४ अन्न
त्थणाभोगेणं सहसागारेणं वोसिरइ अस्य च सूत्रस्याग्रेतनपौरुष्यादिसूत्राणां च विस्तरवती व्याख्या तत्स्थानादे
वगंतव्या यावन्नोच्चारणं स्वरूपपरिज्ञानाय किंचिद्व्याख्यायते सूर्ये उद्गते सूर्योद्गमादारभ्येत्यर्थः नमस्कारेण
पंचपरमेष्ठिस्तवेन सहितं प्रत्याख्याति सर्वे धातवः करोत्यर्थे न आप्नाइ इति भाष्यकारवचनान्नमस्कारसहि
तं प्रत्याख्यानं करोति इदं गुरोर्वचनं शिष्यस्तु प्रत्याख्यामीति वदति एवं व्युत्सृजतीत्यत्रापि पाठाक्षेपः प्रत्या
ख्याति तत्राह चतुर्विधमपि न पुनरेकविधादिकं आहारमभ्यवहार्यं वस्तु तत्तीत्युत्तरेण संबंधः इदं च चतुर्वि
धाहारस्य भवतीति वृद्धसंप्रदायो रात्रिभोजनप्रत्याख्यानवतो रोगकृत्वात्तस्या नमस्कारविना आहार
चातुर्विध्यकीर्तनं अत्र नियमभंगभयादाकारानाह अन्नत्थणाभोगेणं सहसागारेणंति अत्र पंचम्यर्थे तृती
या अन्यत्रानाभोगात् सहसाकाराच्च एतौ वर्जयित्वेत्यर्थः तत्रानाभोगोत्यंतविस्मृतिः सहसाकारोतिप्रवृत्तियोगा
निवर्तनं व्युत्सृजति परिहरति तथा पौरुष्यां षडाकारास्तत्रैवं सूत्रं पोरिसिं पच्चक्खाइ उग्गए सूरे चउव्विहंपि आ
हारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणे

प्र॰ सा॰ वृ॰
५४

णं सव्वसमाहिवत्तियागारेणं वोसिरइ पुरिमड्ढप्रत्याख्यानस्य पौरुषीतुल्यत्वात् तस्मिन्नः कालोपि पौरुषीप्रहरस्यार्द्धं ता
प्रत्याख्याति अत्र च कालाभिग्रहो रस्य तत्संयोगे द्वितीया ततः पौरुषीयावत्प्रत्याख्यानं करोतीत्यर्थः एवमन्यत्रा
पि रूपं वा चतुर्विधमप्याहारमशनादिकमुत्सृजति अत्रानाभोगाद्याकारेष्वन्यत्रानाभोगसहसाकारौ पूर्वव
त् चापि प्रच्छन्नकालात् दिग्मोहात् साधुवचनात् सर्वसमाधिप्रत्ययाकारात् प्रच्छन्नता कालस्य घनतरघनाघ
नपटलेन विस्फुरद्रजसा गुरुतरगिरिणा वांतरितत्वात् दिवाकरेण तत्पिहिते तत्र पौरुषीं पूर्णां ज्ञात्वा भुंजानस्या
पूर्णायामपि पौरुष्यां न भंगः ज्ञात्वा तु अर्द्धभुक्ते नापि तत्रैव स्थातव्यं यावत् पौरुषी पूर्णा भवति पूर्णायां तत्पर
भोक्तव्यं न पूर्णा पौरुषीति ज्ञाते भुंजानस्य भंग एवेति दिग्मोहस्तु यदा पूर्वामपि पश्चिमेति जानाति तदा पूर्णाया
मपि पौरुष्यां भुंजानस्य न भंगः कृष्यमपि मोहापगमे तु पूर्ववत् अर्द्धभुक्ते नापि स्थातव्यं अन्यथा तु भंग एवेति तत्र पा ५४
साधुवचनं सद्भावात् पौरुषी साधिकं विप्रमकारं यातं तत् श्रुत्वा भुंजानस्य न भंगो भुंजाने तु ज्ञाते अन्येन वा केनापि
निवदिते तत्रैव स्थातव्यं तथा कृतपौरुषीप्रत्याख्यानस्य सहसा संजाततीव्रशूलादिदुःखतया समुत्पन्नयोरार्तरौद्र
ध्यानयोः सर्वथा निराशः सर्वसमाधिः प्रत्ययमस्य यत्कारणं स एवाकारः प्रत्याख्यानापवादः सर्वसमाधिप्रत्ययाकारस्ते

रुष्यामपूर्णायामप्यकस्मात् शूलादिमपायामुत्पन्नायां तदुपशमनायौषधपथ्यादिकं भुंजानस्य न प्रत्याख्या
नभंग इति भावः वैद्यादिर्वा कृत पौरुषीप्रत्याख्यानोऽस्य सम्यक् समाधिनिमित्तं यदा अपूर्णायामपि पौरुष्यां
भुंक्ते तदा न भंगः अर्द्धभुक्ते त्वातुरस्य समाधौ वा संजातस्य तत्रैव भोजनत्यागः सार्द्धपौरुषीप्रत्याख्यानं पौरुषीवद्व्या
ख्यं तस्य तदंतर्गतत्वादिति पूर्वार्द्धप्रत्याख्याने एवं सूत्रकारः सूरे उग्गए पुरिमड्ढं पच्चक्खाइ चउव्विहंपि आहारं
असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणे
णं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ अस्यार्थः पूर्वार्द्धस्य पुरिमड्ढमिति प्राकृतवचनेन पुरिमड्ढमि
ति भवति एवमन्यत्रापि ततः पूर्वं चित्तत अर्द्धं च पूर्वार्द्धं दिनस्याद्यप्रहरद्वयं प्रत्याख्याति पूर्वार्द्धप्रत्याख्यानं क
रोति तत्र षडाकाराः पूर्ववत् महत्तरागारेणेति महत् प्रत्याख्यानपालनवशाल्लभ्य निर्जरापेक्षया बृहत्तर
निर्जरालाभहेतुभूतपुरुषांतर साध्यपि चैत्यमशक्य ग्लानचैत्यसंघादिप्रयोजनं तदेवाकारः प्रत्याख्यानापवादो
महत्ता महत्तरागारस्तस्मादन्यत्रेति योगो यच्चात्र महत्तरागारस्याभिधानं नमस्कारसहितादौ तत्र कालस्याल्पत्वम्
सत्त्वेन महत्वं कारणमिति वृद्धा आचक्षते अपार्द्धप्रत्याख्यानमपि प्रहरत्रयपलस्य पूर्वार्द्धप्रत्याख्यानवद्व्याख्यानीयं

अथैकाशनप्रत्याख्यानं यथाऽष्टाकारास्तथा कथ्यंते तत्रेदं सूत्रं एकासणं पच्चक्खाइ तिविहंपि आहारं असणं
खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं सागारियागारेणं आउंटणपसारणेणं गुरुअब्भुट्ठाणेणं पा
रिट्ठावणिआगारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ एकं सकृद् अशनं भोजनं एकं वा आस
नं पुताचालनतो यत्र प्रत्याख्याने तदेकाशनमेकासनं वा प्राकृते द्वयोरपि एकासनमिति रूपं ततः प्रत्याख्याति ए
कासनप्रत्याख्यानं करोतीति यावत् अत्रैहाताद्यौ अमी वाकारौ पूर्ववत् सागारियागारेणं सह आगारेणागृहे
ण वर्त्तत इति सागारः स एव सागारिको गृहस्थः स एव आकारः प्रत्याख्यानापवादः सागारिकाकारः तस्मादन्यत्र
गृहस्थसमक्षं साधूनां भोक्तुमकल्पनं प्रवचनोपघातसंभवात् यत उक्तं छक्कायदयावंतोवि संजउ दुल्लहं कुण ७४
इ बोहिं आहारे नीहारे दुगुंछिए पिंडगहणे य ततस्तं भुंजानस्य यदि सागारिकः कश्चिदापतति स यदि चलस्तदा क्ष
णं प्रतीक्षते अथ स्थिरस्तदा स्वाध्यायादिव्याघातो मा भूदिति ततः स्थानादु(त्था)यापि अन्यत्र भुंजानस्यापि नैका न्य ५५
सनभंगः गृहस्थस्यापि येन दृष्टं भोजनं न जीर्यति तत्प्रमुखः सागारिको ज्ञातव्यः आउंटणपसारणेणंति आकुंच
नं जंघादेः संकोचनं प्रसारणं ततस्यैव जंघादेराकुंचितस्य ऋजुकरणं आकुंचनप्रसारणे तावन्सहिष्णुतया क्रियमा

णे किंचिदासनं चलतीति ततो नात्र प्रत्याख्यानं(भंगः) गुरुअब्भुट्ठाणेणंति गुरोरभ्युत्थानार्हस्याचार्यस्य प्राघूर्णकस्य वा
अभ्युत्थानं तन्मात्रे आसनत्यजने ततो नात्र गुरूणामभ्युत्थानार्हत्वादवश्यं भुंजानेनाप्यभ्युत्थानं कर्त्तव्यमिति न त
त्र प्रत्याख्यानभंगः पारिट्ठावणियागारेणंति परिस्थापनं सर्वथा त्यजनं प्रयोजनमस्य पारिष्ठापनकं तदेवाकारः
पारिष्ठापनिकाकारस्तस्मादन्यत्र तत्र हि त्यज्यमाने बहुदोषसंभवात् श्रीयमाणे चागमिकन्यायेन गुणसंभवा
द्गुर्वाज्ञया पुनर्भुंजानस्यापि न भंगो वोसिरइ व्युत्सृजत्येकासनमशनाद्याहारं च परीहरतीत्यर्थः एकस्थाने सप्ता
काराः भवंति तत्रेदं सूत्रं एगट्ठाणं पच्चक्खाइ इत्यादि एकासनवदाकुंचनप्रसारणाकारवर्ज्जं एकम
द्वितीयं स्थानमंगविन्यासरूपं यत्र तदेकस्थानप्रत्याख्यानं तत्र यथा भोजनकाले अंगोपांगं स्थापितं तस्मिं
स्तथा स्थित एव भोक्तव्यं मुखस्य हस्तस्य चाशक्यपरिहारत्वात् चलनं न प्रतिषिद्धमिति अथाचाम्लस्याष्टावाका
रास्तत्र सूत्रं आयंबिलं पच्चक्खाइ अन्नत्थणाभोगेणं सहसागारेणं लेवालेवेणं उक्खित्तविवेगेणं गिहत्थसंस
ट्ठेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ आचाम्लं आचामोऽवश्रावणं
अम्लं च चतुर्थो रसस्ताभ्यां निर्वृत्तमिति आचाम्लं एतच्च त्रिविधं उपाधिभेदात् तद्यथा ओदनकुल्माषान् सक्तूंश्च अधिकृ

प्र·सा·वृ· त्यभवति तत्प्रत्याख्याति आचामाम्लप्रत्याख्यानं करोतीत्यर्थः आयावेत्याश्याकाराःसप्तः पूर्ववत् लेवालेवेणंति लेपोभो
५६ जनभाजनस्य विकृत्यादिना आचामाम्लप्रत्याख्यातुरकल्पनीयेन लिप्तता तदेवं विकृत्यादिनालिप्तपूर्वस्य भोज
भाजनस्यापि हस्तादिना संलेखनतोऽलेपोऽलिप्तता ततश्च लेपश्चालेपश्च लेपालेपं तस्मादन्यत्र भाजने विकृत्या
द्यवयवसंभवेऽपि न भंग इत्यर्थः उक्खित्तविवेगेणंति शुष्कौदनादिभक्ते पतितं पूर्वमाचामाम्लप्रत्याख्यानवता
मयोग्यस्य द्रवविकृत्यादेर्द्रव्यस्य उत्क्षिप्तस्योद्धृतस्य विवेको निःशेषतया त्याग उक्खित्तविवेकस्तस्मादन्य
शेनाश त्र भोक्तव्यद्रव्यस्याभोक्तव्यस्य [illegible] स्पर्शेनापि न भंग इत्यर्थः यत्र त्वेवं न शक्यते तस्य भोजने
भंगः गिहत्थसंसट्ठेणंति गृहस्थस्य भक्तदायकस्य संबंधि करोटिकादिभाजनं विकृत्यादिद्रव्येणोपलिप्तं गृह
स्थसंसृष्टं तस्मादन्यत्र विकृत्यादिसंसृष्टभाजनेन हि दीयमानमभक्तमकल्पनीयद्रव्यमिश्रं भवति तद्भुंजानस्या ५६
पि न भंगः इत्यर्थो यद्यकल्प्यद्रव्यरसो बहुर्न ज्ञायत इति वोसिरइ अन्नाचामाम्लं व्युत्सृजति तथाभक्तार्थप्रत्या
काणसूत्रं सूरे उग्गए अभत्तट्ठं पच्चक्खाइ चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं
सहसागारेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ अस्यार्थः सूरेउग्गए इत्यादि प्राग्व

अनेन भोजनानंतरं प्रत्याख्यानस्य निषेधः इति ब्रूते भक्तेन भोजनेनार्थः प्रयोजनं भक्तार्थो न भक्तार्थोऽभक्तार्थः अ
पवासो विद्यते भक्तार्थो यस्मिन् प्रत्याख्यानविशेषे सोऽभक्तार्थः उपवास इत्यर्थः आकाराः पूर्ववत् नवरं पारिट्ठावणि
याकारे विशेषो यदि त्रिविधाहारस्य प्रत्याख्याति तदा पारिट्ठावणिकं कल्पते यदि तु चतुर्विधाहारस्य प्रत्याख्याति
पानकं च नास्ति तदा न कल्पते पानके तूद्धरिते कल्पते एवं वोसिरइ भक्तार्थमशनादि व्युत्सृजति तथा पानके
प्रत्याख्याने षट् काणसूत्रं पोरसीपूर्वार्द्धैकाशनैकस्थानाचामाम्लाभक्तार्थप्रत्याख्यानेषु सूत्रग्रंथेन चतुर्विधाहा
रस्य प्रत्याख्यानं प्रोक्तं परि त्रिविधाहारस्य प्रत्याख्यानं करोति तदा पानकमाश्रित्य षडाकाराः तथा चेदं सूत्रं पाण
स्स लेवाडेण वा अलेवाडेण वा अच्छेण वा बहुलेण वा ससित्थेण वा असित्थेण वा वोसिरइ इहाप्यन्नत्थ इ
त्येतौ प्राग्वत् शेषाः पंच सूत्रार्थलेशेन व्याख्यायंते लेवाडेण वत्ति लेपकृता द्राक्षापिच्छलत्वेन भाजनादीनामुपलेपकारका
त् खर्जूरद्राक्षापानकादन्यत्रेत्युक्ते सत्यर्थः त्रिविधाहारं व्युत्सृजतीति संबंधः वा शब्दोऽत्र आलेपकृतपानकापेक्षया
वर्जनीयत्वात् विशेषणोक्तनार्थो लेपकारिणा वा अलेपकारिणाप्युपवासादेर्न भंग इति हृदयं एवमलेपकृता
द्राक्षासौवीरादेः अच्छापासुकोष्णवारिणा तांत्रिनारूपिच्छलात् तुषोदकादेर्बहुलाद्वा गडुलानि तत् तंदुलधावनादेः ससित्थ

द्यमकृतमुल्लकोपेतादवश्रावणादेरभिमताद्यभिस्मुखवर्जितानामनकाहारानिति तथा चरमो दिवसस्य भवस्य वा
अवसो भागस्तत्र क्रियमाणं प्रत्याख्यानमपि दिवसचरिमं भवचरिमं चेति कथ्यते तत्रेदं सूत्रं दिवसचरिमं पच्चक्खाइ च
उव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिर
इ एवं भवचरिममपि अनागाराणि पूर्ववद् व्याख्यातानि ननु दिवसचरिमप्रत्याख्यानं निःप्रयोजनं एकासनादिप्रत्याख्या
नेनैव गतार्थत्वादिति नैतदेवमेकासनादिकं ह्यष्टाकारमेतत्तु चतुराकारमतश्चाकाराणां संक्षेपकरणात्सफ
लमेवेति अत एव एकासनादि दिवसचरिमकं स्य भवति रात्रिभोजनस्य त्वतिभिः त्रिविधं त्रिविधेन यावज्जीवं प्रत्याख्या
तत्वादिति गृहस्थापेक्षया पुनरिदं साफल्यो दुर्मतं तेषां दिवसस्य शेषे अपर्यायपत्यापिरूणेनात् यस्यापि च भि
दिनैव यमा अनागताः पंचभिरहोरात्रैरिसर्पः तत्रेये यावज्जीवमपि रात्रिभोजननियमवन्तः तेषामपीदं सार्थक
मेवानुवादकत्वेन स्मारकत्वात् दिवसचरिमे तु आकारचतुष्टयमपि भवति महत्तरसर्वसमाधिप्रत्ययरूपाभ्यामाकाराभ्यां नम
मप्रयोजनं तदा नाभोगसहसाकारौ भवतो अनाभोगतः सहसाकारतो वांगुल्यादेर्मुखे प्रक्षेपसंभवात् एवं द्वयमना
कारमपि भाव्यते एतस्माकारद्वयस्यापरिहार्यत्वादिति तथापि च चत्वारो वा अभिग्रहे प्रत्याख्याने तत्र दंडकप्रमार्जनादि

रूपे ऽभिग्रहे चत्वार आकारा भवंति यथा अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं
वोसिरइ एतेषां व्याख्या पूर्ववत् यदा त्वप्रावरणाभिग्रहं गृह्णाति तदा चोलपट्टागारेणंति पंचम आकारो भवति चोलप
ट्टकाकारश्च सागारिकदर्शने चोलपट्टकं गृह्णामीत्यपि न भंगस्तथा निर्विकृतिके अष्टौ नव वा आकारा भवंति य
था निव्विगइयं पच्चक्खाइ अन्नत्थणाभोगेणं सहसागारेणं लेवालेवेणं गिहत्थसंसट्ठेणं उक्खित्तविवेगे
णं पडुच्चमक्खिएणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ तत्र मनसो
विकृतिहेतुत्वाद् विकृतिहेतुत्वाद्वा विकृतयो विगतयो वा निर्गता विकृतयो विगतयो वा यत्र तन्निर्विकृतिकं।
निर्विगतिकं वा प्रत्याख्याति ष्ठाकाराः पूर्ववत् व्याख्येयाः नवरं पडुच्चमक्खिएणंति प्रतीत्य सर्वथा रूक्षं मंडकादि
कमपेक्ष्य म्रक्षितं स्नेहितमीषत्सौकुमार्योत्पादनाय स्नेहनं कृतं विरहिस्तु तथा प्रत्यासाचात् म्रक्षितमिव यद्र
तेन तत्प्रतीत्य [illegible] म्रक्षितं म्रक्षिताभासं रसर्पिः इह चायं विधिः यद्यंगुल्या धृतादिकं गृहीत्वा मं
डकादि म्रक्षितं तदा कल्पते निर्विकृतिकस्य धारया तु म्रक्षणे न कल्पते इति युक्तं जंति विकृती विकृतीः परिहरति इह च
या सु विकृतिषु तिसृषु प्रविवेकः संभवति तासु नवाकाराः अन्यासु द्रवरूपासु अष्टौ तन निर्विकृतिके आकारा अ

भिहिता विकृतिपरिमाणप्रत्याख्याने तु उक्तम् आकारगणम् अवगम्यते उच्यते निर्विकृतिकं गृहीतो कृते सति विकृ
तिपरिमाणप्रत्याख्यानस्यापि तद्ग्रहो भवति यतस्तत्रापि त एव तथैवाकारा भवंति यथा एकाशनकस्यो
क्ताः पूर्वोद्दिष्टवस्तुत्रे आकारा अभिरुद्धिरेपरे यथा एकाशनकस्य साईपौरुष्या अपराह्णस्य च प्रत्याख्यानस्य एव भ
वंतीति प्रत्याख्याने च वस्त्रान भिहितमपि भवति अप्रमादवृद्धेः सर्वत्र संभवादित्स दोषः ननु निर्विकृतिके वि
कृतिपरिमाणे वा प्रत्याख्याने काष्ठीकृतानव आकारा भवंति सत्यं नवणीउगाहिमगे अद्दवदहिपिसियघ
यगुडे चेव नव आगारा एसिं सेसदवाणं च अट्ठेव नवनीते म्रक्षणे केवगाहिमके च पक्वान्ने अद्रवदधि
पिशितघृतगुडे चैव अद्रवग्रहणं सर्वत्र संबध्यते आकारा नव एतेषां ति अमीषां विकृति विशेषाणां नव वे
ति शेषाणां द्रवरूपाणाम् अष्टावाकारा अयम् अभिप्रायो यत्रोक्षिप्तविवेकः द्रवरूपाणां नवनीतगुडादीनां क
र्तुं शक्यते तत्र नवाकारा द्रवरूपाणां तु विकृतीनां मुद्रितुम् अशक्यो नाम अष्टावाकारा इति। इदानीं पानकादी
नां प्रत्याख्येयद्रव्याणां स्वरूपमुच्यते तत्र अवश्राभो ज्ञेन इत्यस्य कस्मुदोवकुलमध्यत्रापीति वचनादश्यते इति
कर्मणि ष्लुईतस्याज्ञानमिति भवति पायाने इत्यस्यपीयत इति तयैव पानमिति खादनमस्यां इत्यस्य खाद्यं खाद्यं ५८

ननिर्वृत्ते भावादिमद्य इति वक्त्यादिमविखादिममिति भवति स्वदस्वद आस्वादने इत्यस्य स्वदनं स्वादस्तेन निर्वृत्त
मिति पूर्ववदिमच्प्रत्यये स्वादिममिति भवति समयभाषया तु निरुक्तैर्नैषां व्युत्पत्तिः क्रियते यथा अशुद्धस्त्वरितमयतीस
शनं तथा प्राणानाम् इन्द्रियादिलक्षणानां यदुपग्रहे उपकारे वर्तते तस्मात् तथा खिमित्याकाशं तत्र मुखविवरमेव त
स्मिन्मातीति खादिमं तथा स्वादयति रसादीन् गुणान् गुणादिरूप्यकरसं परमगुणान् वा यतस्ततः स्वादिमं हेतुत्वे
न तस्वास्यतीसर्वः अथवा सांप्रति विना त्रायति स्वकीयगुणान्माधुर्यादीनस्वाद्यमानमिति स्वादिमं न
चैतन्निरुक्तं कस्मानाम अत्र स्वकीयमिति तेषे भ्रमन्नौति भ्रमरो हिनस्तीति सिंहइत्यादीनां निरुक्तं शब्दानां आ
कारणो बुह्योरसादीनि यथोपदिष्टमिति सत्तेषु प्राप्ति इत्यादि ति न दोषः मत्र वक्तव्यमेवं विधव्युत्पत्तौ भेदश्च तु अपी
न युज्यते तथाहि यथौदनादिकम् अश्यते तथा खाद्यादिकमपि पीयते अश्यत इति तथा स्वर्जूरादिकम् अपि स्वाद्यते
अश्यते इति तथा गुडादिकमपि स्वाद्यते कोः पौ अश्यत इति ततः परमार्थेन एकार्थिका एवैते शब्दा इति भेदक
थनमयुक्तमेवं सममयम भणितानि निरुक्तविधिनाप्येकार्थत्वमेवैषामिति अत्र अमीषाम् तस्य चालानां तथाविधस्त्रानां।
विकलादीनां सुखावबोधाय विवक्षितद्रव्याणां सुखपरिहाराय च भेदकथनापि नायुक्तेति नो केऽपि भक्त्येतु सत्ये

प्र.सा.वृ.
५९

पिभेदाद्दृश्यंते तथा च वक्तारो भवंति कूरसंदरमंडकानेतान्भोजयत एतान्पानीयद्राक्षापानीयादिपानकं च
पाययत एतान् बालान् गुडधानास्वर्जूरनालिकेरादिकां मुखाशिकां स्वादयत एतान् दुर्ललितान् तांबूलं च पंच
सुगंधं स्वादयतेत्यादि तथात्रापि भेदकल्पना नानाशायमीति तत्राशनमाह असणं ओयण सत्तुग मुग्ग जगारा १५।
इ खज्जगविही य खीराइ सूरणाई मंडपभिई य विन्नेयं आदिशब्दः स्वगतानेकभेदसूचकः सर्वत्र संबध्यते तत्र ओ
द नादि सक्तवश्च मुद्गाश्च जगार्यादि जगारी राद्धेत्यपभाषया च्चाभण्यते तत्र खज्जकविधिश्च खाद्यकमंडि
कामोदकसुकुमारिकादि तथा पूर्वं पचनश्रीस्वर्यभूता प्रभृति पक्वान्नविधिः तथा क्षीरादि आदिशब्दाद्दधिघृत
तक्रतीमनरसालादिपरिग्रहः तथा सूरणादि आदिशब्दात्कंदादिकादिसकलवनस्पतिविकारसंज्ञनपरिग्रहः मंड
कप्रभृतिश्च मंडकाः प्रभृतिपदस्य ढोंढिकाकुल्माषिकाचूरीयकरूपिकाप्रमुखवस्तुजातमेतन्न संकेशभतिवि ५९
ज्ञेयं ज्ञातव्यमशनमिति संप्रति पानमाह पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव आउक्काउ सव्वो ककडगजल
लाइयं च तहा ९२ सौवीरं कांजिकं यवोदकादि यवधावनमादिशब्दाद्द्राक्षाधमखिकादि तंदुलकोद्रवधावनादिप
रिग्रहस्तथा चित्रानानाप्रकारं सुरादिकं चैवादिशब्दात्प्रसन्नकादिपरिग्रहस्तथा कायः सर्वः सरित्कूपादिस्थानं संब

धी तथा कर्कटजलादिकं कर्कटकानि चिर्भिटिकानि तन्मध्यवर्ति जलं तदादिर्यस्य तत्कर्कटकजलादिकमादिश
× १५ ब्दात्खर्जूरद्राक्षादिधिवि चिरिणिकापानकेक्षुरसादिग्रहः एतत्सर्वं पानं संप्रति खादिममाह भत्तोसं दंताई खज्जूरगना
लिकेरदक्खाई ककडिअंबगफणसाइ बहुविहं खाइमं नेयं ९३ भक्तं च तद्भोजनमोषं च दाह्यं भक्तोषं भृष्टतिलपी
भ्रष्टचनकगोधूमादि दंतादि दंतेभ्यो हितं दंतं संगुंदादि आदिशब्दाच्चोलकुलिकास्तवरेस्फरादिपरिग्रहः खर्जूरं ता
दिरेव विशेषप्रसिद्धं गुडसंस्कृतं तत्पचनादि तथा खर्जूरिकानालिकेरद्राक्षादि आदिशब्दादक्षोटमादिपरिग्र डि४
स्त हस्तथा कर्कटिकाम्रपनसादि आदिशब्दात्कदल्यादिफलपरिग्रहः बहुविधं खादिमं ज्ञेयं खादिममाह दंतव
तानि तोलं चित्रं तुलसीकुहेडगाईयं महुपिप्पलिसुंठाई अणेगहा साइमं नेयं दंताः पूयंते पवित्राः क्रियंते येन का
ष्ठखंडेन तद्दंतपवनं तांबूलं नागवल्लीपत्रं पूगफलजातानि पूर्वोदितरूपं चित्रमनेकविधं तुलसीकुहेडकादि तुल
सीपत्रिकाविशेषः कुहेडकः पिंडीरकः आदिशब्दात् जीरकहीतादिपरिग्रहः मधुपिप्पलिसुंठ्यादि आदिशब्दात्कु
मरिचाजमोदजीरकहरीतकीविभीतकामलकीकटुभाण्डादिपरिग्रहोनेकधा स्वादिमं ज्ञेयं सांप्रतमेषां विकृती
नामध्येकृताहारेष्वनेवरतीसेतदाह पाणं मिसरं विगईखाई मे पक्कन्नं असणं उ भणिउं साइमं पइ गुलविगईसे

प्र॰सा॰वृ॰ साउणं न्त्र्प्रस्तगामि पानाहारे सक विकृतिरवतरतीति खादिमे खादिमाहारे पक्वान्नशाको गुडधानादिषु पक्व गुं
६० दावघवादिको भणितः स्वादिमे मधुगुडरूपा द्विविकृतिरवतरति शेषाः क्षीरदधिघृततैलपक्वान्ननवनीतमां
सरूपाः सप्तविकृतयोऽशनरूपे आहारे अवतरंतीति प्रत्याख्यानं च कृतमप्येतैः कारणैः सुविशुद्धं भवतीत्याह फा
सियं पालियं चेव सोहियं तू तीरियं च तह किट्टियमाराहियं चेव जएणाऍसम्मिउसप्पभिसमस्स याने।
फाकृते फासियमिति स्पर्शितं वा सम्नातो स्पेनिरु तिस्पर्शितमिति वा तच्च प्रत्याख्यानग्रहणकाले विधिना प्राप्त
पालितं चैवं पुनः पुनरुपयोगप्रतिजागरणेन रक्षितं शोभितं गुर्वादिप्रदत्तशेषभोजनासेवनेन राजितं तीरितं
पूर्णेपि प्रत्याख्यानकालावधौ किंचिदधिककालावस्थानेन तीरितं नीतं कीर्तितं भोजनवेलायाममुकं मया प्रत्या
ख्यानं प्रत्याख्यातं तत्पूर्णमधुना भोक्ष्ये इति उच्चारणेन शब्दितं आराधितं चैवं एभिरेव प्रकारैः संपूर्णैर्निष्ठां नीतं य ६०
स्मादेवं भक्तमेवैतदर्हदाज्ञापालनात् प्रमादाच्च महत्कर्मक्षयकारणं तस्मादीदृशं प्रत्याख्यानं यतेन एवंविधएव
त्वैः उप कर्त्तव्यमिति अपयं प्रकारं स्वयमेवैतानि पदानि विवृणोति उचितकाले विहिणा पत्तं जं फासियं तयं भ
णियं तह पालियं च असइं सम्मं उवओगपडियरियं २२ गुरुदत्तसेसभोयणसेवणयाए य सोहियं जाण पुस्से वि

चेवकालावस्थाणा तीरियं होइ २८ भोअणकाले अमुगं पच्चक्खायं तु कित्तियं आराहियं पयारेहिं सम्म मेएहिं नि
ट्ठवियं १९ उचिते काले विधिना प्राप्तं यत्स्पृष्टं तत् भणितं सुप्रयुक्तं भवति साधुः श्रावको वा प्रत्याख्यानसूत्रार्थम
वगच्छमानः सर्वं वुच्यते एवं स्वमाश्रितया चैतस्यापुनावार्यमाना स्वगात्रं प्रतिपन्नविवक्षितप्रत्याख्यानः प
श्चाच्चारित्रपवित्रपात्रस्य गीतार्थस्य गुरोः समीपे सत्योक्तविधिना कृतिकर्मादिविनयं विधाय रागद्वेषविकल्पा
दिरहितः सर्वत्रोपयुक्तः प्रांजलिपुटोऽनुकूलशब्देन गुरुवचनमनूच्चरन् यथा प्रत्याख्यानं प्रतिपद्यते तदा स्पृष्टं भवती
ति तथा पालितं वा सकृन्निरंतरमुपयोगेन सम्यक् प्रतिजागरितं गुरुदत्तशेषभोजनासेवनया च शोभितं जानी।
हि पूर्णेपि प्रत्याख्यानकाले स्तोककालावस्थानात्तीरितं भवतीति भोजनकालेऽमुकं प्रत्याख्यानमिति भणितात्
जानस्य कीर्तितं आराधितं प्रकारैः सम्यगेतैः पूर्वोक्तैर्निष्ठां नीतमिति प्रत्याख्याने चापवादरूपाकारसहितं कर्त
व्यमन्यथा तु भंगः स्यात् स च महते दोषायेति कथमित्याह वयभंगे गुरुदोसो थोवस्स वि पालणा गुणकरीउ गुरुलाघ
वं च नेयं धम्मंमि अउ य आगारा २४ व्रतभंगे नियमभंगे गुरुर्महान् दोषो दूषणमशुभकर्मबंधादिरूपो भगवदाज्ञावि
राधनात् तथा स्तोकस्यापि स्वल्पस्यापि [illegible] पालनाआराधनागुणकारी कर्मनिर्जरालक्षणोपकारकारिणी

म·सा·वृ· विशुद्धरूपपरिणामत्वरूपत्वात् तथा गुरुत्वसारं लघुत्वासारं तयोर्भावो गुरुलाघवं तेन सूत्राणां केनाह धर्मे चारित्र
६२ धर्मे तथा लघुत्वासेव्यत्वे पिसंज्ञानां समाधिरोषधादि तत्र समाधिं प्राप्ते निर्जरागुणो गुरुर्भवतीत्यर्थः पाठ
नारस्तु तिविषयत्वानीयं एकानाग्रहस्य भूतापकारकारित्वेनाशुभत्वात् तत एवमतः आकाराः प्रत्याख्याने क्रियंते
इति ननु प्रत्याख्याने विकृतयो भिहिताः कियंत्यो भवंतीत्याह दुद्धं दहि नवणीयं घयं तहा तेल्लमेव गुड मज्जं महु
मंसं चेव तहा उग्गाहिमगं च विगईउ दुग्धं दधि नवनीतं तथा तैलमेव गुडमद्यं गुडश्च मद्यं चेति गुडमद्यं मधुमांसं
चैव तथावगाहिमकं च अवगाहेन घृततैलाद्यवलोडनेन निर्वृत्तमवगाहिमं तदेव अवगाहिमकं च एता दश विकृत
यो मनसो विकृतिहेतुत्वाद्विकृतय इदानीमेतासां यथासंभवं भेदानाह गोमहिसुट्टिपसूणं एलगखीराणि पंच च
त्तारि दहिमाइयाइं जम्हा उट्टीणं ताणि नो हुंति गवां महिषीणामुष्ट्रीणां पशूनां गलिकानामेलकानां गड्ड ब
रिकाणामित्यर्थः संबंधीनि क्षीराणि पंच विकृतयः नेतराणि मानुषीक्षीरादीनीति एलकरसत्र्यष्ठीवद्धव ६२
नं इत्यादि तथा चत्वारि प्रसंस्कृत्य उभे होनि दधिनवनीतघृतानि चत्वारि एवं भवंति पंचसु रुग्न भवं
ति तत्राह यस्मादुष्ट्रीणां दुग्धे तानि न भवंति सेन्धवं भावादिति चत्तारि हुंति तिल्लाणि तिलअयसिकुसुंभसरि

सवाणं च विगईउ सेसाणं डोलाईणं न विगईउ २ उत्तरत्र व्याख्यानं संबंधीनि तैलानि चत्वारि भवंति विकृतय इति
संटंकः केषां संबंधीनि तत्राह तिलअतसीकुसुंभसर्षपाणां शेषाणां डोलादीनां मधूकफलादीनां आदिश
ब्दात् लिंकेरएरंडइंगुदादीनां संबंधीनि तैलानि न विकृतयः अत्र चैतेषां तिमाकृतत्वात् समा निर्देशः द्रव
गुड पिंडगुडा दो मज्जं पुण कट्ठपिट्ठनिप्पन्नं मच्छियकुत्तियभामरभेयं च महुं तिहा होइ २४ गुडस्य द्वौ भेदौ द्रवगुडः
पिंडगुडश्च तौ द्वावपि विकृती तथा मद्यं द्वौ भेदौ एकं काष्ठनिष्पन्नं तालादिभिर्निष्पन्नमपरं पिष्टैः षष्टिकाकोद्र
वादितंदुलैर्निष्पन्नं तौ द्वावपि विकृती तथा मधु त्रिभेदं माक्षिकाकृतं भ्रमरकृतं [illegible] कुत्तिकाकृतं ति
त्रिधा त्रिप्रकारमपि विकृतिर्भवति जलथलखहयरमंसं चम्मं वसा सोणियं तिभेयं च आइल्लं तिन्नि चलचल
उग्गाहिमगं च विगईउ २ मांसं त्रिभेदं जलचराणां मत्स्यादीनां संबंधि स्थलचराणां अजमहिषहरिणादीनां संब
धि खेचराणां लावकचटिकादीनां संबंधि अथवा अपरथा मांसं त्रिविधं मांसं वसा शोणितं चेति एतत् त्रिविध
मपि विकृतिर्भवति अवगाहिमकं पुनर्घृतेन वा तैलेन वा भृतायां तापिकायां चलचलेति शब्दं कुर्वाणं सुकुमारि
कादियदापमेतत् तदेकोद्याराः पुनस्तेनैव घृतेन तैलेन वा द्वितीयः पुनस्तेनैव तेनैव घृतेन तैलेन तृतीयो विकृति

तिर्भवति यदि पुनस्तस्मिन्नेव घृते अन्यतैलेन वा चतुर्थो घाणः पच्यते तदा विकृतिर्न भवति योगवाहित्वान्निर्विकृतिकप्रत्या-
ख्याने कल्पिकल्पते अथ तापिकायां एकेनैव पूपकेन सर्वा तु केन वा सकलापि भृता तदा तत्रैव प्रथमो घाणो विकृति-
स्तत्रैव द्वितीयः पूपकादिः स्निग्धोऽपि न विकृतिर्भवति निर्विकृतिकानामपि कल्पत एव सः योगवाहिसम्प्रदायाज्ञायते अ-
पि च तुर्योः यद्द्वितीयो घाणः प्रथमस्निग्धघृतादिनापक्व इति यदा पुनर्द्वितीयादिघाणे बहुतापिकायाम अपरं घृ-
तादि प्रक्षिप्तं चतुर्थादिर्वा अयं घाणः इति सम्प्रदायात्तदा न कल्पत एवेति इह द्रव्यसंसृष्टद्रव्याकारस्य विशेषतः
स्वरूपविधीयते गुडस्यैवोदनादिदध्यादिना सह प्रयोजनाम संसृष्टः संश्लेषितः इति गुडद्रव्यसंसृष्टः तत्राह क्षीरे
ह्यौदिपञ्चाणां चत्वारि अङ्गुलानि संसृष्टं फाणितस्य तु पञ्चाणां अङ्गुलमेकं तु संसृष्टं २२ क्षीरदधिविकृतानां च-
त्वार्यङ्गुलानि संसृष्टं न विकृतिर्भवति अयमभिप्रायः कूरः क्षीरमिश्रितः कृतस्तत्र कूरस्योपरि यदि चत्वार्यङ्गुला- ६२
त्रि नि क्षीरं चटितं भवति तदा न विकृतिर्भवति निर्विकृतिकानां कल्पते यदा तु पञ्चमाङ्गुलारम्भो भवति तदा विकृतिरेव
न कल्पते निर्विकृतिकानामित्यर्थः एवं दध्नोविकटस्य च कल्पते तथा फाणितेन द्रवगुडेन मिश्रिते कूरोदनादौ यद्येक-
मङ्गुलमुपरि चटितं भवति तदा न विकृतिरेवं तैलघृतयोरपि वक्तव्यं मधुपुद्गलरसयोर्द्वयोरङ्गुलस्य तु अर्धं संसृष्टं गुल-

पोगुलनवनीत अद्दामलयं तु संसृष्टं मधुनिच्चपुद्गलानि च मांसानि तेषां रसैः संसृष्टं पिण्डगुडस्य आर्द्रं संसृष्टं भवति
अङ्गुलार्धं संसृष्टो विकृतिरेवेति गुलपुद्गलनवनीतेषु एतद्धि येषु एतेः संसृष्टमिति पाठस्तन्मलके तु आर्द्रा सा ५७
वक्षारण्यार्द्धा द्रामलकमेव निर्विकृतिर्भवति आर्द्रामलकं तु शकलेषु पासं बंधीमुत्तुः अयमर्थोः गुडमांस
वेनवनीतं खंडे द्रार्द्रामलकप्रमाणो वृद्धरपि संसृष्टमोदनादिकं निर्विकृतिर्भवति एतद्योगेनैकेनापि स्थूलत्वं
देन संसृष्टं विकृतिरेवेति इदानीं प्रत्याख्यानविषयाण्येव विशेषवस्तूनि कथयन्नाह विगई ९ विगयगयाणि
स्प्र य २ अणंतकायाणि वज्जंतो सतीसं च जीवसाजीवसंभवा हवन्ते मो विकृतीर्विकृतिगतानि वातानंतकाया-
नि वर्जनीयवस्तूनि हे भव्यजनाः अणुतनरूप्रायस्येह भवतामिति तानि च किमवद्भेदानि भवन्तीति यथासंख्ये-
नाह दशत्रिंशद्वात्रिंशद्विंशतिरिति संख्यानि कोर्थो विकृतिर्दशभेदा विकृतिगतानि त्रिंशत्संख्यानि अनं-
तकायानि द्वात्रिंशत् अवस्तूनि द्वाविंशतिं वर्जयामीति अत्र रूप्रणुतेति यदुक्तं तत्रायमभिप्रायः अल्पसत्वानु-
पस्थितानामेव भव्यानां सूरिभिर्धर्मः कथनीयो नानुपस्थितानां यद्वाचि अणुवर्द्धमाणस्स धम्मं मा हु कहिज्जाहि

प्र·सा·वृ· सुद्धविपियस्साविस्साइंहोइमुहवि[illegible] अग्गिंधमंतस्सेंतिवर्सेमामीत्यस्यायमभिप्रायः परोपकारनिरतैः
६३ सूरिभिः कथ्यमानएव जीवादितत्वेभव्यानांविवेकःसमुल्लसति यदाहुः सुद्धाजगरारूकुद्धाणंपसुन्नाजा
णयंपावगंउभयंपिजाणाइंसुद्धात्तेयंतंसमायरेइत्ति तत्रविकृतीस्तावदाह दुद्धं१दहिं२ तिल्ल३नवणी
यं४घय५गुड६मज्ज७मंस८महुमक्खंचपणग५चउ४चउ४चउ४चउ४दुग२तिग३तिग३दुग२एग२पुढ
भिन्नंदुग्धदधितैलनवनीतघृतगुडमद्यमांसमधुपक्वंच तत्रदुग्धंपंचभेदंगोमहिषीकरभीअजिकागड्डरि
कासंबंधित्वेनदधिचतुर्भेदंगोमहिषीअजिकागड्डरिकासंबंधित्वेन उष्ट्रीदुग्धेतुदधिनभवतीति तैलमपि
चतुर्भेदंतिलअतसीकुसुंभसर्षपसंबंधित्वेननवनीतमपिचतुर्भेदंगोमहिषीअजिकागड्डरिकादधिसंभ
वित्वेनघृतमपिचतुर्भेदंगवादिसंबंधित्वेनैव गुडोद्विभेदोद्रवगुडपिंडगुडभेदेनमधुत्रिभेदंमक्षिकाकुत्तिका
भ्रमरीजनितत्वेनमांसंत्रिभेदंजलचरस्थलचरखचरसंबंधित्वेनमांसादिद्वितीयभेदेनापि त्रिभेदंमांसचर्मशोणि
तभेदेनचेति मद्यंद्विभेदंकाष्ठपिष्टनिष्पन्नत्वेनपक्वमेकभेदंघृतेनतैलेनवाभृतायांतापिकायांचलचलेतिश

ब्देनपच्यमानस्यकणिक्कादेःकृत्वादिति विकृतिगतानिसांप्रतमाह दहहयाविगइगयंविगईपुणतेणतंहयं
दव्वं उद्धरिएतत्तंमियउक्किट्ठदव्वइमंअन्ने द्रव्यैःकलमशालितंदुलादिभिर्हतानिभिन्नानिनिर्वीर्याकृतानीतिविकृ
तिगतानित्युच्यते तेनकारणेनतंदुलादिहतंक्षीरादिकंद्रव्यमेवभवति ननुविकृतिः अतएवनिर्विकृतिकस्यसा
ध्यानवनामपिकेषांचित्किमपिकल्प्यतएवतथापाकभाजनान्सुकुमारिकादावुद्धृतेसतिपश्चाद्यदितस्य
न्घृतादितस्मिन्नचुल्लीमस्तकस्थेग्निसंयोगात्तप्तेप्रक्षिप्तंपक्वणिक्कादितदिदमुत्कृष्टद्रव्यमेवकोर्थोविकृति
गतमेवभवति ननुविकृतिरिस्मेवेदंइति गीतार्थाभिप्रायस्तुचुल्लीमस्तकादुत्तारितेशीतलेचजातेघृतादे
यदिकणिक्कादिप्रक्षिप्यतेतदेवतथाविधपाकाभावात्विकृतिगतंनान्यथात्तुपरिपक्वत्वाद्विकृतिरेवेति
इयंगाथाअस्माभिःस्थितावद्व्याख्याता सुधियात्तुयथाबोधमन्यथाव्याख्येया॥इदानींकस्यांविकृतौकानिकिंना
मकानिकियंतिविकृतिगतानिभवंतीत्याह अहेपया१दुद्धट्टी२दुद्धवलेही३दुद्धसाडी४पंचयविगइगयाइंदु
द्धमियखीरसहियाइं३१ [illegible] अस्यानंतरंपंचैवदुग्धेअत्राद्भुसावधारणार्थत्वात् विकृतिगतानि
भवंतीत्याह विकृतौक्षीरादौगतानिस्थितानि विकृतिगतानिविकृतस्याश्रितानिविकृतिदिस्यर्थःकानितानी

प्र॰सा॰वृ॰
६६

माह पेयादुग्धकांजिकमितिसर्पिः तथा दुग्धाटी दुग्धावहेलिका दुग्धसाटिका च क्षीरस्य हिकाइति ऐरेयापायसेनसहि
तानि पूर्वोक्तानि चत्वारि पंचमी च क्षैरेयी मर्पः एतानि क्षीरे पंच विकृतिगतानी तिएतेषु स्वयमेवकानिचिद्वि
णोति अवलेहुयमिदुद्दं दुद्दट्टी दक्मीसरद्दुमि पयसाडीतरतं दुजबुत्तयसिद्धंमि अवलेही २२ अविलेन
युक्ते दुग्धे दुग्धाटी किलाटिके सर्पं अम्लेत्तु वलाहिकामाहुः तथा द्राक्षामिश्रे दुग्धे द्रवे पय साटी पयो दुग्धं श
टतिगच्छतीतियुस्सत्रं तथा तंदुलकचूर्णकमिद्धदुग्धे अवहेलिका दधिविकृतिगतान्याह दहिएविगइगया
इं घोलवडाघोलसिहरणिकरंबोलवणकणदहिपंसगंगियापंमिअपडिए २३ दधिविषये विकृतिगतानि
पंच घोलवटकानि घोलयुक्तवटकानि तथा घोलोवस्त्रगालितं तथा दधिशिखरिणीकामयितखंडयुक्तं दधि
निष्पन्नं तथा करंबोदधियुक्तकूर निष्पन्नं तथा लवणकणयुक्तं दधि च मथितं एतिकाखारकमितिसर्पिः तच्चसंगरि
कादिकेः पतिते दधिविकृतिगतं भवति संगरिकापुरस्कलराकुस्वाटोपतिते पुनर्भवत्येव घृतविकृतिगतान्याह ६५
पक्कघयंघयकिट्टीपक्कोसहिउवरितरियसप्पिं चनिब्भंजणवीसंदणगारुं घयविगयविगइगया २४ अघेघेः
पक्कघृतं सिद्धाऽषकादि तथा घृतेकिट्टिका घृतमलं तथा घृतपक्वौषधोपरितरिकाऽपक्वतसर्पिःखलुहि कृतिगतं तत्

यानिर्भंजनेपक्वान्नोत्तीर्णं दग्धघृतमितिसर्पिः तथा विस्यंदनं दधितरिकाकणिक्कादिनिष्पन्नद्रव्यविशेषः तथा दल
खप्रसिद्धं घृतविकृतिगतान्येतानि पंचामी सर्पिः तैलविकृतिगतान्याह तिलमल्लीतिलकुट्टी २ दद्धेल्लं ३ तह
तेल्लोवरियं लक्खारसदब्बपक्कतेल्लं ५ तेल्लेमि पंचेव २५ तैलमल्लिका तथा तिलकुट्टिस्तथा दग्धतैलं निर्भंजनमितिसर्पिः
तथा तैलपक्वौषधोपरिभागे यदुद्धृतं तथा लाक्षादिद्रव्यपक्वं च तैलं एतानि तैलविकृतौ पंच विकृतिगतानि गु
डविकृतिगतान्याह अद्धक्कढियंइक्खुरसो गुलवाणीयं सक्करा खंडं पायगुलं गुलविगईविगयगयाइं तु पंचे
व अर्द्धक्वथित इक्षुरसस्तथा गुलपानीयं तथा शर्करा तथा खंडं तथा पाकगुडो येन खज्जकादि लिप्यते गुडवि
कृतौ विकृतिगतानि एतानि पंचैव पक्वान्नविकृतिगतान्याह एगं एगस्सुवरिं तिन्नोवरिबीयगं च जं पक्कं तुप्प
एणं तेणं चिय तइयं गुलहाणिया पयं भणियं २६ एवं विकृतिगतं तदेकस्य घाणस्योपरि यत्ते कोऽभिप्रायः प्रसिद्धत
तापिकायां पक्वे एकैनेव पूपकेन स्थगितेन तावत्सकलपूरिते द्वितीयपूपकादि तत्प्रसिद्धं विकृतिगतं भवति प
द्विकं चिज्जेणगेणं नवउवरि घयपूयगेण तच्चीउ आकविपमेहापंचमतरसानोहारत्ति विगईहितीपविकृतिगतं त्र
याणघाणानामुपरि अप्रक्षिप्तापरघृतमध्ये ते त्रिचतुर्घाणानि घृतेन पक्वान्नतीयं गुडधानिकाप्रभृति तथा चउत्थ

प्र.सा.वृ.
६५

जलेण सिद्धं लप्पसिया पंचमं चुल्लपलियाचउप्पट्टियन्ना विस्साए एपरिकातीसमिलएसु चतुर्थं समन्नाणीते सुकु
मालिकादौ पक्वा दुद्धानि तप्पता दिग्धादि तावता तापिकायां जलेन सिद्धं लपनश्रीः पंचमं पुनः स्नेहदिग्धतापिका
यां परिपक्वा पूपिका एवं घृतविकृतिसंबंधीनि पंच विकृतिगतानि मीलितानि त्रिंशद्भवंतीति इह च विकृ
तिगतानां स्वरूपं नाचार्येण स्वमनीषिकया अभिदधे किं तु सिद्धांताभिहितमेव यदाह आवस्सयचुन्नीए पढ
म तिल्ले तस्य तावसियस्स चउत्थं अहिया जहन्नेण तइयं जहा ठियं कुसलाण उ जिया तस्स वितुकारणीए ४ आवस्सयचुन्नी उपरि भणि
तमत्र ग्रंथेषु वर्णितं सामान्येन द्वारेण कथितं विशेषद्वारेण सामीभिरेतत्सम्यक् अपि तथा कुशलानां बुद्धिमतां प्रयो
जं कारणिके कारणिकविषये अयमभिप्रायो यद्यपि स्नेहपीयूषप्रमुखाणि साक्षाद्विकृतयो न भवंति किंतु वि
कृतिगता एव निर्विकृतिकानामपि कल्पंते तथापि उत्कृष्टानि एतानि द्रव्याणि भक्ष्यमाणानि वपंषमनो ६५
विकारमानयंति पांतानामपि न त्रु तु निर्विकृतिकानामेतेषु भक्ष्यमाणेषु उत्कृष्टा निर्जरा संपद्यते तस्माद
तानि न कल्पंते इति यस्तु विविधतपःकरणासामर्थ्यत्रस्तां तपसा आ यावज्जीवादिकं कर्तुं न शक्नोति स विकृ
तिगता उत्कृष्टमपि द्रव्याणि भुंक्ते न कश्चिद्दोषः कर्मनिर्जरापि तस्य महती भवति यदाह निव्वीयए परिभोगो निव्वि

इयाणंपि कारणाविक्खा उक्कोसगदव्वाणं तु विसेसेण विन्नेओ आवन्न निगइयस्स सम्म साहुणो जइ य परिभो
गो इत्यिपत्र यतु हीए विगई चाय मिन्नो जुत्ता जो पुण विगई चायं काउं न सक्कइ निव्वमहूण उक्कोसगदव्वाई उ
वभुंजो तस्स सो नेउ २ दीसंति य केइ इह पंतु कोऽवि मेदृश्यमाणो कारणेण य पविसेवं अकारणेणावि कुणमाण
निउमो य गंतिलव हिं वरिसो लमनालि केरलतुओ इ अरकुलघोलरसीर यप पुप्फयचं जणा इच घयवट्टं मंडगाइ
दहिट्टं कां वन्नेह माईयं कुरची वणिया मुहं अकारणे के इ भुंजंति न यतं पि इह पमाणं जं तु जक्का णाणा गमं न
ण जाणं आगमेणाभी समणाभवन्नवुहिंगा विनाण मोत्तुं जिणाण माणं जिणाण तुद्धं इह वभित्तवियाणं न दु
अन्नो परिण्णाएको उ दुट्ठमसुवणाणं जाण ८ विगइंपी हारद्धम्मो मोहो जमुदि ज्जाए उदिन्ने य सुट्ठु वि चित्त जयपरोक
हं अकज्जे निवि दिहइ ई रणाननलमन्नुगइकोनउ बसमं गाएिं नलेमाई संतेवि न सेवे ज्जा मोहामलदीविए उ
रमा ९ विगई विगईभीओ विगइगयं जो उ भुंजए साहू विगई विगइसहावा विगई विगई बला नेइ १० इत्यादि मु
गमाश्चैतान वरमेभंसगाथा किं चित्रिधु प्रमत्ताहृतस्येत विगतेनं कादिकापाभीतस्नाल साधुर्विकृतिं सीणादिको
वशाद्भुक्तानक्क स्मा पिदर्शनादिकृतिगतं च स्वीराननादिकं यो भुंक्ते स दुर्गतिं याती ति शेषः कस्मादित्याह विकृतिर्वि

सा॰ इ॰ लानूली वृक्षनिकुंजमपि दिगनिनः कारिकोनयतीति एनत्पि च तत्स्याह विरूलितर्यतो विकुनिस्वभावा मतो विकारको
६६ स्तन्पेति अथ का अनंतकायका आह सव्वा य कंदजाई सूरणकंदो य वज्जकंदो य अल्लहलिद्दा य तहा अल्लं तह अल्ल
कच्चूरो २४७ सत्तावरी विराली कुमारि तह थोहरी गलोई य ल्हसणं वंसकरिल्ला गज्जर तह लोणओ लोढा गिरिकन्नि किस
लपत्ता खरिंसुया थेग अल्लमुत्था य तह लोणरुक्खछल्ली खिल्लहडो अमयवल्ली य मूला तह भूमिरुहा विरूढा तह ढक्कव
त्थुलो पढमो सूयरवल्लो य तहा पल्लंको कोमलंबिलिया आलू तह पिंडालू हवंति एए अणंतनामेहिं अन्नमणंतं
नेयं लक्खणजुत्तीइ समयाउ व्याख्या सर्व्वैव कंदजातिः अनंतकायिकेति संबंधः कंदो नाम भूमध्य
गो वृक्षावयवः तेचात्र कंदा आर्द्रा एव ग्राह्याः शुष्काणां तु निर्जीवत्वादनंतकायत्वं न संभवति तानेव कांश्चित्कं
दान् आह प्रधानत्वान्नामतस्त्वाह सूरणकंदो अर्शोघ्नः कंदविशेषः २ वज्रकंदोपि कंदविशेष एव आर्द्रा अशुष्का ए
व हरिद्रा प्रतीता ३ आर्द्रकं शृंगबेरं ४ आर्द्रकचूरकस्तिक्तद्रव्यविशेषः प्रतीत एव ५ सत्तावरी ६ विराली ७ वल्ली ६६
भेदो कुमारी मांसलप्रणालाकारपत्रा प्रतीतैव ८ थोहरी स्नुहीतरुः ९ गडूची वल्लीविशेषः प्रतीत एव १० लसुनः
कंदविशेषः ११ वंसकरीला कोमलाभिनववंशावयवविशेषाः प्रसिद्धा एव १२ गर्जरकाणि सर्वजनविदितान्येव १३

लवणको वनस्पतिविशेषः येन दग्धेन सर्जिका निष्पद्यते १४ लोढकः पद्मिनीकंदः १५ गिरकर्णिका वल्लीविशेषः १६
किसलयरूपाणि पत्राणि प्रौढपत्रादर्वाक्बीजस्योच्छूनावस्थालक्षणानि सर्वाण्यप्यनंतकायिकानि न तु कानिचि
देव १७ खरिंसुकाः कंदभेदः १८ थेगोपि कंदविशेष एव १९ आर्द्रा मुस्ता प्रतीता २० लवणनाम्नो वृक्षस्य छल्लि
त्वक् छल्ली न त्वन्ये अवयवाः २१ खिल्लहडकाः कंदभेदाः अमृतवल्ली वल्लीविशेषः २३ मूलको लोकप्रतीतः २४
भूमिरुहाणि छत्राकाराणि वर्षाकालभावीनि भूमिस्फोटकानीति लोकप्रसिद्धानि २५ विरूढानि अंकुरितानि द्विद
लधान्यानि २६ ढक्कवास्तुलः शाकविशेषः स च प्रथम एव प्ररोहन्नेव अनंतकायिको भवति न पुनश्छिन्नप्ररूढः
शूकरसंज्ञितो वल्लः स एवानंतकायिको न तु धान्यवल्लः २८ पल्यंकः शाकभेदः कोमलाम्लिका अबद्धास्थिका चिंचि
णिका ३० आलुक पिंडालकौ कंदभेदौ ३२ एते पूर्वोक्ताः पदार्थाः द्वात्रिंशत्संख्याका अनंतनामभिरनंतकायिकसं
ज्ञिता आर्षे प्रसिद्धा भवंतीति संबंधः न चैतान्येवानंतकायिकानि किंत्वन्यान्यपि तथा चाह अन्यदपि पूर्वोक्तातिरि
क्तमनंतं अनंतकायिकं ज्ञेयं लक्षणयुक्त्या समयात् तल्लक्षणविचारणपरसमयात् सिद्धांतात् तान्येव कांश्चि
दाह॥ घोसाडकरीरकुंदुरुगतिंदुय अइकोमलंबगाई य वरुणवडनिंबपाईण अंकुराइं अणंताइं ४८ घोषातकी

करीरपोंगरुणस्तथा अतिकोमलाम्रवृक्षास्थिकानि तिंदुकाम्रकफलादीनि तथा वरुणवटनिंबादीनां तरुणाः अंकु-
रा अनंतकायिकाः अथ अनंतकायिकपरिज्ञानाय लक्षणयुक्तिमाह गूढसिरसंधिपव्वं समभंगमहीरुहं च छिन्नरु-
हं साहारणं सरीरं तव्विवरीयं च पत्तेयं गूढानि प्रच्छन्नानि अप्रत्यक्षायमानानि शिरासंधिपर्वाणि च यस्य पत्रकांड-
नालशाखादेस्तद्गूढशिरासंधिपर्व तथा यस्य भज्यमानस्य शाखादेस्तद्गूढमानस्य चक्राकारेण समोऽदंतुरो भंगच्छेदो
भवति तत्समभंगं तथा छिद्यमानस्य न विद्यते हीरकः तंतुलक्षणो मध्ये तदहीरकं तथा छिन्नं लूनं यदा ग्रंथ्यादौ तत्
प्रच्छन्नमप्यवाप्य जलादिसामग्रीं प्राप्य पुनरपि प्ररोहति तच्छिन्नरुहं तदेतल्लक्षणोपेतं साधारणशरीरं तं अनंतकायिकमिति सर्वः एतल्लक्षणव्यतिरिक्तं च प्रत्येकशरीरमिति पुनरनंतकायिकस्य लक्षण-
मतमाह चक्कं व भज्जमाणस्स जस्स गंठी हवेज्ज चुन्नघणो तं पुढविसरिसभेयं अणंतजीवं वियाणाहि चक्रमिव यस्य
हेतुरतया कुंभकारचक्राकारमेकांते न समं भंगस्य भज्यमानस्य मूलस्कंधत्वक्शाखापत्रपुष्पादे भवति
तन्मूलादिकमनंतजीवं विजानीहीति संबंधः तथा ग्रंथिपर्व सामान्यतो भंगस्थाने वा यस्य चूर्णघनो भवति को-
ऽपि यस्य भज्यमानस्य मूलग्रंथ्यौ भोग्यघनचूर्णं उत्कीर्यमाणो दृश्यते स वनस्पतिरनंतजीवानां साधारणमेकं शरीर-

मित्यर्थः कथं पुनरसौ भज्यमानस्तरमनत्रदृष्टांतमाह पुढवीसरिसभेयं अत्र पुढवीकेदारकपोलिका वर्तिनी कालक्षेत्रिका अ-
न्तस्त्वचिकाभिर्निवर्तितवर्त्तिकाकारा गृह्यते यथा तस्या भज्यमानायाः समो दंतुरो भेदो भवति एवं वनस्पतिरपि चक्राका-
रसमभेदो भज्यमानस्तथाभावः पुनर्लक्षणांतरमनंतकायिकस्याह गूढसिरागं पत्तं सच्छीरं जं च होइ निच्छीरं जंपि य
पणट्ठसंधिं अणंतजीवं वियाणाहि यत्पत्रं सक्षीरं वा गूढशिराकमलक्ष्यमाणशिराविशेषं भवति यदपि च
प्रतापसंधिप्रकृष्टतयाप्यस्यां च एवं विधा संधयो यस्य तत्तनामसंधि . . . पाठे संधिर्निपातेऽप्रनष्टसंधिसर्व-
थानुपलक्ष्यमाणपत्रार्द्धद्वयसंधिमत् अनंतद्विनानो हीति इदानीं वर्जनीयवस्तून्याह पंचुंबरि ५ चउविगई
४ हिम १० विस ११ करगे य १२ सव्वमट्टीय १३ रयणीभोयणगं चिय १४ बहुबीय १५ अणंतसंधाणा २२ पंचानामुदुं-
बराणां समाहारः पंचोदुंबरी वटपिप्पलोदुंबरप्लक्षकाकोदुंबरीफलरूपाः समयप्रसिद्धा सामान्याकारत्वस्मा-
द्बहुबीजभक्तत्वाद्वर्जनीया तथा च तस्या विकृतयो मद्यमांसमधुनवनीतरूपा वर्ज्याः सद्य एव तत्रतद्वर्णानेकजीवसं-
मूर्च्छनात् तथा हिमं शुद्धाम्भस्त्वादप्कायरूपत्वात् तथा विषमज्ञोपहतवीर्यमपि उदरांतर्वर्त्तिगंडोलकादिजीवविघा-
तहेतुत्वात् मरणसमये महामोहोत्पादकत्वाच्च तथा करकाः अप्कायस्थाकाशादिकला तत्तथा सर्वापि मृत्तिकाः दर्दुरादि

प्र॰सा॰वृ॰ पंचेंद्रियप्राणव्यपरोपणनिमित्तत्वात् सर्वग्रहणं रात्रिकादिष्टदृष्टरूपीग्रहणार्थं तद्भक्षणस्यापि आमाश्रयादिदोषजनक-
६८ त्वात् तथा रजनीभोजने बहुविधजीवसंघातसंभवेन ऐहलौकिकपारलौकिकदोषदुष्टत्वात् तथा बहुबीजं पंपो- द्वृ४
टिकादि प्रतिबीजं जीवोपमर्दसंभवात् अनंतानंतकायिकानि अनंतजंतुसंतानविघातनिमित्तत्वात् तथा सं-
धानमत्यानकं बिल्वकादीनां जीवसंसक्तिहेतुत्वात् तथा घोलवटकानि उपलक्षणत्वादामगोरससंपृक्तद्विदला-
नि च केवलिगम्यसूक्ष्मजीवसंसक्तिसंभवात् वृंताकानि निद्राबाहुल्यमदनोद्दीपनादिदोषदुष्टत्वात् तथा स्वयमप-
रिज्ञातनामानि अज्ञातनामानि पुष्पाणि फलानि च अज्ञानतो निषिद्धफलप्रवृत्तो व्रतभंगसंभवात्
वि विषफले वा प्रवृत्तो जीवितविनाशात् तथा तुच्छमसारं फलं मधूकबिल्वादि उपलक्षणत्वाच्च पुष्पमरणिशिग्रुम-
धूकादेः पत्रं प्रावृषि तंदुलीयकादेः बहुजीवसंमिश्रत्वात् पक्षतुच्छफलमर्द्धनिष्पन्नकोमलचवलकसंगादिकं त- ६९
द्भक्षणे हि तथाविधतृप्तिरपि नोपजायते दोषाश्च बहवः संभवंति तथा चलितरसं कुत्सितान्नमुपलक्षणत्वात्
पुष्पितौदनादिद्विदिनद्वयातीतं च दधि वर्जनीयं जीवसंसक्तिप्राणातिपातादिदोषसंभवात् एतानि द्वाविंशतिसं-
ख्यानि वर्जनीयानि वस्तूनि कृपापरीतचेतसः संतो हि भव्यजना वर्जयंत परिहरंतीति ॥ इदानीं उस्सग्गोत्ति पंचमं द्वार-

माह ॥ घोडग लया य खंभे कुड्डे माले य सबरि वहु नियले । लंबुत्तर थण उद्धी संजय खलिणे य वायस कविट्ठे ॥२४॥ ५२
सीसोकंपिय मूई अंगुलि भमुहा य वारुणी पेहा । एए काउस्सग्गे हवंति दोसा इगुणवीसं ततत्रैते कायोत्सर्गे भवंति
=स्य दोषा एकोनविंशतिरिति संटंकः कायस्य शरीरस्य स्थानमौनध्यानक्रियाव्यतिरेकेणान्यत्रोच्छ्वसितादिभ्यः
क्रियांतराध्यासमाश्रित्य य उत्सर्गस्त्यागो नमो अरहंताणमिति वचनात् पूर्वं स कायोत्सर्गः स च द्वेधा चेष्टाया-
मभिभवे च चेष्टायां गमनागमनादौ ईर्यापथिक्यादिप्रतिक्रमणभावी अभिभवे चोपसर्गादिविधीयमानोपस-
र्गजयार्थं यदुक्तं सो उस्सग्गो दुविहो चेट्ठाए अभिभवे य नायव्वो । भिक्खायरियाइ पढमो उवसग्गभिजुंजणे =भंजिवु
बीओ ॥१॥ तस्य चतुर्विधाहारोपविधीयमानो निर्जराहेतुर्भवति दोषाश्चैते घोटकलतास्तंभकुड्यमालशबरीवधूनिगडलं-
बोत्तरस्तनोर्द्धिकासंयतीखलीनवायसकपित्थशीर्षोत्कंपितमूकांगुलिभ्रूकुटीवारुणीप्रेक्षारूपा एकोनविंश-
ति । इदानीं नामतोऽभिहितानेतानेव स्वरूपतो विवृणोति । आसोव्व विसममपायं आउंटावित्तु ठाइ उस्सग्गे । कंपइ काउ-
स्सग्गे लयव्व खरपवणसंगेणं ॥५४॥ खंभे वा कुड्डे वा अवठंभिय कुणइ काउस्सग्गं तु । माले य उत्तमंगं अवठुंभिय कुणइ
उस्सग्गे ॥५५॥ सबरी वसणविरहिया करेहिं सागारियं जह ठवेइ । ठविय गुज्झुद्देसं करेहिं इय कुणइ उस्सग्गे ५ अवणा

मिउत्तमंगो काउस्सग्गो जह कुलवहुव्व नियलियउ वि २ चरणे वित्थारिय अहव मेलविउं काऊण चोलपट्टं अवही
ए नाहिमंडलस्सुवरि हेट्ठा य जाणुमित्तं चिट्ठइ लंबुत्तरुस्सग्गो ८ उच्छाइऊण य थणे चोलगपट्टेण ठाइ उस्सग्गे दंसाइर
क्खणट्ठा अहवा अन्नाणभोगदोसेहिं ५९ मेलित्तु पण्हियाउ चलणे वित्थारिऊण बाहिरउ ठाउस्सग्गं एसो बाहिरउद्धी मुणे ३
यव्वो ६० अंगुट्ठे मेलविउं वित्थारिय पण्हियाउ बाहिंतो ठाउस्सग्गं एसो भणिउ अब्भिंतरुद्धि त्ति ६१ कप्पं वा पट्टं वा
पाउणिउं संजइव्व उस्सग्गे ठाइ य खलिणं व जहा रयहरणं अग्गउ काउं ६२ भामेइ तहा दिट्ठिं चलचित्तो वायसो व्व
उस्सग्गे छप्पइयाण भएणं कुणेइ य पट्टं कविट्ठं व ६३ सीसं पकंपमाणो जक्खाइट्ठो व्व कुणइ उस्सग्गं मूउ व्व हुहुयं
तो तहेव छिज्जंतमाईसु ६४ अंगुलिभमुहाउ वि य चालिंतो कुणइ तह य उस्सग्गं आलावगगणणट्ठा संठवणत्थं व जो
गाणं ६५ काउस्सग्गम्मि ठिउ सुरा जहा बुडबुडेइ अव्वत्तं अणुपेहंतो तह वानरो व्व चालेइ उट्ठउडे ६६ आकुंचितस्यैक ६९
पादस्य घोटकस्येवस्थानं घोटकदोषः कंपते कायोत्सर्गे लतेव खरपवनसंगेनेति लतादोषः स्तंभे वा कुड्ये वा अवष्टभ्य
स्थानं स्तंभकुड्यदोषः तथा माले उपरितनभागे उत्तमांगमवष्टभ्य करोत्युत्सर्गमिति मालदोषः शबरीपुलिंदिका वसनवि
रहिता कराभ्यां सागारिकं गुह्यं यथा स्थगयति एवं स्थगयित्वा गुह्यदेशं कराभ्यां करोत्युत्सर्गमिति शबरदोषः कृत्वा वा

४ शबरीदोषः अवनामितोत्तमांगः कुलवधूरिव तिष्ठन् करोत्युत्सर्गमिति वधूदोषः निगडनियंत्रित इव चरणौ विस्तार्य वा मीलयित्वा करोत्युत्सर्गमिति ४ ३ १

लपट्टमविधिना नाभिमंडलस्योपरि अधस्ताच्च जानुमात्रं तिष्ठ कायोत्सर्गे इति लंबोत्तरदोषः अवछाद्य स्थगयित्वा ति
स्तनौ चोलपट्टेन दंशादीनां रक्षणार्थं अनाभोगदोषेण करोत्युत्सर्गमिति स्तनदोषः ऊर्द्धिकादोषो द्विधा बाह्योर्द्धिका
दोषोऽभ्यंतरोर्द्धिकादोषश्च तत्र चरणावपि क्रमेण हि मीलयित्वा पार्ष्णी चरणाग्रभागे विस्तार्य बाह्यतो बहिर्मुखं तिष्ठ
त उत्सर्गे एष बहिःशकटोर्द्धिकादोषो ज्ञातव्यः तथांगुष्ठौ मीलयित्वा विस्तार्य पार्ष्णी तु बाह्यतस्तिष्ठत उत्सर्गे एष पुनरि
तोऽभ्यंतरशकटोर्द्धिकादोषः कल्पं वा पटीं पट्टं वा चोलपट्टं संयतीवत्स्कंधदेशयोः प्रावृत्य तिष्ठत्युत्सर्गे इति संज
तीदोषः खलीनमिव कविकमिव रजोहरणमग्रतः कृत्वा तिष्ठत्युत्सर्गे इति खलीनदोषः वा उ समुच्चये अन्ये खली
नार्त्त वाजिवदूर्ध्वाधः शिरःकंपनं खलीनदोषमाहुः तथा दृष्टिं भ्रमयति चलचित्तो वायसवदितस्ततो नयनगोलक
भ्रमणं दिग्निरीक्षणं वा कुरुते उत्सर्गे इति वायसदोषः षट्पदिकाभयेन कपित्थवद्वृत्ताकारत्वेन संवर्त्य जंघादिम
ध्ये पट्टं कृत्वा तिष्ठत्युत्सर्गे इति कपित्थदोषः एवमेव मुष्टिं वृत्वा वस्थानमित्यन्ये भूतावेश इव शीर्षं कंपयतः कायोत्स
र्गकरणं शीर्षोत्कंपितदोषः तथा छिद्यमानेषु केनचित् हुहु इत्यादिना कायोत्सर्गे अधःस्थितप्रसाहस्तदेशवर्जितबुड
२६ रितादिषु तन्निवारणार्थं मूकवत् हुंहुं इति अव्यक्तं कुर्वन् तिष्ठत्युत्सर्गे मूकदोषः तथा आलापकगणनार्थं मंगल्या आलपन्

तथा योगानां संस्थापनार्थं आपातांतरनिःसरणार्थं भ्रुवौ चालयन् भ्रूसंज्ञां कुर्वन् च कार्यादेवमेव वा भ्रूमन्तं
कुर्वन् कायोत्सर्गे तिष्ठतीत्यंगुलिभ्रूदोषः तथा कायोत्सर्गस्थितो निःपद्यमानस्वरं बुडबुडायमानमव्यक्तशब्दं क
रोतीति वारुणीदोषः वारुणी मद्यं सैव घूर्णमानं स्थाने वारुणीदोषः इत्यमेव अनुप्रेक्षामाणो नमस्कारादिकं
चिंतयन् कायोत्सर्गस्थितो वानरवच्चालयत्योष्ठपुटानीति प्रेक्षादोषः इत्येकोनविंशतिः अन्ये त्वेकविंशतिमप्यमंसत
तत्र स्तंभकुड्यदोषेण स्तंभदोषः कुड्यदोषश्चेति ग्रंथाग्रं २००० द्वौ विवक्षितौ तथांगुलिदोषो भ्रूदोषश्चेत्येवमेक
विंशतिः एके वा मानयि कायोत्सर्गदोषानाहुः यथा तिष्ठीरवं वपुः स्पर्शः प्रपंचबहुला स्थितिः सत्त्वोदितविधे
र्नोत्तरयोपेक्षा विवर्जनं कालापेक्षा अतिक्रांतिर्व्याक्षेपासक्तचित्तता लोभाकुलितचित्तत्वं पापकार्योद्यमः प
रः कार्याकृत्यविमूढत्वं पट्टकाद्युपरिस्थितिरिति इत्यादिदोषानुपसंहरन्नाह २१ काउस्सग्गं कुणमाणेण विबुहे
णं दोसा उ सम्मं परिहरियव्वा जिणपडिकुट्ठत्ति काऊणं एते पूर्वभणिता दोषाः कायोत्सर्गं कुर्वता विबुधेन सम्यक्प
रिहर्तव्या जिनैस्तीर्थकरैः प्रतिषिद्धा निवारिता इति कृत्वा जिनाज्ञाकारणो हि सर्वत्रोपयोग इति अयं च कायोत्सर्ग
एतैर्दोषैर्विरहितः शिष्टकारी इत्युच्छ्वसनेऽपि न भज्यते तथाहि अन्नत्थ ऊससिएणमित्यादिना आगारेहिं अ

भग्गो अविराहिओ हुज्ज मे काउस्सग्गोत्ति एवमादिभिरागारैर्विराधितोऽपि न भंगः ननु नमस्का
रमेवाभिधाय किमिति तत्क्षणं न करोति उच्यते नात्र नमस्कारेण पारणमेवाविशिष्टं कायोत्सर्गमाने क्रियते
किंतु येन यत्परिमाणः कायोत्सर्गः उक्तस्तावन्तं कालं प्रतीक्ष्य ततः नमस्कारमपठित्वा पारयतो भंगः तस्मात्
यो यत्परिमाणः कायोत्सर्गस्तस्मिन् पूर्णे एव नमो अरिहंताणमिति वक्तव्यमिति तथा मार्जारमूषकादेः पुरोग
मने यतः सरतोऽपि न भंगः तथा चौरसंभ्रमे राजसंभ्रमे वास्थानेऽपि नमस्कारमुच्चारयतो न भंगः तथा सर्पदष्टे आत्मा
नं परं वा साधुं दृष्ट्वा सहसा उच्चारयतो भंगो नेति ॥ इदानीं चउवीसगसमुद्दिसगं दिवसपडिक्कमणाइमाणमिति वृद्ध
द्वारं विवृण्वन्नाह मणसंलेहणपच्चक्खाणकम्माणं इअपज्जेयं बारसतव विरियत्तिगं परणसम्मत्ता इ पत्तेयं
इयं च संलेहणाप्रत्यतिचारा इति सर्वत्र योगपंचदशकर्माणि कर्मादानानि ज्ञानादिषु ज्ञानदर्शनचारित्रेषु प्रत्ये
कं स्वे स्वे अष्टकत्रयस्मीलनेन चतुर्विंशतिर्भवन्ति विंशतिस्त्रिषु जाता अतुभत्त्वाणिगत द्वादश तपसि तपो विषये
अनुमत्तु समीकमिदं दृष्ट्वा चउश्चत्वारि शम्यप्रद्युम्नसुप्रसिद्धेषु वर्षपंचाशत् ज्ञानानि वीर्यत्रिके मनोवचनकायवीर्यल
क्षणे त्रस सम्यक्त्वे पंच मार्गीयेत्रके स्थिते एकोनषष्टिर्जाता सम्यक्त्वे पंचातीचारा एवं पंच प्रसिद्धे वत्रुः षष्टिर्जाता तथा

प्र·सा·वृ·
७१

[illegible] तथा [illegible] [illegible] त्रुटा [illegible] कारे [illegible] निका [illegible]
[illegible] [illegible] अनुप्रेक्षा [illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible] एते [illegible]
[illegible] [illegible] [illegible]
[illegible] [illegible] ७ त्ते प
[illegible] त्रतासमणव्रतानां दीनि शुद्धपालनेषु प्रमत्ते रूपं चातीचाराः इति
त्र तेषु षष्ठिः एते च मिलिता अष्टाविंशत्यधिकं शतं इदानीं क्रमेणोपवर्णितानतिचारानस्य पमेव आचष्टे इह परलोका
संप्रयुगमरणं च जीविताशंसा कामभोगेष्वनहो मरणान्ते य च आराधना आशंसनमाशंसा भिलाषस्तस्याः प्र
योगो व्यापारः [illegible] करणमाशंसाप्रयोगः आशंसैव वा प्रयोगो व्यापारः आशंसाप्रयोगस्तत्र इहास्मिन् प्रज्ञापक म
नुष्यापेक्षया मानुषत्वपर्यायेणोवर्त्तते लोकः प्राणिवर्गः मनुष्यलोकस्तद्व्यतिरिक्तस्तु परलोकस्तत्रेहलोके प्रति आ ७१

शंसाप्रयोगो यथानेनाराधनादिकष्टेन मत्तः सकलन्यग्रत्वद्विपघटोद्धुरतरत्नतरतुंगतुरंगराजीविराजमानसुंदरमं
दुराततकांतकांचननिःसपत्नरत्नौघं इममणिरवरप्रमुखमहासमृद्धिसंभारविनिर्जितवैश्रमणाकोशः क्षितिपति
र्विशुद्धिबुद्धिरमात्यो वा श्रेष्ठी वा जन्मांतरे अहं भवेयमित्येवं नरस्यादिसमृद्धिप्रार्थना तथा परलोकाशंसा
प्रयोगः कमनीयकामिनीनयनानलिननिपीयमानललितलावण्यपुण्यपीयूषः सुरपतिरहं स्यां देवो वा इत्यादि
प्रार्थना तथा मरणाशंसाप्रयोगस्तथाविधमानसेव्यप्रतिपन्नानशनो लोकैः क्रियमाणमभावनात्काशिप्र
ज्ञायभावेनाकृतप्रयोगवीशस्यो वा यद्यहं कटिति म्रिये तदा भद्रं भवेदिति प्रार्थना तथा जीवितं प्राणधारणं
प्रसांशसा यात्तु [illegible] तस्य प्रयोगो यथा बहुकालमहं जीवेयमिति अपरिस्कलितानशनः कश्चित्कर्पूरश्रीचंद
नवस्त्रमाल्यधवलशासकादिविशिष्टपूजादर्शनात् बहुपरिवारावलोकनात् निरंतरागच्छद्बहुजननिकरेण धन्यो
ऽयं [illegible] दिक्रियमाणश्लाघाश्रवणात् सधादिधार्मिकजनोपबृंहणाच्चैवं मन्यते यथा प्रतिपन्ना
नशनस्यापि चिरं जीवनमेव श्रेयो यत एवं विधमद्गुद्देशेन मत्प्रासनप्रभावनाविष्टतिश्च वर्त्तते इति तथा कामौ श
ब्दरूपे भोगाः गंधरसस्पर्शास्तेषामाशंसा यथानेन कष्टाराधनाविधिना ममजन्मांतरे विशिष्टाः कामभोगाः संपद्यते

प्र॰सा॰वृ
७२

तदप्रमत्र्यभवलोकादिविरूपाणेन मरणेनेयं चातिचाराः एतैः समयविधिकृताराधना दूष्यंते इति न कर्त्त-
व्या एवंविधा यतउक्तं आशंसया विनिर्मुक्तोऽनुष्ठानं सदैवमाचरेत मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तमः पन्नरसक-
म्मत्ति आख्यायते तत्राह भाडीफोडीसाडी वणअंगार सरूवकम्मादाणि वाणिज्जाणि विसलक्खदंतरसकेसविसयाणि
७० दुव्वाणिज्जत्ताहणा २ निल्लंछणअसईपोससहियाणि सजलासयसोसाणि यकम्मादं हवंति पन्नरस ७१
तत्र भाटककर्म यत्स्वकीयगंत्र्यादिना परकीयभांडं भाटकेन वहति अन्येषां वा बलीवर्द्दशकटादीन् भाटके-
नैवार्प्पयति यदाहुः नियएण उवगरणेणं परकीयं भांडएण जो वहइ तं भाडुकम्म महत्तावसहाइसमप्पणे अन्ने-
सिंति फोडित्ति स्फोटकर्म्म वापीकूपतडागादिखननं यद्वा हलकुद्दालादिना भूमेर्दारणं पाषाणघट्टनं वा यदा-
दिधान्यानां सक्त्वादिकरणेन विक्रयो वा यदुक्तं यव वण पागोहुमगामास कारिय भइ धन्नाणं सत्तुयदा-
लिकणिक्कातंदुलकारणाइ फोडयणं अहवा फोडीकम्मं सीरेणं भूमिफोडणं जंतु उक्तं पंचतहा यत्तिलकु- ७२
दृणं तंचेति। साडीति शाकटकर्म्म शकटानां शकटांगानां च चक्रादीनां स्वयं परेण वा इत्निष्पादनं
विक्रयो वा [illegible] यदाहुः शकटानां तदंगानां घटने खेटने तथा विक्रयश्चेति शाकटजीविका परिकीर्तिता वणत्ति

वनकर्म्म यत्छिन्नानामछिन्नानां च वनस्पतीनां पत्राणां पुष्पाणां फलानां च विक्रयणं इत्निकृतेन वनकर्म्म न
था त्रुस्फोटकर्मत्वेनोक्तं मुद्गादिकणानां घरदादिना दूधीकरणं दालादिरूपेणो धूमादीनां घरट्टशिलापुत्रकादि-
नाचूर्णीकरणे पिष्टकादिरूपमपि वनकर्मेति केचिन्मन्यंते यदाहुः न्नवनपत्रप्रसूनफलविक्रयः कणः छिन्नाछि
णानां दलने पेषाद्वृत्तिश्च वनजीविका अंगारेत्ति अंगारकर्म्म यदंगारकरणपूर्वकं तद्विक्रयणं तत्पापलक्षणं
मन्यदपि यदग्निसमारंभपूर्वकमिष्टकाभांडादिपाकभ्राष्ट्रादिकरणेन जीवनं तदप्यंगारकर्म्म यदाहुः अंगार-
विक्रयं इट्टयाणं कुंभारलोहगाराणं सुन्नारभाडभुंजाइयाणकम्मं तमिंगाले अतिचारता चैतेषां कृते तत्ससा-
ख्यानस्य अनाभोगादिना अत्रैव प्रवृत्तेरेव मन्यत्रापीति एतत्स्वरूपाणि कर्म्माणि पंच तथा वाणिज्जानि क्रयविक्र-
यस्वरूपाणि च समुच्चये विषलाक्षारदंतरसकेशविषयाणि तत्र विषवाणिज्यं विषं शृंगकतालपुटादि तच्चोपल-
क्षणमन्येषां जीवघातहेतूनामुपविषाणामस्त्रादीनां च तेषां विक्रयो यदाहुः विसवाणिज्जं भन्नइ विसलोह-
प्याणं हणणविक्रयणो धनुहसरखग्गाउलियायरसुपकुद्दालमाईणं तथा लाक्षावाणिज्यं बहुजीवजालकस्या-
नं लाक्षादिविक्रयो यदाहुः लक्काधाइयगुलियामणसिलहरियालवज्जलेवाणं विक्कणा उस्कवाणिज्जं तु री

संकुरस्यमार्गणं तथादंतवाणिज्यंयत्रप्रथमतएवपुलिंदादीनांहस्तिदंतशंखपूतिकेसचर्मकेशादीनामानयन
निमित्तंमूल्यंददाति आकरेवागत्वास्वयंक्रीणाति ततस्तेवनचरागत्वाहस्त्यादीन्तदर्थंघ्नंति तद्विक्रयप्र
वंयदाजीवनंतद्दंतवाणिज्यंयदवोचत् नहदंतचमरखज्ञाभेरिकुवरायमित्थिसंखाय कछुरिपयूयरस
गाइयंचइहदंतवाणिज्जं अनाकरेतुदंतादेर्ग्रहणविक्रयणेचनदोषः तथारसवाणिज्यंमद्यादेर्विक्रयोयदप्य
भाष्ये मधुमज्जमंसमक्खणवउराइविगईणजंमिहविक्कणणंरसवाणिज्जं जहदुद्धतिल्लघयदहियपभिई
णं तथाकेशवाणिज्यंयत्रदासीदासहस्त्यश्वगवोष्ट्रादिजीवान्गृहीत्वान्यत्रविक्रीणीतेजीविकानि
मित्तंतत्केशवाणिज्यंयदाहु मणुयाणंतिरियाणंविक्किणणंकेसअन्नदेसेवाकेसवाणिज्जंदासीभत्तइगो
गदहआसगाईण सजीवानांविक्रयः केशवाणिज्यमजीवानांतुजीवानांजीवांगानांविक्रयोदंतवाणिज्य ७३
मिति विवेकः तथादवदानंयंत्रवाहणंनिर्लांछनं असतीपोषः एतैःसहितानिसरहृजलाशयशोषाणिच स ७४
मन्नपेकर्माणिभवंति पंचदशानिदवदानंदवस्यदावाग्नेस्तृणादिदहननिमित्तंदानंवितरणंदवदानंतच्चद्विधा
भवति व्यसनात्पुण्यनिरपेक्षप्रवृत्तिरूपात् तथावनेचराएवमेवतृणादावग्निंज्वालयंति पुण्यबुद्ध्यावायथा

मेमरणसमयेदह्यंतोममश्रेयार्थंधर्मदीपोत्सवाःकार्याः इति अथवाजीर्णतृणदाहेसतिनवतृणांकुरोद्भे
दाद्गावश्चरंतीति क्षेत्रेवासस्यसंपत्तिनिमित्तमग्निंज्वालयंतीति यदुक्तं वणदवदाणमन्नेदवग्गिदाणंतुजी
ववहेज्जणाय यंत्रवाहनमिति तिलेक्षुसर्षपएरंडफलादिपीलननिमित्तं नेत्रदीत्राएणंघाणकादीनामरघ
ट्टादिजलयंत्राणांच वाहनमापाणांशिलो उखलमुसलादीनांविक्रयणंवायंत्रवाहनं यंत्रपीडनकर्मेत्य ७५
र्थः उक्तंच सिलउक्खलमुसलघरट्टकमाईण जंमिहविक्किणणंउच्छुतिलपीलणंवातंवितीजंतपीलणयं ए
तच्चपीलनीयतिलादिसोदानद्रतजीववधात्तसदोषं यतोलौकिकाअपिभाषंते दशशूनासमंचक्रंदशचक्रि
दशवेश्या समोध्वजः दशध्वजसमावेश्या समोनृपः इतिभूम्आखेटिकः ध्वजं कल्लपालंनिर्लांछनमितितत् असर्पंतां
नमेगायवच्छेदंतेनकर्मजीविकानिर्लांछनकर्मतत्र गोमहिषादीनांनासावेधोगवाश्वादीनामंकनंतेषामेव
वर्द्धितकीकरणंकरभाणांपृष्ठगालनंगवांचकर्णकंबलछेदनादिकमिति यदाहुः नासावेधांकनंमुष्कछेदनंपृ ७६
ष्ठगालनंकर्मकंबलविच्छेदोनिर्लांछनमुद्दिष्टंइति असतीपोषइति असत्योदुःशीलास्तासांदासीसारिकादीनां
पोषणंपोषोअसतीपोषस्तच्चालिंगमतेनैतेनशुककुक्कुटादीनामपिपुंसांपोषणमसतीपोषः यदवाचिमज्जारमोरमक्क

इकुव्वुरसालरहियकुत्तुरराईणं इहिस्थि नपुंसाईणपोसणं असइपोसणमिति एषां च पोषणं पापहेतुरेवेति तथा
जलाशयशोषो जलाशयानां सरः प्रभृतीनां शोषणमिति तदुक्तं सरदहतलायसोसो बहुजलमज्झेवारपयक्का
रा एतानि पंचदशापि कर्मादानानि प्रतिषिद्धानि बुद्धिधनैः विवेकिभिः पापहेतुत्वात् वर्जनीयानि उपलक्षणं चैत
तत्तद्बहुसावद्यानां कर्मणामेवं जातीयानां न पुनः परिगणितमिति नालोचितानं दर्शनचारित्राणां प्रसे
कृतमध्यादतीचारमालिन्यलक्षणानां च प्रतिपक्षो ज्ञानाचारलक्षणान् ज्ञानेप्सितयुक्तानामवेतीनहलाग्रतः ज्ञा
नाचारं तथाहि काले १ विणए २ बहुमाणे ३ उवहाणे तह अनिह्नवणे ४ वंजण ५ अत्थ ६ तदुभए ७ अट्ठविहो नाण
मायारो कालेका विधेयस्तत्र तावत्कालवत्ती त्रिसत्त्वसंबंधः तत्रयोगपत्संगप्रविष्टादेः श्रुतस्य कालउक्तः स्तस्मिन्ने रा
वस्वाध्यायः कार्यो नान्यदा प्रसंगापत्तेः संभवात् दृश्यते च लोकेपि कृष्यादेः कालकरणे फलं विपर्यये तु विपर्ययः
ति यदुक्तं कालम्मिकीरमाणं किसिकम्मं बहुफलं जहा भणियं इय सव्वच्चियकिरिया नियनियकालम्मि कायव्वे ७४
त्ति तथा विणएत्ति तथा विनये विनयविषये ज्ञानस्य ज्ञानिनां ज्ञानसाधनानां च पुस्तकादीनामुपचाररूपः प्रतो
विनयेनासनदानादेः करणादिना पाठनीयं नतु पुनरविनयेन आसनदानाद्यकरणेन तथा बहुमानः प्रीतिस्तद्विष

येपतोव बहुमानेनैवोत्तरोत्तरप्रमोदलक्षणेन पठनादि विधेयं नतु नवे बहुमानाभावेन तथा उवहाणेत्ति उपस
मीपे धीयते नक्रीयते सूत्रादिकं येन तत् उपधानं तपो विशेषस्तद्विषये यदयस्य अध्ययनोद्देशकादेस्तपउ
क्तं तत्तपः कृत्वैव तस्य पाठादि विधेयं नान्यथेति तथा अनिह्नवणेत्ति तथा शब्दः समुच्चये तिहूवनमपत्र
न४ पनं निह्नवनं अनिह्नवनं तद्विषये यतोऽधिगतं येनैव पाठादि तस्यैव विधेयं नतु मानादिवशात् अन्यस्तेनोलाघ
वाधाशंकया श्रुतगुरुणां श्रुतस्य चापलापेनेति तथा वंजण अत्थ तदुभयेइति व्यंजनानि ककारादीनि अ
र्थो अभिधेयं तदुभयं च व्यंजनार्थं तयोरुभयंनतः समाहारं द्वन्द्वस्तद्विषये कोर्थो व्यंजनविषये अर्थविष
येतदुभयविषयेच ज्ञानाचारस्त्रयं भवति एतत्त्रयानन्यथाकरणेन सम्यगप्रयोगकरणेन च ततः सूत्रादि पठनीय
नान्यथा अत्र व्यंजनग्रहणमुपलक्षणं तस्य स्वरविन्दुमात्रा एवमष्टविधोऽष्टप्रकारो ज्ञानस्य श्रुतज्ञानस्याचारो ज्ञाना
धन तस्याराधनं व्यवहारइति अथ दर्शनाचारभेदानाह निस्संकिय १ निक्कंखिय २ निव्वितिगिच्छा अमूढदिट्ठी य
३ उववूह थिरीकरणे वच्छल्ल पभावणे अट्ठ शंकितं शंका संदेहस्तस्या भावो निःशंकितं दर्शनस्य सम्यक्त्वस्याचार इ
त्येवमग्रेपि तथा कांक्षितं कांक्षा अन्यान्य दर्शनग्रहरूपस्य भावो निःकांक्षितं तथा विचिकित्सा मतिविभ्रमः युक्त्या

प्र.सा.वृ. गमोपपन्नेष्वर्थेषु फलं प्रति संमोहः तदभावो निर्विचिकित्सं यद्वा विद्वज्जुगुप्सा मलमलिना एते साधवस्तेषां जुगुप्सा तदभा
७५ वो निर्विद्वज्जुगुप्सं तत न एष दोषः पुल्लिंगनिर्देशश्च प्राकृतत्वात् तथा अमूढा तपोविद्यातिशयादिकुतीर्थिकर्द्धि
दर्शनेऽप्यमोहस्वभावा स्वविचलितात्मा च सा दृष्टिश्च सम्यग्दर्शनं अमूढदृष्टिः अयं चानिर्दिष्टा शंकितादिभ्यो येते
निःशंकितनिःकांक्षितनिर्विचिकित्सा जीवाः अमूढा दृष्टिरस्येत्येवममूढदृष्टिश्च जीव एव तत एतेषां धर्मधर्मि
णोरभेदोपचारेण दर्शनाचारभेदा भवन्तीति तथा उपबृंहणा उपबृंहणं समानधार्मिकाणां क्षपणादीनां वैयावृत्यादि
सद्गुणप्रशंसनेन तद्वृद्धिकरणं स्थिरीकरणं तु धर्माद्विषीदतां तत्रैव चारुवचनैश्चातुर्यादस्थापनं उप
बृंहणं च स्थिरीकरणं च उपबृंहस्थिरीकरणे तथा वात्सल्यं च प्रभावना च वात्सल्यप्रभावने तत्र वात्सल्यं समा
नदेवगुरुधर्माणां तेषां भोजनवस्त्रदानोपकारादिभिः सम्मानं प्रभावना धर्मकथाप्रतिवादिनिर्जयदुष्करतप
श्चरणकरणादिभिर्जिनप्रवचनप्रकाशनं यद्यपि च प्रवचनं शाश्वतत्वात्तीर्थकरभाषितत्वात्सुरासुरनमस्कृ ७५
तत्वात् स्वयमेव दीप्यते तथापि दर्शनशुद्धिमात्मनोऽभीप्सुर्यो येन गुणेनाधिकः स तेन तत्प्रवचनं प्रभावयति
यथा भगवदार्यवज्रस्वामिप्रभृतयः इति एते अष्टौ दर्शनाचाराः संप्रति चारित्राचारमाह पणिहाणजोगजुत्तो पंच

हिं समिईहिं तीहिं गुत्तीहिं चरणायारो विवरीय पाइ तिरहिपि अट्ठ आयारा प्रणिधानं चेतःस्वास्थ्यं तत्प्रधाना योगा
चा व्यापाराः प्रणिधानयोगास्तैर्युक्तोऽसमन्वितो यः साधुः पंचभिः समितिभिस्तिसृभि गुप्तिभिः कृत्वा अथवा सुपंचा
सु यो भवतीति वचनात्सप्तम्यर्थे तृतीया ततः पंचसु समितिषु तिसृषु गुप्तिषु विषये एतासामासेवनप्रणिधानयो
गयुक्तो यः स एष चरणाचारो ज्ञानाचारवतो कथंचिदभेदादिति ज्ञेय इति शेषः एतेषां त्रयाणामपि ज्ञानाचारादी
नां विपर्ययस्त्रयाणामकालविनयादेः शंकितादेरप्रणिधानरूपाणां च सम्यगतिचारा भिन्ना मालिन्यलक्ष
णा इति वा समवसेयास्ततो तपआचारमाह अणसण १ मूणोयरिया २ वित्तीसंखेवणं रसच्चाओ कायकिलेसो संलीणया य
बज्झो तवो होइ पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ झाणं उस्सग्गोवि य अब्भिंतरओ तवो होइ तत्र अश्यते इ
ति अशनं न अशनं अनशनं आहारत्याग इत्यर्थः तच्च द्विधा इत्वरं यावत्कथिकं च तत्रेत्वरं परिमितकालं तच्च पुनः
श्रीमतां वीरतीर्थे नमस्कारसहितादि षण्मासान्तं श्रीनाभेयतीर्थे संवत्सरपर्यन्तं मध्यमतीर्थकरतीर्थेष्वष्टमासा
न्तं यावत्कथिकं पुनराजन्मभावि तच्च त्रिधा चेष्टाभेदोपाधिविशेषतस्त्रिधा यथा पादपोपगमनं इंगितमरणं भक्तपरि
ज्ञा चेति एतेषां त्रयाणामपि स्वरूपं सप्रपंचं सप्तदशाधिकशततमद्वारे वक्ष्यमिति १ ऊनोपरियमितिकृत्वा उदरं ऊ

नोदरंतस्य करणं भावे वुत्प्रिऊनोदरिकायुक्तिरेयमस्य मह्विणिन्नानामावेसादिधा द्रव्यतो भावतश्च द्रव्यतउप
करणभक्तपानविषया तत्र उपकरणविषया नोदरिका जिनकल्पिकादीनां तदभ्यासपराणामेव बोद्धव्या न
पुनरन्येषां तेषामुपध्यभावे समग्रसंयमपालनाभावात् अन्येषामप्यतिरिक्तोपकरणाग्रहणतो भवत्येवोनोदरता
ह यत उक्तं जं वट्टइ उवयारे उवगरणं तं च होइ उवगरणं अइरित्तं अहिगरणं अजउ अजयं परिहरंतो इति परिहरंतो
त्ति आसेवमानः परिहारो परिभोग इति वचनात् यतो अयतश्च असमीभुंजानो भवतीत्यर्थः भक्त[illegible]पानोनोद
रिका पुनरात्मीयाहारमानपरित्यागतो विज्ञेया आहारमानं च बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ
उ पुरिसस्स महिलियाए अट्ठावीसं भवे कवला कवलस्य परिमाणं कुक्कुडिअंडगपमाणमेत्तं तु जं वा अ
छ विगयवयणो वयणंमि छुभिज्ज वीसंतो इत्यादि द्वात्रिंशत्कवलान् अष्टाविंशतिर्नार्याः पंचविंशतिः षंढा
विंशतिर्नपुंसकस्याहारस्त्वाहारादिभेदतः पंचविधा भवति यदाहुः अप्पाहार अवड्ढा दुभागपत्ता तहेव किंचू
णा अट्ठदुवालस सोलस चउवीस तहेक्कतीसा य अपमत्तभावार्थः अल्पाहारोनोदरिका नाम एककवलादारभ्य
यावदष्टौ कवला इति अत्र चैककवलमाना जघन्या अष्टकवलमाना पुनरुत्कृष्टा द्व्यादिकवलमानभेदा मध्यमा ए

वं नवभ्यः कवलेभ्य आरभ्य यावद्द्वादश कवलास्तावदपार्द्धोनोदरिका अत्रापि नवकवला जघन्या द्वादशकवला उ
त्कृष्टा मध्यमा शेषास्तु एवं त्रयोदशेभ्य आरभ्य यावत्षोडश कवलास्तावद्विभागोनोदरिका जघन्यादिभेदत्रय भा
वना पूर्ववत् एवं सप्तदशभ्य आरभ्य यावच्चतुर्विंशतिकवलास्तावत्प्राप्तोनोदरिका एवं पंचविंशतेरारभ्य याव
देकत्रिंशत्कवलास्तावत्किंचिदूनोदरिका जघन्यादिभेदत्रयं पूर्ववद्भावनीयं एवमनेनानुसारेण पानेपि भ
णनीया तथा स्त्रीणामप्येवं स्वस्वानुसारेणाद्रष्टव्या भावतऊनोदरिका क्रोधादिपरित्यागो यत उक्तं कोहाई
णमणुदिणं चाउ जिणवयणभावणाओ य भावेणोणोदरिया पन्नत्ता वीयरागेहिं वित्तीसंखेवणंति वर्त्तेतेः
नयेति वृत्तिर्भैक्षं तस्याः संक्षेपणं संकोचनं तच्च गोचराभिग्रहरूपं ते च गोचरविषया अभिग्रहा अनेकरूपास्तद्यथा
द्रव्यतः क्षेत्रतः कालतो भावतश्च तत्र द्रव्यतो मया अद्य अभिस्सावर्णगतेन लेपकार्यादिवस्तुना यदि सस्पृष्टनमस्कारादिवा
ग्राह्यमित्यादयः क्षेत्रतः एकद्व्यादिगृहस्वग्रामपरग्रामपेपर्यंपदिकयामकेनदेहलीजंघयोरंतर्विधायवा
दत्तंग्राह्यमित्यादयः कालतः पूर्वाह्णादौ सकलभिक्षाचरनिवर्त्तनावसरे वा यदि लभ्यमित्यादयः भावतो हस
न्गायनरोदनादिक्रियाप्रवृत्तो बद्धो वा यदि दास्यति तदाहं ग्रहीष्यामीत्यादयः यस्मान्नदिनं तदापेसेवमादयः उक्तं च लेवडम

लेवउं वा अमुगं दव्वं च अज्ज घेत्ताभि अमुगेण वा दव्वेणं अह दव्वाभिग्गहो नाम अमुगेणं ति चट्टुककरोटिका
दिना अट्ठउ गोयरभूमीए लुयत्ति एलुकं भित्तुं ग्रहणं च सग्रामपरग्रामे एवइयघराउ खेत्ताभिग्गहो अ गंतुं पच्चा
गयत्तो पुन्निपायपयंगविही पेडा य अद्धपेडा अ जा तरबहिं संबुक्का काले अभिग्गहो पुण आईमज्झे तहेव अव
साणे अप्पत्ते सइकाले आईमज्झे तइय उभयतीतमित्त्वा वेलायां आदौ मध्ये अवसाने च कालविषयोऽभि
ग्रहः तथा च अप्राप्ते सति भिक्षाकाले अवतः आदिः प्रथमः मध्ये भिक्षाकाल एवगारतो द्वितीयः अंते भिक्षाका
लावसाने इत्तरतीयोऽभिग्रहः दितं गपडिठुगाणं हवेज्ज सूहमं पि माकुअ विपंत्तं इट्ठे अप्पत्ते अइएपव
त्ते तमा अउमसे उक्खित्तमाइ चरगा भावजुआ खलु अभिग्गहा हुंति गायंतो य रुयंतो जं देइ निसन्नमाई वा
उक्खित्तमाइ चरगत्ति उक्खित्तमाइचर उक्खिप्तभाजनात् पिंडे चरति गच्छति यः स उक्खित्तचरए वं निक्खित्तभाजना
दावपि भावनीयं उस्सक्कण अहिसक्कण परंमुहालंकिय नरो वावि भावन्नायरेण जुउ अह भावाभिग्गहो नाम रस
परिच्चाउत्ति रसानाम मधुपुत्तोपादि छिरूचताधिकारहेतूनां दुग्धादीनां त्यागो वर्जनं रसत्यागः का
यकिलेसोत्ति कायस्य शरीरस्य क्लेशः शास्त्रादित्यविरोधेन बाधनं कायक्लेशः स च वीरासनादासनकरणेन प्र

तकर्म्मशरीरत्वे केशलुंचनादिना च विविधः यदवाचि वीरासणाउक्कडुगासणाई लोयाईउ य विन्नेउ कायकि
लेसो संसारवासनिव्वेयहेउत्ति वीरासणाइसु गुणा कायनिरोहो दया य जीवेसु परलोगमईयं तह य बहुमाणो व
अन्नेसिं निस्संगया य सम्महा वपु कम्मविवज्जणेण लोयगुणा दुक्करसहत्तं नरगाइभावणाए य निव्वेउ संलीण
याइत्ति संलीनता गुप्तता सा चेंद्रियकषाययोगविषया विविक्तशयनासनता वेति चतुर्द्धा यदुक्तं इंदियकसाय
जोए य पडुच्च संलीणया मुणेयव्वा तह य विवित्तचरियायं पन्नत्ता वीयरागेहिं तत्थ सवणिंदिएण सद्देसु मधुरामधु
रादिभेदेषु रागद्वेषाकरणं श्रवणेंद्रियसंलीनता यदाह सद्देसु य भद्दयपावएसु सोयविसयमुवगएसु तुट्ठेण
व रुट्ठेण व समणेण सया न होयव्वं एवं च चक्षुरादींद्रियेष्वपि भावनीयं यथा रूवेसु य भद्दयपावएसु चक्खुविसय
मुवगएसु तुट्ठेण व रुट्ठेण व चेत्यादि अभिलापेनेति कषायसंलीनता कषायाणामनुदीर्णानामुदयनिरोधेन उदीर्णा
नां च विफलीकरणेन विज्ञेया यदभ्यधायि उदयस्सेव निरोहो उदयपत्ताण वि फलीकरणं जं इत्थ कसाईयाणं कसा
यसंलीणया एसा इत्यादि योगसंलीनता पुनर्मनोवाक्काययोगानामकुशलानां निरोधः कुशलानामुदीर
णं च यदवोचत अपसत्थाण निरोहो जोगाणमुदीरणं च कुसलाणं कज्जंमि य विहिगमणं जोगे संलीणया भणिया

प्र·सा·टी· यात्रिविक्रिरायनासननता ५ प्रा पुनः संलीनता आसणमाइसुत्ती यत्रुपंडकादिरहितेषुपह्नवस्थानेषु परारूढं सर्वथः
७८ आसणमुज्झाण इसुत्थी पसुपंडविवज्जिए ठाणे फलगाईणं यं गहणं तह भणिय एसणिज्जाणं च समुच्चये वस्त्रात न४
वो हो इति एतदनशनादिकं बाह्यं तपो भवति बाह्यत्वं चास्य बाह्यस्य स्याधेयत्वात् मायो बहिः शरीरस्य तापक
त्वात् लौकिकैरपि तपस्त्या ज्ञायमानत्वात् कुतीर्थिकैरपि स्वाभिप्रायेण सेव्यमानत्वाच्चेति पायच्छित्तमिच्चा
दि इह चित्तं जीवो भण्णते ततः प्रायो बाहुल्येन चित्तं जीवं विशोधयति मलोत्तरगुणविषया तिचारजनित कर्म
मलमलिनं निर्मलं करोतीति प्रायश्चित्तं तच्च नवालोचनादिकं दशधा यदाहुः आलोयण पडिक्कमणे मीस वि
वेगे तह विउस्सग्गे तवछेयमूल अणवठ्ठयायपारंचिए चेवेति एतत्स्वरूपं चाष्टानवतिद्वारे संस्कणवसते वि
णयत्ति विनयः क्लेशयति अष्टप्रकारं कर्मेति विनयः स च ज्ञानदर्शनादिभेदात् सप्तधा यदाहुः नाणे दंसण
चरणे मणवयकाउवयारिउ विणउ नाणे पंचपयारो मइनाणाईण सद्दहणं भत्ती तह बहुमाणो तद्दिठ्ठत्थाण स ७८
म्मभावणया विहिगहणब्भासो विय एसो विणउ जिणाभिहिउ श्रुश्रूषणादिकश्च दर्शनविनयो यदाहुः सुस्सूसणा
अणासायणा य विणउ दंसणो दुविहो दंसणगुणाहिएसु किज्जइ सुस्सूसणा विणउ सक्कारब्भुट्ठाणे सम्माण अभि

गहो तह य आसणाणुप्पयाणं किइकम्मं अंजलिगहो य इंतस्स भिगच्छणया ठियस्स तह पज्जुवासणा भिहि
या गच्छंताणुव्वयणं एसो सुस्सूसणा विणउ सत्कारः स्तववन्दनादिः अभ्युत्थानं विनयार्हस्य दर्शनादेवासनस ज्ज
नेन सन्मानो वस्त्रपात्रादिभिः पूजनं आसनाभिग्रहः पुनस्तिष्ठत एव गुरोरादरेणासनानयनपूर्वकमत्रोपविशत
ति भणनं आसनानुप्रदानं स्थानात् स्थानान्तरे आसनस्य संचारणं कृतिकर्म वंदनकं अंजलिग्रहो अंजलिकर
णं शेषं प्रकटं अनाशातनाविनयः पुनः पंचदशविधः तस्य चेदं स्वरूपं तित्थयर धम्म आयरिय वायगे थेर कुल
गणे संघे संभोइयकिरियाए मइनाणाईण य तहेव सांभोगिका एकसामाचारीकाः क्रिया आस्तिकता का यव्वा
पुण भत्ती बहुमाणो तह य वन्नवाउ य अरहंतमाईयाणं केवलनाणवसाणाणं भक्तिर्बाह्या प्रतिपत्तिः ब
हुमानश्चान्तरः प्रीतिविशेषः वर्णवादः गुणग्रहणं चारित्रविनयः पुनः सामाइयाइचरणस्स सद्दहणं तहेव काएणं
संफासणं परूवणमह पुरउ भव्वसत्ताणं नवीं मणवयकाय विणउ आयरियाईण सव्वकालंपि अकुसलमण
रोहो कुसलाण उदीरणं तह य तथा उपचारेण सुखकारि क्रियाविशेषेण निर्वृत्त उप चारिकः स चासौ विनय
श्च औपचारिक विनयः स च सप्तधा अब्भासच्छणं छंदाणुवत्तणं कयपडिकिइ तह य कारियनिमित्तकरणं दुक्खत्त

प्र·सा·वृ·

७९ गवेसणं तह य तहदेसकालजाणणमह चउत्थं तु तह य अणुमई भणिया उवयारिउ विणओ एसो भणिउ समा-
सेणं तत्राभ्यासस्थानमिति श्रुतार्थिना निमित्तेनाचार्यस्याभ्यासे प्रसादसन्निध्यानम् अन्यथा छंदो अभिप्रायो गुरू-
णामनुवर्त्तनीयस्तथा कृतप्रतिकृतिः कृतभक्तादिनाउपचारे प्रसन्ना गुरवः प्रतिकृतिं प्रत्युपकारं सूत्रार्था-
दिदानतो मे करिष्यंति न तु मे कर्मनिर्जरेति भक्तादिदाने गुरोर्यतितव्यं तथा कार्यनिमित्तकरणं कार्यं श्रुतमा-
पणादिकं निमित्तं हेतुं कृत्वा श्रुतमापितो हमनेनेति हेतोरित्यर्थः विशेषेण तस्य विनये वर्त्तितव्यं तदनुष्ठानं च
कर्त्तव्यं यदुक्तं भवति तेन सम्यक्सूत्रार्थमध्यापितेन पुनस्तन्निमित्तं करणं विनयस्य विधानं कार्यं निमित्तकर-
णं गुरूणां सम्यक्सूत्रादिकं पाठिते न विनयेन विशेषतो विनये वर्त्तितव्यं तदुक्तार्थमनुष्ठानं च कर्त्तव्यमि-
तिभावः तथा दुःखार्त्तस्य दुःखपीडितस्य गवेषणमौषधादिना प्रतिजागरणं दुःखार्त्तगवेषणं पीडितस्योपकार- ७९
करणमित्यर्थः तथा देशकालज्ञानमवसरज्ञतेत्यर्थः तथा सर्वार्थेषु गुरुविषयेष्वनुमतिरानुकूल्यं अथवा द्विवचा-
चादूर्ध्वं विनयः सप्तपंचषष्ठिहावस्ततो वैयावृत्त्यमिति आपिपर्त्तिस्कोति आपतस्तस्य भावो वैयावृत्त्यं धर्मसाधनार्थं
मन्नादिदानमित्यर्थः यदाह वेयावच्चं वावडभावो इह धम्मसाहणनिमित्तं अन्नाइयाण विहिणा संपायणमेस भाव।

स्यो तदेव सज्झाउत्ति सुष्ठु आमर्यादया कालवेलापरिहारेण पौरुष्यपेक्षया वा अध्यायोऽध्ययनं स्वाध्यायः स
च पंचधा वाचना प्रच्छना परावर्त्तनानुप्रेक्षाधर्मकथाभेदात् तत्र वाचना शिष्याध्यापनं गृहीतवाचनेनापि
संशयोत्पत्तौ पुनः प्रष्टव्यमिति पृष्टाधीतस्य सूत्रादेः शंकितादौ प्रश्नः प्रच्छना प्रच्छितं विशोधितस्य मा भूद्वि-
स्मरणमिति परिवर्त्तना सूत्रस्य घोषादिविशुद्धं गुणनमित्यर्थः सूत्रवदर्थोपि संभवति विस्मरणमतोऽनुप्रेक्ष-
णं ग्रंथार्थस्य मनसाभ्यासो ऽनुप्रेक्षा चिंतनिकेत्यर्थः एवमभ्यस्तश्रुतेन धर्मकथा कर्त्तव्येति धर्मस्य श्रुत-
रूपस्य कथा आख्या धर्मकथेति झाणेत्ति ध्यायते चिंत्यते वस्त्वनेनेति ध्यातिर्वा ध्यानं अंतर्मुहूर्त्तमात्र-
कालमेकाग्रचित्ताध्यवसानं यदाह अंतोमुहुत्तमेत्तं चित्तावत्थाणमेगवत्थुंमि छउमत्थाणं झाणं जोगनि-
रोहो जिणाणं तु तच्चतुर्द्धा आर्त्त रौद्र धर्म शुक्ल भेदात् तत्र ऋतं दुःखं तस्य निमित्तं तत्र वा भवं ऋते वा पीडिते भवमा-
र्त्तमिति भवमार्त्तं तच्चामनोज्ञानां शब्दरूपरसस्पर्शगंधलक्षणानां विषयाणां तदाश्रयभूतवस्तूनां वा स-
म्प्रयुक्तानां विप्रयोगप्रणिधानं भाविनां वा असंप्रयोगचिंतनं १ एवं शूलशिरोरोगादिवेदनायाः अपि विप्रयोगा-
संप्रयोगप्रार्थनं २ इष्टानां शब्दादिविषयाणां सातवेदनायाश्च अविप्रयोग संप्रयोगप्रार्थनं ३ देवेन्द्रचक्रवर्त्यादिप्रार्थनं

४ शोकाक्रंदनस्वदेहताडनविलपनादिलक्षणलक्ष्यं तिर्यग्गतिगमनकारणं विज्ञेयं तथा रौद्रध्यानमपि निर्द
द्रःप्राणिवधादिपरिणतस्यात्मनोवर्त्तमानस्यरौद्रकर्मणो रौद्रं तदपि सत्वेषुवधबंधनदहनांकनमारणादिप्रणिधानेन रुस
तोभिद्रोकृतपरंपरोपघातपरव्यापारप्रधानविषयसाधकद्रव्यसंरक्षणप्रणिधानेन च ४ उत्सन्नवधादिलिंगगम्यं
नारकगतिगमनकारणं च ज्ञेयं तथा धर्मः क्षमादिदशलक्षणस्तस्मादनपेतं धर्म्यं तच्च सर्वज्ञाज्ञानुचिंतनं १
रागद्वेषकषायेंद्रियवशजन्तूनामपायविचिंतनं २ ज्ञानावरणादिशुभाशुभकर्मविपाकस्मरणं ३ क्षितिवलयद्वी
पसमुद्रप्रभृतिवस्तुसंस्थानादिधर्मालोचनात्मकं ४ जिनप्रणीतभावश्रद्धानादिलिंगगम्यं देवगत्यादिफलसाध
कं ज्ञातव्यं तथा शोधयत्यष्टप्रकारं कर्ममलं शुचं वा शोकं क्लमयति अपनयतीति निरुक्तविधिना शुक्लमेतदपि पृ
थक्त्वश्रुतानुसारिनानानयानेकद्रव्योत्पत्तिस्थितिभंगादिपर्यायानुस्मरणादिस्वरूपं चतुर्धा क्षमामार्दवादिलिंगग
म्यं मोक्षादिफलसाधकं विज्ञेयं अत्र धर्म्यशुक्ले एव तपसी निर्जरार्थत्वात् नार्त्तरौद्रे बंधहेतुत्वादिति ७ उत्सर्गो विप ८०
त्ति उत्सर्जनीयस्य परित्यागः उत्सर्गः स च द्विविधो बाह्य आभ्यंतरश्च तत्र बाह्यो द्वादशादिभेदस्योपधेरतिरि
क्तस्यानेषणीयस्यान्नपानादेर्वा त्यागः आभ्यंतरः कषायाणां मरणकाले शरीरस्य च त्यागः ननु उत्सर्गः प्रायश्चित्तम

ध्ये एवोक्तस्तत्किं पुनरत्र भणनेनेति न सत्यं सातिचारविशुद्ध्यर्थमुक्तः अयं तु सामान्येन निर्जरार्थं इत्यपौनरुक्त्यं अ
ब्भिंतर उ तवो होइ त्ति इदं प्रायश्चित्तादिकं तपो यत् तदनुष्ठानं लौकिकैरनभिलक्ष्यत्वात् तत्त्वांतरपि च भावतो
अनासेव्यमानत्वात् मोक्षावाप्तौ अंतरंगत्वाद्भ्यंतरस्य कर्मणस्तापत्वाद्भ्यंतरं तत् गीतमर्थैर्भगवद्भिर्ज्ञातं मा
नत्वाच्चाभ्यंतरं तपो भवतीति एतेषां कथमतीचारत्वं भवति आह सम्ममकरणे बारसतववायारे तिगं तु वि
रियस्स मणवयकाया पावपउत्ता वीरियतिगपयाराउ एतेषामनशनादीनां द्वादशानां तपोभेदानां सम्यगकर
णे विपरीततया न्यूनाधिक्येन वा अनुपायेन स्थितानुष्ठानरूपे अतिचारा अपि द्वादश भवंति अथ वीर्यत्रिकाति
चारानाह तिगं तु विरियस्स त्रिवीर्यस्य मनोवाक्कायाः सत्वकत्वात्तत्त्र्यस्य मनोवाक्कायव्यापाराः ते च पापप्रयुक्ताः
पापनिषेधप्रयुक्ताः संतो वीर्यत्रिकातिचाराः भवंति पणसम्मत्ति आइसा पतेसंकाकंखा यत्तहा विनिगिछा
अन्नतित्थियपसंसा परितित्थुवसेवणा मइयमाणयं च सम्मत्ते ७८ शंकाकांक्षा तत्पा विचिकित्सा अन्यतीर्थिक
प्रशंसा परतीर्थिकोपसेवनं अतिचाराः पंच सम्यक्त्वे भवंतीति तत्र शंका भगवदर्हत्प्रणीतेषु पदार्थेषु धर्मास्ति
कायादिष्वत्यंतगहनेषु मतिदौर्बल्यात्सम्यगनवधार्यमाणेषु संशयः किमेवं स्यान्नैवमिति या शंका संशयकरणं

केति सा च शंका द्विभेदा देशशंका सर्वशंका च देशशंका देशविषया जीवाद्यस्तित्वे सत्यपि तत्पर्यायेषु देशगोचरा यथा किं यथा
अस्ति जीवः केवलं सर्वगतोऽसर्वगतो वा सप्रदेशोऽप्रदेशो वेति सर्वशंका सर्वविषया यथा अस्ति धर्मो नास्ति वेति इ
यं च द्विधापि शंका भगवदर्हत्प्रणीतवचने प्रत्ययाभावात् सम्यक्त्वं दूषयतीत्यतिचारः केवलागमगम्यानपि हि भावानस्मदादि प्रमाणागोचरानपेक्ष्य आप्तप्रणीतत्वात् सर्वं तथेति श्रद्धेयं यत्रापि मतिदौर्बल्यादिभिर्मोहित्वा
शास्त्रार्थानवबोधः संशयो भवति तत्राप्यप्रतिहतत्वेन सर्वज्ञस्य यथार्थवादित्वं परिभाव्य ... विरहितत्वात् वितथवा
दिता प्रतिपादनं अनादीयतां च हेतुदाहरणासंभवे यत्सम्यक् तज्जन्मबुद्धिज्ञानस्वल्पमवमत्य वितर्कनहावितं
[illegible] निरारंभ श्रेणुवंकप्यपराण्युत्तरपरायणात्तं जिनाज्ञगणवरा जिनरागदोषमोहा नान्यथावादिनस्ते ॥
कस्यैकस्याप्यरोचनाद्भक्तस्यापि भवति नरः मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितमेकस्मिन्नप्यर्थे संदिग्ध
प्रत्ययो ऽर्हतिहितत्वात् मिथ्यावदर्शनं सत्त्वादिहेतुभंगमा ... तिरस्कर्तः कांक्षा ... मदर्शनाग्रहः सा च सर्वविषया
देशविषया च तत्र सर्वविषया सर्वपाखंडिधर्मकांक्षा स्यात् यथा परिव्राजकभौतिकब्राह्मणादयो विषयसुख
मुक्तोऽपि परलोके सुखेन युज्यन्त इति साधीयानेतदीयोऽपि धर्मः देशकांक्षा त्वेकादिदर्शनविषया यथा सुगतेन भ

गवता भिक्षूणामक्लेशकाऽधर्म उपदिष्टः स्नानान्नपानाच्छादनशयनादिषु सुखानुभवद्वारेण यदाह मृद्वी शय्या
प्रातरुत्थाय पेया भक्तं मध्ये पानकं चापराह्णे द्राक्षाखंडं शर्करा चार्धरात्रे मोक्षश्चान्ते शाक्यसिंहेन दृष्टः इति एत
स्मात्तद्दर्शनमपेक्षा भक्तं मध्ये पानकं चापराह्णे द्राक्षाखंडं शर्करा चार्धरात्रे मोक्षश्चान्ते शाक्यसिंहेन दृष्टः इति एत
मात्तदुत्थायपेया मक्तं मध्येपान कं चापराह्णे ... भगवदर्हत्प्रणीतागमानाश्वासरूपत्वात् सम्यक्त्वं दूषयतीत्यतिचा
रः विचिकित्सा फलं प्रति संदेहः सत्त्वस्यापि प्रमाणयुक्तागमोपपन्नेऽप्यर्थे तद्धर्मे ऽस्य दुष्प्रापस्य महतस्तप
श्चरणादेरनुष्ठानस्य किमपि फलं स्यादुत न स्यादिति उत्स
स्लेशस्य मयापि विधीयमानस्य सिकताकणकवलवन्निःस्वादस्यायत्यां फलसंपत्स्यते न वेति कृषीवलादीनामिव
क्लेशमात्रमेवेदं निर्जराफलविकलमितिद्विधापि हि क्रिया वीक्ष्यते सफला अफला च कृषीवलादीनाम
ध्यमपि क्रिया तथा संभाव्यते न त्वेवं चिंतयति यथा पूर्वपुरुषा ज्ञाने रिय... ऽपि इति सफल जो गो
... एषापि विचिकित्सा क्रियमाणा भगवद्वचनानाश्वास
मेदसुपधीसंयमा विराहिवनत्रहमेतत्फलमिति एषा विचिकित्सा भिन्न ... इति वाच्यं यतः
रूपत्वेन सम्यक्त्वस्य दूषकत्वादतिचारः न चेयं शंकातो न भिद्यते शंका एवं शंका वि
षयत्वेन सम्यक्त्वस्य दूषकत्वादतिचारः नचेयं शंकातो न भिद्यते इति ... एवं शंका वि
शंका सकलासकलपदार्थभाक्त्वेन द्रव्यगुणविषया इयं तु क्रियाफलविषयैवेति भेदो भवत्येव
विचिकित्सा त्वस्य या ... विचिकित्सा निंदा साधु सदाचारसाधु विषया यथा स्नाने नग्नत्वे च
विचिकित्सा त्वमेवेति ...

मलत्वादुर्गंधिवपुरेवंते महानुभावाः कोदोषस्याद्यदि प्रासुकजलेनांगप्रक्षालनं कुर्वीरन्निति एवं कुत्सा वि
चिकित्सा विधीयमाना जनगवर्ज्जिताभ्यासमहूपत्वात् सम्यक्त्वं दूषयतीत्यतिचारः तथान्यतीर्थिकप्रशंसा अन्य
तीर्थिकाः सौगतभौतिकादयस्तेषां प्रशंसा स्तुतिः होएतेषां राजपूज्यत्वमहो एतेषां सर्वज्ञजन्मामतमहोदुष्यवै
दुष्यादिगुणासमृद्धिः एवमादि तेषां प्रशंसा प्रत्ययमानानां चित्तस्थितां मूढलोकस्य सम्यक्त्वं दूषयतीत्यतिचारः
तथा परतीर्थिकोपसेवनं परतीर्थिकैः सह एकत्र संवासास्वालापादिजनितः परिचयः तदपि सम्यक्त्वं दू
षयतीत्यतिचारः यतः एकत्रवासे तत्प्रक्रियादर्शनश्रवणाभ्यां दृढसम्यक्त्वस्यापि सम्यक्त्वहानिः संभाव्य
ते किमुत मंदबुद्धेर्नवधर्मस्येति ननु दर्शनाचारप्रतिपादयता तद्विपक्षस्तत्पादर्शनस्याप्युक्तातिचाराः प्र
तिपादितास्तत्र नस्तत्रापि शंकाकांक्षाविचिकित्सा अत्रापि चेति कथं नयोरन्यत्वं तत्र ब्रूमः पूर्वं निःशंकितत्वाद्य
भावमात्रमतिचारतया प्रतिपादि इह तु जीवादिविषयशंकादिस्तद्भाव इति न कश्चिद्दोषः इहैवातिचाराधि
कारात् नयमत्वाश्रयेण न सम्यक्त्वे सबलतामात्रं निश्चयनयमते तु समस्तस्याभाव एव तथा चोक्तं एकस्मिन्न ८२
प्यर्थे दृष्टादि अश्रद्दधानेति वितथ तद्देशो भोजनपानयोर्निषेधादि पद्वत्सुष्पदीनां क्रियमाणातिचारः प्रथमव्रत

× अ गाहा ॥ पढमव्वयस्स अइयारा नरतिरियाणन्नपाणवोच्छेओ । बंधो वहो य अइभारारोवणं तह छविच्छेओ ॥ २९ प्रथमव्रते प्राणातिपातविरमणे
लक्षणे नरतिरश्चां अन्नपानव्यवच्छेदस्तथा बंधश्च अतिभारारोपणं तथा छविच्छेदः एते पंच अतिचारा मालिन्यरूपा भवन्ति तत्र अन्नपान व्यव × ३. १

स्य न तु यस्यैवं ज्वरादिरोगाक्रान्तानां पुत्रादीनां लंघनादिविधापने गृहीतहिंसाविरमणव्रतस्यातीचारो भवत्य
ति तदयुक्तं सोपस्कारत्वात् सूत्राणि भवंति ततः क्रोधादिवशात् इति सूत्रे अध्याहार्यं ततः क्रोधादिदूषितमना
यद्यन्नादिनिषेधं करोति तदैतीचारोऽपरावे तु हितबुद्ध्या रोगाद्यभिभूतानां पुत्रादीनामन्नादिनिषेधं करोति त
दानातिचार इति एवमन्यत्रापि क्रोधादिवशात् इति द्रष्टव्यं नचैतदनार्षं यतोऽन्यत्राप्यधापि बंधवहच्छविच्छे
ए अइभारे भत्तपाणवोच्छेउ कोहाइदूसियमणो गोमणुयाईणं नो कुणइ इत्यादि किं च रुजाद्यभि
भूतानां यत्तापचनादिपरिहारेण पुत्रादीनां पथ्यं तिकृते उपवासादिकारणं तत्रातिचार इष्यते तथा वधोऽ
रज्ज्वादिना गोमनुष्यादीनां नियंत्रणस्य पुत्रादीनामपि विनयग्राहणार्थं क्रियते ततः क्रोधादिवशात् तस्यापि सं
बंधनीयमतः प्रवर्त्तनकषायोदयाद्बंधसोऽतिचार इति तथा नु धोलकुटादिना हननं कषायोदेवत्वधः स्से त
था अतिभारारोपणमंति मात्रस्य वोढुमशक्यस्य भारस्यारोपणं गोकरभरासभमनुष्यादेः स्कंधे पृष्ठे शिरसि वा
वहनायाधिरोपणं इहापि क्रोधाल्लोभाद्वा यदधिकभारस्याधिरोपणं सोऽतिचार इति तथा छविच्छेदः छवि
कृते योगाद्धि शरीरमपि छविस्तस्याः छेदो द्वैधीकरणं स च पापदवल्मीकापहनस प्रमादेनापि क्रियते ततः क्रोधा

ध॰सा॰वृ॰ दिवसात् रुस्नापि च दर्पमिति अत्र चावश्यकचूर्ण्यादिभणितो विधिरयं बंधो द्विपदानां चतुष्पदानां वा स्यात्सो
८३ ऽपि सार्थकोऽनर्थको वा स्यात् तत्रानर्थकस्तावद्विधातुं न युज्यते सार्थकः पुनरयं द्विविधः सापेक्षो निरपेक्षश्च त
त्र सापेक्षो यो दामग्रंथिना शिथिलेन यश्च प्रदीपनादिषु मोचयितुं छेत्तुं वा शक्यते निरपेक्षः पुनर्यन्निश्चलमत्यर्थं
बध्यते एवं तावच्चतुष्पदानां बंधो द्विपदानामपि दासदासीचौरपाठादिप्रमत्तपुत्रादीनां यदि बध्यते तदा सविक्र
माणा एव ते बंधनीया रक्षणीयाश्च यथाग्निभयादिषु न विनश्यंति द्विपदचतुष्पदाः श्रावकेण त एव संग्रही
तव्या ये अबद्धा एवासत इति तथा वधो विच्छेदोपि तथैव नवरं निरपेक्षो हस्तपादकर्णनासिकादि यन्निर्दयं छिनत्ति
सापेक्षः पुनर्यद्गंडं वारुषं वा छिंद्यात् दहेद्वेति तथा अतिभारो अपि नारोपयितव्यः प्रथममेव हि या द्विपदादिवाहनेन
जीविका सा श्रावकेण मोक्तव्या अथ सा न मुच्यते तदा द्विपदो यं भारं स्वयमुत्क्षिपति अवतारयति च तं वाह्य
ते चतुष्पदस्य तु यथोचितभारः किंचिदूनः क्रियते हलशकटादिषु पुनरुचितवेलायामसौ मुत्कलयति तथा वधोपि म ८३
हारस्तथैव नवरं निरपेक्षः प्रहारो निर्दयं ताडना सापेक्षस्य पुनरेवं यथा श्रावकेणादित एव भीतपर्षदा भवितव्य
यदि पुनः कोपि न करोति विनयं तदा तं मर्माणि मुक्त्वा लतया दवरकेण वा सकृद् द्विर्वा ताडयेदिति तथा अन्नपाना

दिनिषेधः कस्यापि न करणीयः तीव्रबुभुक्षो म्रियेत्तापि अतः स्वभोजनवेलायां ज्वरितादीन्विमुच्य नियमत
एवान्नान्विधतान् भोजयित्वा स्वयं भुंजीत अन्नादिनिरोधोपि सार्थकानर्थकादिभेदाद्बंधवद् दृष्टव्यः नवरं सापे
क्षो रोगचिकित्सार्थं स्यात् अपराधकारिणं च वाचैव वदेद् अद्य ते भोजनादि दास्यत इति प्रयतिनिमित्तं चोप
वासादि कारयेत किं बहुना मूलगुणस्यातिचारो यथा न भवति तथा यतितव्यं ननु हिंसैव श्रावकेण प्रत्या
ख्याता ततो बंधादिकरणेपि न कश्चिद्दोषो हिंसाविरतेरखंडितत्वात् बंधादयोपि प्रत्याख्याता इति तत्करणे
व्रतभंग एव भवेत् विरतेः खंडनात् अपि च बंधादीनां प्रत्याख्येयत्वे विवक्षिते व्रतेयत्ता विशीर्येत प्रतिव्रतमति चा
रव्रतानामाधिक्यादिति एवं च बंधादीनामनतिचारतेति अत्रोच्यते सत्यं हिंसैव प्रत्याख्याता न बंधादयस्केवल
तत्प्रत्याख्यानेर्थतस्तेपि प्रत्याख्याता दृष्टव्याः हिंसोपायत्वात् तेषां न च बंधादिकरणेपि व्रतभंगः किंत्वति
चार एव कथं इह द्विविधं व्रतमंतर्वृत्त्या बहिर्वृत्त्या च तत्र मारयामीति विकल्पाभावेन यदा कोपावेशात्पर
स्य प्राणव्यपरोपणमविगणयन् बंधादौ प्रवर्त्तते न च प्राणविघातो भवति तदा निर्दयतया विरत्यनपेक्षप्रवृत्तित्वेनांतर्वृ
त्त्या व्रतस्य भंगो हिंसाया अभावाच्च बहिर्वृत्त्यापालनमिति देशस्य भंजनाद्देशस्य च पालनादतिचारव्यपदेशः

प्र·सा·टी· प्रवर्त्तते यदाह ॥ न मारयामीति कृतव्रतस्य विनैव मृत्युं क इहातिचारः । निगद्यते यः कुपितो वधादीन्करोत्यसौ स्यान्नि
८५ यमानपेक्षः ॥ मृत्योरभावान्नियमोस्ति तस्य कोपाद्दयाहीनतया तु भग्नः । देशस्य भंगादनुपालनाच्च पूज्या अतिचारमुदा
हरंति ॥ यच्चोक्तं व्रतेयत्ता विशीर्यत इति तदयुक्तं विशुद्ध्या हिंसाद्यभावे हि वधादीनामभावः एवं ततः स्थितमेतद्व
धादयोऽतिचाराः एवं बंधादिग्रहणस्योपलक्षणत्वान्मंत्रतंत्रप्रयोगादयोप्यतिचारतया विज्ञेया इति ॥ द्वितीयव
व्रतातिचारानाह ॥ सहसाकलंकणं १ रहसदूसणं २ दारमंतभेयं च ३ तह कूडलेहकरणं ४ मुसोवएसो ५ मुसादोसा
८ ॥ सहसानालोच्य कलंकनं कलंकस्य करणं मभ्याख्यानमसद्दोषस्यारोपणमिति यावत् चोरस्त्वं पारदारिकस्त्वमि
त्यादि प्रथमोऽतिचारः ननु सहसाकलंकनमसद्दोषाभिधानरूपत्वेन मृषावादत्वाद्भंग एव नत्वतिचार इति सत्यं किं
तु यदा परोपघातकमनाभोगादिनाभिधत्ते तदा संक्लेशाभावेन व्रतसापेक्षत्वान्न भंगः परोपघातहेतुत्वाच्च भंग इत्य
भंगाभंगरूपोऽतिचारो यदा तु तीव्रसंक्लेशादभ्याख्याति तदा भंग एव व्रतनिरपेक्षत्वादिति तथा रहः एकांतस्त ८४
त्र भवं रहस्यं राजादिकार्यसंबद्धं यद्यस्मै न कथ्यते तस्य दूषणं अनधिकृतेनैवाकारेंगितादिभिर्ज्ञात्वान्यस्मै
वा प्रकाशनं रहस्यदूषणं यथा रहसि निमंत्रयमाणानस्मानालोच्यमानान्कांश्चिदवलोक्य गृहीततदाकारः कश्चिदसे

नेंगिताकारादिकारकमिदमिदं च मंत्रयंते यद्वा रहस्यदूषणं पैशून्यं यथा द्वयोः प्रीतौ सत्यामेकस्याकारादि
नोपलभ्याभिप्रायं विज्ञायान्यस्मै तथा कथयति यथा प्रीतिः प्रणश्यति इति द्वितीयोऽतिचारः तथा दाराणां क
लत्रादीनामुपलक्षणत्वान्मित्रादीनां च मंत्रो मंत्रणं तस्य भेदः प्रकाशनं दारमंत्रभेदः अस्य चानुवादरूपत्वेन सत्य
त्वाद्यद्यपि नातिचारत्वं घटते तथापि विश्रंभभाषितार्थप्रकटनजनितलज्जादितः कलत्रमित्रादेर्मरणादि
संभवेन परमार्थतोऽस्यासत्यत्वात् कथंचिद्भंगरूपत्वेनातिचारतैव रहस्यदूषणे हि रहस्यमाकारादिना विज्ञाया
धिकृत एव प्रकाशयति इह तु मंत्रयितैव स्वयं मंत्रं भिनत्तीत्यनयोर्भेदः इति तृतीयोऽतिचारः तथा कूटस्यास
द्भूतस्य लेखो लेखनं कूटलेखस्य करणं एतच्च यद्यपि कायेनासत्यं वाचं न वदामि स्वयं न वादयामीत्यस्य वा व्र
तस्य भंग एव तथापि सहसाकारानाभोगादिनातिक्रमादिना वातिचारः अथवा असत्यमित्यसत्यभणनं मया प्र
त्याख्यातमिदं तु लेखनमिति भावनया व्रतसापेक्षस्यातिचार एवेति चतुर्थोऽतिचारः मृषा अलीकं तस्योपदेशो
मृषोपदेशः इदमेवं च ब्रूहि त्वमेवं वद एवं त्वमभिदध्याः कूटलेखो हिंसादिकमसत्याभिधानेऽन्यस्य प्रदानमित्यर्थः इ
ह व्रतसंरक्षणानुध्यायापरवृत्तान्तकथनद्वारेण मृषोपदेशं यच्छतः पंचमोऽतिचारः व्रतसापेक्षत्वेन मृषावादे परं व

र्जनेन च भयाभग्नस्य स्वात्सख्य उपलक्षणत्वान्निकृतिप्रधानशास्त्राद्यापनेऽप्यतिचार इति भावः ॥ द्वितीय
व्रतातिचारः ॥ अथ तृतीयव्रतातिचारानाह ॥ चोराणीयं चोरप्पयोगं कूडमाणतुलकरणं रिउरज्जववहारो सरि
सजुई तप्पडिरूवं ॥ ८२ ॥ चौरैरानीतमाहृतं चौराणीतं कनकवस्त्रादिकं अत्र च प्राकृते आदानपदाध्याहारात् तस्यादा
नं मूल्येन मुधिकया वा ग्रहणं चौराणीतं हि काणक्रयेण मुधिकया वा प्रच्छन्नं गृह्णन् चौर एव भवति तस्मै चौर्यकर
णाद् व्रतभंगो वाणिज्यमेव मया विधीयते न तु चौर्यमित्यध्यवसायेन व्रतसापेक्षत्वाच्च न भंग इति भंगाभंग
रूपः प्रथमोऽतिचारः १ तथा चौराणां प्रयोजनं व्यापारणं चौरप्रयोगः हरत यूयमिति हरणक्रियायां प्रेरणाः यद्वा चौ
राणां प्रयोगो उपकरणानि कुशिकाकर्त्तरिकाघर्घरिकादीनि तेषामर्पणं विक्रयणं वा उपहारात् चौरप्रयोगस्त
तो ज्ञातः चौरप्रयोगो नामातिचारः ॥ आह तत्वावृत्तेन परस्वं कृत्यं अत्र यद्यपि चौर्यं न करोमि न कारयामीत्येवं प्रतिपन्नव्रत ८२
स्य चौरप्रयोगो व्रतभंग एव तथापि किमधुना यूयं निर्व्यापारास्तिष्ठत यदि भवतां भोजनादि नास्ति तदाहं तद्ददामि
भवदानीतमोषस्य वा यदि विक्रायको न विद्यते तदाहं तद्विक्रेष्ये इत्येवंविधवचनैश्चौरान् व्यापारयतः स्वकल्पनया चौर्य
परिहारतो व्रतसापेक्षस्यासावतीचारः २ तृतीयः तथा मीयते येनेति मानं कुडवपलहस्तादि तुला प्रसिद्धैव

मानं च तुला च मानतुले च कूटमानतुले तयोः करणं हीनेन मानेन ददाति अधिकेन मानेन गृह्णाति एवं तुलयापि ३ च
तीयः तथा रिपोः राज्ञः संबंधिनि राज्ये निषिद्धे भूमिभागे कटके वा अनुज्ञातस्यातिक्रमेण व्यवहरणमिह
च यद्यपि स्वस्वामिनाऽननुज्ञातस्य परकटकादिप्रवेशस्य स्वामीजीवादत्तलक्षणयोगेन तद्देशोल्लंघिनां एव तस्य अ
विरुद्धराज्यातिक्रमकारिणां च चौर्यदंडयोगेनादत्ता
दानव्रतभंग एव तथापि विरुद्धराज्यातिक्रमं कुर्वता मया वाणिज्यमेव क्रियते न चौर्यमिति भावनया व्रतसापेक्ष
त्वात् लोके च चौरोऽयमिति व्यपदेशाभावाच्चातिचार इति ४ चतुर्थः तथा सदृशयुक्तिः सदृशानां वस्तूनां युक्तिर्मिश्रीकरणं
यथा व्रीहिषु पलंजि काकान्घृते वसादि तैले मूत्रादि जात्यसुवर्णरूप्ययोर्युक्तिसुवर्णरूप्ये मिश्रयित्वा व्यवहर
तीति पंचमः अत्र च कूटमानतुलादिव्यवहारः सदृशयुक्तिश्च परव्यंसनेन परधनग्रहणरूपत्वाद्भंग एव केवलं लो
कत्वनतादिकमेव चौर्यं न भवति इदं मया क्रियते इति भावनया व्रतसापेक्षत्वाद्वा अतिचारता इति च ५ तथा
यद्वा तेनैतिचाराः ॥ इदानीं चतुर्थव्रतातिचारानाह ॥ अपरिग्गहिया इत्तर परिग्गहिया गमणमित्थ हिय पंचउ स्सव एक्कामतिव्वहिला

सो अणंगकीला परविवाहे ८२ इत्वरमल्पमुच्यते तत्रेत्वरमल्पमपरिग्रहो यस्याः सा इत्वरपरिग्रहा इत्वरकालं परि

अहोपस्माःसातथाकालशब्दलोपो ऽत्र द्रष्टव्यः अथवा इत्वरी प्रतिपुरुषमयनशीला वेश्येत्यर्थः परिगृहीता इत्वरपरिग्र
हा किंचित्कालं भाटीप्रदानादिना संगृहीता इत्वरी चासौ परिग्रहा च तस्याः पुंवद्भावश्चात्र कार्यस्तां यद्गच्छेत्सेवते
गृहीतचतुर्थव्रतः सो ऽतिचारः इयमत्र भावना भाटीप्रदानादिना इत्वरकालं स्वीकारेण स्वकलत्रीकृत्य वेश्यां सेवमा
नस्य स्वमतिकल्पनया स्वदारत्वेन व्रतसापेक्षचित्तत्वान्न भंगो अल्पकालपरिग्रहाच्च वस्तुतो ऽकलत्रत्वाद्भंग इ
ति भंगाभंगरूपत्वादित्वरपरिग्रहां सेवमानस्य प्रथमो ऽतिचारः तथा ऽपरिगृहीता ऽन्यसत्कभाटिगृहीता वेश्या प्रो
षितभर्तृका स्वैरिणी कुलांगना वा अनाथा तामपि यन्तिस्लियहितां वा एवंविधां मतीयद्गच्छेत्सो ऽतिचार इतिसं
टंकः अपवानाभोगादिना ऽतिक्रमादिना वा ऽतिचारः एतौ च द्वावपीत्वरातिचारौ स्वदारसंतोषिण एव न तु परदा
रवर्जकस्य इत्वरपरिगृहीताया वेश्यात्वेना ऽपरिगृहीतायाश्च अनाथतयैव परदारत्वाभावात् शेषास्तु त्रयो ऽतिचारा द्वयोरपी
ति हरिभद्रसूरिमतं एतदेव च सूत्रानुपाति यदाह सदारसंतोसस्स इमे पंच अइयारा जाणियव्वा न समायरियव्व त्ति ८६
५२४ अन्ये त्वाहुः इत्वरपरिगृहीतापरिसेवने स्वदारसंतोषिणो ऽतिचारो यथा पूर्वं व्याख्यानं तथैव अपरिग्रहासेवनं
तु परदारवर्जिनो ऽतिचारो ऽपरिग्रहा हि वेश्या परदारवतां गृहीत्वा अन्यसत्कभाटिकामपि गच्छति तथा परदारगम

नदोषसंभवात्कथंचित्परदार [illegible] हि वेश्या परदारवतां गृहीत्वा अन्य [illegible]
[illegible] त्वाच्च भंगत्वेन वेश्यात्वाच्च अभंगत्वेन भंगाभंगरूपो ऽतिचार इति द्वितीयः अपरे पुनरन्यथा आहुः यथा प
रदारवज्जिणो पंच होंति तिन्नि उ सदारसंतुट्ठे इत्थीए तिन्नि पंच व भंगविगप्पेहिं अइयारा इयमत्र भावना इत्वर
कालं यावत्परेण भाट्यादिना परिगृहीतां वेश्यां तां गच्छतः परदारवर्जिनो भंगः कथंचित्परदारत्वात्तस्या लोके तु पर
दारत्वारूढेर्न भंग इति भंगाभंगरूपो ऽतिचारः अपरिगृहीतायामनाथकुलांगनायां गमने परदारवर्जिनः सो
ऽप्यतिचारः तत्कल्पनया परस्य भर्तुरभावेनापरदारत्वादभंगः लोके च परदारतया रूढेर्भंग इति पूर्ववदतिचारः
शेषास्तु त्रयो ऽतिचारा द्वयोरपि भवेयुः स्त्रियास्तु स्वदारसंतोषपरदारवर्जनयोर्न भेदः स्वपुरुषव्यतिरेकेणा
न्येषां परपुरुषत्वात् अमुं विचारं नाद्यस्तु त्रयः स्वदारसंतोषिणः इत्वरपुरुषविषयाः स्युः इति पंचवाक्यमाद्य
स्त्वा यदा स्वकीयपतिर्वारकदिने सपत्न्या परिगृहीतो भवति तदा सपत्नीवारकं विलुप्य परिभुंजानाया ऽतिचारः
द्वितीयस्तु अतिक्रमादिना पुरुषमभिसरंत्या ऽतिचारः ब्रह्मचारिणं वा स्वपतिमतिक्रमादिना अभिसरंत्या अतिचारः
शेषास्त्रयः स्त्रियाः पूर्ववदिति तथा कामे स्मरे तीव्रो गाढो ऽभिलाषः परिसक्तः समस्तकलव्यापारस्य तदेकाध्यवसाय

ष्य तदेकाध्यवसायतामरणीयं २००० मुखकमलकक्षोपस्थान्तरेष्वविरतं प्रक्षिप्य प्रजननेन महतीं वेलां।
यावन्निश्चलो मृत एवास्ते चटकवच्चटकायां मुहुर्मुहुः कामिन्यामारोहतीति तीव्रतया अनंग·कामः स च पुंसः
स्त्रीपुंनपुंसकसेवनेछा हस्तकर्मादीछा वा वेदोदयात् तथा स्त्रियोपि पुरुषनपुंसकस्त्रीसेवनेछा हस्तकर्मादी
छा वा नपुंसकस्यापि नपुंसकपुरुषस्त्रीसेवनेछा हस्तकर्मादीछा वा तेन तस्मिन्वा क्रीडा रमणमनंगक्रीडा स्व
लिंगेन कृतकृत्योपि योषितामवाच्यदेशं भूयोभूयः कुस्मति केशाकर्षणप्रहारदानदंतनखकदर्थनादिप्रकारै
श्च मोहनीयकर्मवशात् तथा क्रीडति यथा प्रबलो रागः प्रसूयते अथवा अंगं देहावयवो मैथुनापेक्षया योनि
र्मेहनं च तद्व्यतिरिक्तान्यनंगानि कुचकक्षोरुवदनादीनि तेषु क्रीडा इह च श्रावको अत्यंतपापभीरुतया ब्रह्मचर्यं
चिकीर्षुरपि यदा वेदोदयं सोढुं न शक्नोति तदा पापनामात्रार्थं स्वदारसंतोषादि प्रतिपद्यते मैथुनमात्रेणैव
च तथापतनायां संभवत्यां कामतीव्राभिलाषानंगक्रीडे अर्थतः प्रतिषिद्धे तत्सेवने च न कश्चिद्गुणः प्रत्युत राजयक्ष्मादयो
दोषा एव भवंति एवं प्रतिषिद्धाचरणाद्भंगो नियमाबाधनाच्चाभंग इत्यतिचारौ अन्ये त्वन्यथा अतिचारद्वयम ८७
भिभावयंति इत्वरात्तां लाषी निधुवनं तेषां न पापसाध्यानमिति स्वकलत्रमात्रे प्रवृत्तस्य परिहरतीति नालिंगनादि ग

परदारवर्जिनोपि यादारेषु निधुवनं परिहरतीत्यालिंगनादीनि कथंचिद्व्रतसापेक्षत्वादतिचारा इति तथा परेषां
स्वापत्यव्यतिरिक्तानां विवाहो विवाहकरणं कन्याफललिप्सया स्नेहसंबंधादिना वा परिणयनविधानमि-
दं च स्वकलत्रसंतोषवता स्वकलत्रासादारवर्जकेन तु स्वकलत्रवेश्याभ्यामन्यत्र मनोवाक्कायैर्मैथुनं न का
र्यं न कारयामीत्येवं यदा प्रतिपन्नं व्रतं भवति तदा परविवाहे मैथुनकारणमर्थतः प्रतिषिद्धमेव भवति मै
थुनव्रतकारी च मन्यते मया विवाह एवायं विधीयते न मैथुनं कार्यते इति व्रतसापेक्षत्वादतिचारः कन्या
फललिप्सा च सम्यग्दृष्टेरव्युत्पन्नावस्थायां संभवति मिथ्यादृष्टेः स्वभद्रकावस्थायामनुग्रहार्थं व्रतदाने साह
भवति ननु परविवाहवत् स्वापत्यविवाहेपि समान एवायं दोषः सत्यमेतत् परं यदि स्वकन्यादीनां विवाहो न
कार्यं तेन दा स्वच्छंदचारिणी भवेत् ततः शासनोपघातः स्यात् विहिते तु विवाहे पत्या नियंत्रितत्वेन न तथा भव
तीति यदाहुः पिता रक्षति कौमारे भर्त्ता रक्षति यौवने पुत्रश्च स्थाविरे भावे न स्त्री स्वातंत्र्यमर्हति यत्तु यादव
[illegible] कृष्णस्य चेटकराजस्य च निजापत्येष्वपि विवाहनियमः श्रूयते स चिंतकांतरसद्भावे सतीति द्रष्टव्यं मध्य
स्थितस्य चउत्थवए इति पदस्यात्रापि संबंधाच्चतुर्थव्रते एते पंचातिचाराः अथ पंचमव्रतातिचारानाह जोएइत्ते

प्र·सू·वृ·
८८

त्रवस्तूनि । १ रूप्यकनकयोर्घटिताघटितयोः धनधान्ययोः परिग्रहे बंधद्धानियमयत्नं ते ~ द्विपदानि चतुष्पदानि ग
प्रामं गोरेर्द्ध कुप्यसेवत्र अप्पधणो वहुसो इक्करेइं पंचमयम्मि सोसा धनधान्यादिवस्तुरूपनवविधपरिग्रहप्रमा
णस्यारूपे पंचमव्रते अतीचारा ज्ञातव्याः यथा योजयति द्वित्रसत्त्रनिएकत्रमेलयतीति तत्र क्षेत्रं भूमौ सस्योत्पत्तिभूमिः
सा त्रिविधं सेतुकेतूभयभेदात् तत्र सेतुक्षेत्रं अरघट्टादिजलेन सिच्यते केतुक्षेत्रं आकाशोदकनिष्पाद्यसस्यमुभ
यक्षेत्रं उभयापाद्यं लोकाशजलनिष्पाद्यसस्यं वास्तु गृहहट्टादिग्रामनगरादि च तत्र गृहं त्रिविधं खातं भूमिगृह
दि उच्छ्रितं प्रासादादि खातोच्छ्रितं भूमिगृहस्योपरि गृहादिसन्निवेशः क्षेत्राणि च वास्तूनि च क्षेत्रवास्तूनि तान्येक
त्र योजयति गृहीतपरिमाणव्रतेन एकेनविदेकं क्षेत्रं परिगृहीतं तस्य केनापि स्वकीयक्षेत्रेण तत्क्षेत्रं प्रत्यासन्नमेव
दीयते ततोऽसौ स्वकीयनियमभंगभयेन तत्सारदत्तं स्वकीयक्षेत्रेण सहयोजयति यथैकमेव द्वाभ्यामपि तावन्मा राम·
क्षेत्रं भवति एवं गृहादिकमपि परदत्तं वृत्तिभित्त्याद्यपनयनेन स्वकीयगृहादिनैक्यं करोति सतिचारः प्रथमः ८८
तथा रूप्यकनकादिसंख्या व्रतकाले चतुर्मासादिकालावधिना यत्परिमाणं गृहीतं तावत्तोऽधिकं जातं परस्मै
ददाति ततो यथा मम नियमभंगो न भवति नचैरं मम चतुर्मासादिनियमावधौ च समाप्ते अहमेतद् ग्रहीष्यामि

ष्येतदिति तु द्वितीयस्वजनेभ्यो ददत् व्रतसापेक्षत्वादतिचारत्वमिति द्वितीयः तथा धनधान्यपरिग्रहं बध्ना
तिसत्यीकृतमनुवति यावन्निजनियमपर्यंतं तत्र धनं गणिमधरिममेयपरीक्ष्यलक्षणं चतुर्धा गणिमं जा
इफलपूगफलादि धरिमं तु कुंकुमगुडादि मेयं चोप्पडिलोणादि परीक्ष्यं रत्नवस्त्रादिपरिच्छेद्यं धान्यं सप्तदशविधं
यवाङ्कः व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः अणवः प्रियंगुकोद्रवमकुष्टकाः शालिराढ
क्यः किंचकुलायकुलसणाः सणगहेमहपरशमानिसप्तदशधा मानीति धनं च धान्यं च धनधान्ये ते आसीयस्मात्कृत
धान्यादितत्कृतधनधान्यपरिमाणः कोऽपि पूर्वलभ्यमन्यद्वा धनादिकं कस्मादपि प्राप्तो लभ्यमानं नि
नीमेव यदि स्वगृहे एवैतत्समानयामि तदा नियमभंगो मे भवति अथ तत्र तेषु विक्रीतादौ सति दत्ते वा नि
यमावधौ त्वमहं समानेष्यामीति तु भावचननियंत्रणाद्यकेन मूढकादिवंधरूपेण वा सत्यंकारदानादि
रूपेण वा बंधनेन स्वीकृत्य परगृह एव तद्धनं वस्थापयति तदा तृतीयोऽतिचारः तथा द्विपदचतुष्पदाता
नि द्विपदानि कलत्रकर्मकरदासीदासकर्मकरपदात्यादीनि हंसमयूरकुक्कुटशुकसारिकाचकोरपारापतमर
मत प्रभृतीनि चत्वारि यस्य तानि येषां तानि चतुष्पदानि गोमहिषमेषाविककरभरासभतुरगहस्त्यादीनि तेषां

नियमकृतं धान्यस्य तिसोऽति चार इति संबंधः यथा किल केनापि संवत्सराद्यवधिना द्विपदचतुष्पदानां परिमाणं कृतं
तेषां च विवक्षितसंवत्सराद्यवधिमध्य एव प्रसवे ऽधिकद्विपदादिभावाद् व्रतभंगः स्यादिति तद्भयात् कियत्यपि काले ग
ते गर्भग्रहणतो गर्भस्थद्विपदादिभावेन बहिस्तदभावेन कथंचिद् व्रतभंगाभंगरूपत्वादतिचार इति चतुर्थः तथा कु
प्यस्य रूप्यसुवर्णव्यतिरिक्तस्य कांस्यलोहताम्रत्रपुसीसकधी विकारकरभविकामंचकमंचिकामथासनथालिकार
थशकटहलमुद्गरप्रभृतिकस्य गृहोपकरणकलापकस्य संख्यापरिमाणं तेनान्यस्य धनाद्बहुधनाकरणेनातिको ऽर्थः
स्थालानां कथंचिद् द्विकत्वे प्रतिपन्ननियमस्य जाते सति तस्य भंगस्य स्थालाद्यपाररणोत्कलितेन स्थालादिनामी
लयित्वा बृहन्मूल्यं करोतीति यथा नियमो न भज्यत इति पर्यायान्तःकरणेन स्वाभाविकसंख्याबाधना
त्पंचमो ऽतिचारः एते पंचम व्रते दोषा अतीचारा इति ॥ उक्ता अणुव्रतानां प्रत्येकं पंच पंचातिचाराः अथ गुणव्रता
तिचारान् गाथाद्वयेनाह तत्राद्यगुणव्रतस्य दिग्विरतिलक्षणस्यातिचारानाह तिरियं अहो य उड्ढं दिसिवयस ८९
स्स अइक्कमे तिन्नि दिसिवयदोसा तह य विसरणं खित्तवुड्ढी य ८५ तिर्यक् अधश्च समुच्चये भिन्नक्रमे ऊर्ध्वं च से
वयोर्धः दिग्व्रतस्य संख्यातिक्रमे त्रयो दिग्व्रते दोषाः अतिचारास्तथा स्मृतिविस्मरणं चतुर्थः क्षेत्रवृद्धिश्च पंचमस्तत्रोर्ध्व

क पर्वतशिखरादिषु अधो ग्रामभूमिगृहकूपादिषु तिर्यक् पूर्वादिदिग्भागेषु योजनादिना नियमितप्रदेशस्तस्य व्रतक्रमे एते च
यो ऽतिचाराः एते चानाभोगातिक्रमव्यतिक्रमादिभिर्वा अतीचारा भवंति अन्यथा प्रवृत्तौ तु भंग एव अतिक्रमादीनां च
स्वरूपं आहाकम्मनिमंतणपडिसुणमाणो अइक्कमो होइ पयभेयाइ वइक्कम गहिए तइएयरो गिलिए इति गाथातु ६४
सोऽवगन्तव्यं अत्र तृतीये अतिचारः इयरोत्ति अनाचारः अत्र चैवं समाधानं दुग्धवर्षनियमितोर्ध्वदिक्प्रमाण
मतिक्रम्य तस्मिन् शिखरे वानरः पक्षी वा परतो पि गतो न भंगः तथा यस्तेयो जन्तुनादिपरिमाणानि
षधाया अति व्याकुलत्व प्रमादित्व बुद्धिपाटवादिना विस्मरणं तथा हि केनचित् सर्वासु दिक्षु योजनशतरूपं प
रिमाणं कृतमासीत् गमनकाले च स्पष्टरूपतया न स्मरति किं शतं परिमाणं कृतमुत पंचाशत् तस्य च पंचाशतमति
क्रामतो ऽतिचारः सापेक्षत्वात् शतमतिक्रामतस्तु भंगो निरपेक्षत्वात् ततः स्मरणीयमेव गृहीतव्रतं स्मृतिमूलं
हि सर्वमनुष्ठानमिति चतुर्थोऽतिचारः अयं च सर्वव्रतेषु द्रष्टव्यः तथा क्षेत्रस्य पूर्वादिदेशस्य दिग्व्रतविषयस्य ह्रस्वस्य
सतो वृद्धिर्वर्द्धनं पश्चिमादिक्षेत्रांतपरिमाणप्रक्षेपेण दीर्घीकरणं क्षेत्रवृद्धिरिति पंचमोऽतिचारः तथा हि केनापि पूर्वा
परदिशोः प्रत्येकं योजनशतं गमनपरिमाणं विहितं समुत्पन्ने च तथाविधप्रयोजने एकस्यां दिशि नवतियोजनानि मत्वा

प्र·सा·वृ· स्यात्स्यादस्यां दिशोऽन्तरं योजनशतं करोति द्वाभ्यामपि प्रकाराभ्यां योजनशतरूपस्य परिमाणस्यातिक्रमः न त्वादिसे
९० वमेकक्षेत्रे वर्द्धयतो व्रतसापेक्षत्वादतिचार इति यदि वानाभोगात्क्षेत्रपरिमाणमतिक्रान्तो भवति तदा निवर्त्तितव्यं
ज्ञाते ज्ञाने च गंतव्यमन्यो वा न विसर्जनीयः अथाज्ञानतया गतो भवेत्तदा यत्तेन लब्धं स्वयं वा विस्मृतितो गतेन ल
ब्धं तत्परिहर्त्तव्यं अथ द्वितीयगुणव्रतातिचारानाह अप्पक्कं दुप्पक्कं सच्चित्तं तप्पडिबद्धं च तुच्छोसहिभक्ख
णं पंचेसा उवभोग [illegible] गपरिभोगे इह हि श्रावकेण भोजनतः कृत्वा प्रायो निरवद्याहारेण भाव्यमसत्यपे
क्षया यथासंभवममी अतिचाराः तत्र अपक्वं अग्न्यादिना परिसंस्कृतं शालिगोधूमौषध्यादि तस्य भो
गादतिक्रमादिना भुंजानस्य प्रथमोऽतिचारः ननु अपक्वौषधयो यदि सचेतनास्तदा सचित्तमिति तृतीयपदेनैवो
क्तार्थत्वादस्योपादानमसंगतं अथाचेतनास्तदा कोऽतिचारो निरवद्यत्वात् नैवं सत्यमेतत् किंतु तृतीय
चतुर्थातिचारौ सचित्तकंदफलादिविषयौ प्रथमद्वितीयौ तु शाल्याद्योषधिविषयाविति विषयकृतो भेदोऽत ९०
एवातिचारसूत्रे अपउलि दुपउलि भक्खणयाए इत्युक्तं अपक्वा कणिक्कादेरपक्वतया संभवत्सचित्तावयवस्यापि प्र
तादिना चेतनमिदमिति बुद्ध्या भक्षणे व्रतसापेक्षत्वादतिचारः तथा दुःपक्वं अर्द्धपक्वं तथा अर्द्धस्विन्नं पृथुकं तंदुलयवगोधूम

स्थूलमंडककंकटुकफलादि ऐहिकप्रत्यवायकारि यावता चांशेन सचेतनमेतावता परलोकमप्युपहंति यत्पृथुकादेर्दुः
पक्वतया संभवत्सचेतनावयवत्वात् पक्वत्वेन च अचेतनमिति बुद्ध्या भुंजानस्यातीचार इति द्वितीयः तथा सह चित्ते
न चेतनया वर्त्तते यत्तत्सचित्तं आहारो वल्लुककंदमूलफलादि पृथ्वीकायादि वा तत्र कृतनिवृत्तिविषयीकृतसचित्तो भंगस्य
भावे व्यतिचारो भवति व्रतसापेक्षस्यानाभोगातिक्रमादिना प्रवृत्तौ संसक्तदूषणं यद्वाईक्रुदितसचित्तवरणीयत्वादि
अपरिणतोऽपो रंकेण वा उपभुंजानस्याप्रथमातिचारो द्रष्टव्यः इति तृतीयः तथा सचित्ते प्रतिबद्धे गुंदादि पक्वफला
दि वा सचित्तं तद्वीजं वृक्षानुगतादि तदाहारो हि सचित्ताहारवर्जकस्यानाभोगादिना वा व्यादि प्रवृत्तिरूपत्वादति
चारश्चतुर्थः अथवा बीजं स्वरूपाचितस्यैव सचेतनत्वात् कटाहं तु असत्पिष्ट्या मित्तेस्याचेतनत्वादिति बुद्ध्या प
क्वखर्जूरादिफलं मुखे प्रक्षिपति सचित्तवर्जकस्य सचित्तप्रतिबद्धभक्ष्यपत्नेऽतिचारः तथा तुच्छा असारा ओषध
यो अनिष्पन्नकोमलमुद्गादिफलीरूपास्त्वासां भक्षणे पंचमोऽतिचारः ननु तुच्छौषधयो यद्यपक्वा दुःपक्वा सम्यक्पक्वा वा स्यु
स्तदा प्रथमद्वितीयातिचाराभ्यामेवासां ग्रहणत्वान्नात्र सकृत्प्रसंगः अथ सम्यक्पक्वास्तदा निरवद्यत्वा
देव तद्भक्षणेऽप्यतिचारो नास्तीति सत्यं किंतु यथा अपक्वदुःपक्वयोः सचित्तप्रतिबद्धो अचित्तत्वेऽपि समा

नेष्वेवं यथा औषधिष्वेतो विशेषस्तथा: आपि सचेतनस्यौषधिलाभ्यां समानेष्व त्रुटत्तत्रुटत्वकृतो विशेषो: इंगतव्य: तव
तकोमलमुद्गादिफली विशिष्टतत्स्वकारुकृतेन तुच्छा: सचेतना एव अनाभोगातिक्रमादिना भुंजानस्य तुच्छौषधिभक्षण
मतिचार: अथवा अत्यंत सावद्यभीरुतया: विज्ञाहारता: प्रपन्ना तत्र यदपि अग्निकाष्ठं तदचेतनी कृत्वापि भक्षयतु सचि
त्तस्यैव वर्जनीयत्वाभ्युपगमात् यस्तु नवभ्रांतं पारदंतास्समर्पांम्र सौषधीज्ञोऽस्येनाचेतनीकृत्य भुंक्ते तत्र तुच्छौषधिभक्ष
[illegible] णमतिचारस्तत्त्वभावतो विरतेरविराधितत्वा
त् सूत्रनसुपालितत्वादिति एवं भोजनतो जनीमांसादिनिवृत्तिव्रतेष्व नाभोगातिक्रमादिभिरतिचारभावनीया: एते प
च दोषा अतिचारा उपभोगपरिभोगव्रते इति तत्रार्थेत्र सचित्तं: सचित्तसंबंधो: संमिश्रो: अभिषवो दु:पक्काहारश्चेति चेपं
चातिचारा: प्रतिपादिता स्तत्र सचित्तं सचित्तसंबद्ध दु:पक्काहारस्तु प्राग्वद्व्याख्येया: संमिश्रस्तु सचित्तेन मिश्र: ग्रावन्त आहा
र: यथा आर्द्रकदाडिमबीजकर्कटादिमिश्र: पूरणादि तिलमिश्रो यवधानादि वा युगमप्य: नाभोगातिक्रमादिना:
तिचार: यद्वा संभवत्सचित्तावयवस्यापक्वकणिकादे: पिष्टत्वादिना अचेतनमिति बुध्या आहार: संमिश्राहार:
अनेनापेत्वाद्तिचार: अभिषवमनेकद्रव्यसंधाननिष्पन्नसुरासौवीरादिमीसप्रकारसवर्दश्चिक्षा स्वएम: ॥७६॥

भिस्यंदिद्रव्य: ओषधियोगो वा अयमपि सावद्याहारवर्जकस्यानाभोगातिक्रमादिना अतिचार इति। अथानर्थदंड
विरतिलक्षणस्य तृतीयगुणव्रतस्यातिचारानाह कुकुइयं मोहरियं भोगउवभोगाइरेगकंदप्पा जुत्ताहिगरणाणि एए अ
ट्ठाराणारथदंडवए ॥ ९० ॥ कुरिति कुत्सायां निपातो निपातानामानेकार्थत्वात् कुत्सितं कुचति भ्रूनयनोष्ठनासाकरचरण।
वदनविकारैः संकुचतीति कुकुचस्तस्य भावः कौकुच्यमनेकप्रकारं भांडानामिव विडंबकक्रियाकरणं अथवा कुत्सितः
कुच: कुकुच: संकोचादिक्रिया वा तस्य भावः कौकुच्यं तच्चेयेन परो हसति स्वस्य लाघवं संपद्यते तन्नाचरणीयं वक्तुं
चेष्टितुं वा कस्मात् प्रमादात् तथाचरणे चातिचार इति प्रथमः ॥ तथा मुखमस्त्यस्येति मुखरोऽनालोचितभाषी वाचाटस्तस्य
भाव: कर्म्म वा मौखर्यं धार्ष्ट्यप्रायमसभ्यासंबद्धबहुप्रलापित्वं अतिचारत्वं चास्य पापोपदेशसंभवादिति द्वितीय:
तथा भोग: सकृदेव भुज्यत इति भोग: आहारमाल्यादि उपभोग: पुन: पुनर्भोग्य: आच्छादनवनितादि तयोरतिरेक: पुनः
आधिक्यं इह च स्नानपानभोजनकुंकुमचंदनकस्तूरिकावस्त्राभरणादीनामतिरिक्तानामात्मभोगे अनर्थदंड: अत्रायं
संप्रदायः यदि अतिरिक्तानि बहूनि तैलामलकानि गृह्णाति तत्र तत्स्नातु श्रावणेन बहव: स्नातुं तडागादौ व्रजंति तत:
पूतरकाः अप्कायादिवधोऽधिक: स्यात् एवं कल्पते तत्र को विधि: तत्र स्नाने तावद्गृह एव स्नातव्यं तदभावे तु तैलामलके

प्र॰ सा॰ वृ॰ ६२

ग्रहणं वा शिरो घर्षयित्वा तानि स्वयोगिना दर्पयित्वा तडागादीनां तटे निविष्टो जलाञ्जलिभिः स्नाति पूयारिष्टपिपीलिकासंसक्ति
संभवति तानि परिहरति एवं सर्वत्र वाच्यं इति तृतीयः तथा कंदर्पकाम[illegible]स्तद्धेतुस्तत्प्रधानो वा वचनप्रयोगादिकं
दर्पः श्रावकेणाहितादृशं न वक्तव्यं येन परस्य स्वस्य वा मोहोद्रेको भवतीति चतुर्थः तथा अधिक्रियते दुर्गतावात्मा अ
नेनेत्यधिकरणं मुसलघरट्टादि संयुक्तमुदूखलेन मुसलं हलेन फालं शकटेन युगं धनुषा शरा इत्यादि एवमेकम
धिकरणमधिकरणान्तरेण संयुक्तं संयुक्ताधिकरणं इह श्रावकेण संयुक्ताधिकरणं न धारणीयं तथा वसा
निहिंसकः कश्चित्संयुक्तमधिकरणमादरीन वियुक्ताधिकरणानां योऽनु सुखेन वपरः प्रतिषेद्धुं शक्यते इत्व नि
षेधस्य अनर्थदंडस्य अपध्यानाचरितप्रमादाचरितहिंस्रप्रदानपापकर्मोपदेशभेदेन चतुर्विधत्वात्तद्भूति
श्चतुर्थो नव अपध्यानाचरितविषयौ कौत्कुच्यादिं च कस्यानाभोगादिना तु चिंतनमतिचारः आर्त्तध्यानः अस्य
यो भगएव प्रमादाचरितविरतौ तु कौत्कुच्यकंदर्पभोगोपभोगातिरेकाणां त्रयाणामपि करणमतिचारः उक्ता। ६२
धिकरणं तु हिंस्रप्रदानविरतेः मौखर्यं तु पापकर्मोपदेशविरतेरिति एते अतीचारा अनर्थदंडव्रते उक्ता गुणव्रतानि
चाणि अथ शिक्षाव्रतानि तत्रापि सामायिकस्यातीचारानाह कायमणोवयणाणं दुप्पणिहाणं

सईअकरणं वय अणवठियकरणं विपलानईए पंचअमे आए २८ प्रणिहतिः प्रणिधानं दुष्टं च तत्प्रणिधानं च दुःप्र
णिधानं कायमनोवचनानां सावद्यप्रवर्त्तनं तत्र शरीरावयवादीनां पाणिपादादीनामनिभृततावस्थापनं कायदुः
प्रणिधानं क्रोधलोभद्रोहाभिमानेर्ष्यादयः कार्यव्यासंगः संभ्रमश्च मनोदुःप्रणिधानं वर्णसंस्काराभावोऽर्थानव
गमश्चापलं च वाग्दुःप्रणिधानमिति त्रयोऽतिचाराः यदुक्तं अनिरिक्खियापमज्जियथंडिल्ले ठाणमाइ सेवंतो हिंसा
भावे वि न सो कडसामाइउ पमायाउ सामाइयं तु काउं घरचिंतं जो उ चिंतए सढ्ढो अट्टवसट्टोवगउ निरत्थयं तस्स सा
मइयं कडसामइउ पुव्विं बुद्धीए पेहिऊण भासेज्जा सइ निरवज्जं वयणं अन्नह सामाइयं न भवे तथा स्मृतेः सामा
यिकविषयायाः अकरणं कोऽर्थः सामायिकं मया कर्त्तव्यमनकर्त्तव्यमिति वा सामायिकं मया कृतं न कृतमिति वा प्र
बलप्रमादाद्यदा न स्मरति तदा अतिचारः स्मृतिमूलत्वान्मोक्षसाधनानुष्ठानस्येत्यवधारणापि न सरइ पमायजुत्तो जो
सामाइयं कया उ कायव्वं कयमकयं वा तस्स हु कयंपि विहलं तयं नेयमिति चतुर्थः तथा अनवस्थितस्य करणं प्रतिनि
यतवेलायां सामायिकस्याकरणं यथा कथंचित्करणं करणानंतरमेव पारणं च यदुक्तं काऊण तक्खणं चिय पारेइ
करेइ वा जहिच्छाए अणवट्ठियसामइयं अणायराउ न तं सुद्धमिति पंचमः इह चाद्यत्रयस्यानाभोगादिना अतिचारत्वम्

प्र.सा.वृ. मथ्या व्रतभंग एव इत्यरहृष स्त्रप्रमाद दुःकुलत्वयेति एते सामायिकव्रते पंचातिचाराः इदानीं देशावकाशिकव्र-
९३ तातिचारानाह आणवणपेसवणा सद्दाणुवायरूवअणुवाउ बहिपोग्गलपक्खेवो दोसा देसावगासस्स ॥२८॥
दिग्व्रतविशेष एव देशावकाशिकव्रतमियांस्तु विशेषो दिग्व्रतं यावज्जीवं संवत्सरं चतुर्मासी वा यावत् देशावका-
शिकं तु दिवसप्रहरमुहूर्त्तादिपरिमाणं तस्य च पंचातिचाराः तत्र आनयनं अवधिस्थितस्य आद्यः इह हि स्थितस्य चेतना-
दि द्रव्यस्य विवक्षितक्षेत्रे प्रापणं प्रेष्यो नेति द्रष्टव्यं स्वयं गमने हि व्रतभंगः स्यादिति बुद्ध्या प्रेष्येण यदा आनाय-
यति सचेतनादि द्रव्यं तदा अतिचार इति प्रथमः तथा प्रेष्यणं प्रेष्यस्य विवक्षितक्षेत्राद्बहिः प्रयोजनाय व्यापार-
णं स्वयं गमने हि मम व्रतभंगो भवतीति ततः समाभ्यदिति बुद्ध्या स्वनियमितदेशात्परतो प्रेष्यं व्यापारयति प्रयो-
जनकरणाय सोपि देशावकाशिकव्रतं हि माभूत् गमनागमनादिव्यापारजनितप्राण्युपमर्द इत्यभिप्रायेण
गृह्यते स तु स्वयं कृतो अन्येन वा कारित इति न कश्चित् फले विशेषः प्रत्युत स्वयं गमने ईर्यापथविशुद्धेर्गुणः परस्य ९३
प्रेष्यस्य पुनर्निपुणत्वादीर्यासमित्यसंभावे दोष इति द्वितीयः तथा शब्दानुपातः स्वगृहवृतिप्राकारादिव्यवच्छिन्न-
भूप्रदेशाकृताभिग्रहः सम्मतं प्रयोजने व्रतभंगभयेन स्वयं गंतुमशक्नुवन् प्राकारादिप्रत्यासन्नीभूय कासितादि

शब्दं करोति आकारणीयानां कर्णे अनुपातयतीति ते च तच्छब्दश्रवणात्तत्समीपमागच्छंतीति तृतीयः तथा रूपं स्वशरीरसंबंधि
उत्पन्नप्रयोजने शब्दमनुच्चारयन्नाह्वानीयानां दृष्टावनुपातयति तद्दर्शनाच्च ते तत्समीपमागच्छंतीति रूपानुपातोऽपर-
त्र परमार्थ विवक्षितक्षेत्राद्बहिः स्थितं कंचन नरं व्रतभंगभयादात्मशब्दमकुर्वन् यदा स्वकीयं च शरीरमाह्वानरूपं दर्शना-
र्थं जने तमाकारयति तदा व्रतसापेक्षत्वाच्छब्दानुपातरूपानुपातावतिचाराविति चतुर्थपंचमौ तथा बहि- ७५
र्विवक्षितक्षेत्रात्पुद्गलस्य लेष्टुकाष्ठशर्करादेः प्रक्षेपणं प्रक्षेपो विशिष्टदेशाभिग्रहे हि सति कार्यार्थी परतो ग-
मननिषेधात् गृहादिलोष्ठादीन् यदा बोधनाय क्षिपति तदा लोष्ठादिपातसमनंतरमेव ते तत्समीपमनुधावंतीति तत स्व-
तारंभाव्यापारयतः स्वयमनुपमर्दकस्याप्यतिचारो भवतीति पंचमः इह चाद्यद्वयमसत्त्वबुद्धित्वेन सहसाकारादिना
वा अन्त्यत्रयं तु मायाविततयातिचारतां यातीति एते पंचातिचारा देशावकाशिकव्रतस्य अत्र वृद्धाः दिग्व्रतसंक्षेप-
करणं शेषव्रतसंक्षेपकरणस्याप्युपलक्षणं द्रष्टव्यं तेषामपि संक्षेपस्यावश्यं कर्तव्यत्वात् प्रतिव्रतं च संक्षेपकरणस्य
भिन्नव्रतत्वे द्वादश व्रतानीति संख्याविरोधः स्यात् इति तत्र केचिदाहुः दिग्व्रतसंक्षेपरूपं देशावकाशिकव्रतं त-
दतिचाराणां दिग्व्रतानुसारितयैवोपलंभात् अन्ये आहुः अतएवापरे शेषव्रतसंक्षेपकरणमपि देशावकाशिक

मुच्यते तपोमलस्यागतयेव तदतिचारा अपि तद्वत्सारिणो द्रष्टव्याः अपुनर्बाधाणानि पानादिभक्ततारसंक्षेपकर
णे सुवर्णधनधान्यपरिमाणातिचारा दिग्व्रतसंक्षेपकरणे तु संक्षिप्तत्वात् क्षेत्रस्य प्रेष्यप्रयोगादयोऽप्यतिचाराः स्युरिति भे
देन दर्शिताः न च सर्वेष्वपि व्रतभेदेषु विशेषतोऽतिचारा दर्शनीया रात्रिभोजनादिव्रतभेदेषु तेषामदर्शितत्वा
दिति। अथ पौषधव्रतातिचारानाह अप्पडिलेहिय मप्पमज्जियं च सेज्जाइ थंडिलाणि तहा सम्मं च अणणुपा
लणं अइयारा पोसहे पंच ६० अप्रत्युपेक्षिताप्रमार्जिताभ्यां दुःप्रत्युपेक्षितदुःप्रमार्जितयोरपि ग्रहणं तत्र कु
त्सार्थस्यापि नञो दर्शनात् कुत्सितो ब्राह्मणोऽब्राह्मण इति ततोऽप्रत्युपेक्षितदुःप्रत्युपेक्षिते शय्यासंस्तारकौ इति प्र
थमोऽतिचारः अप्रमार्जितदुःप्रमार्जितशय्यासंस्तारकाविति द्वितीयः अप्रत्युपेक्षितदुःप्रत्युपेक्षितमुच्चारप्रस्र
वणादिस्थंडिलमिति तृतीयः अप्रमार्जितदुःप्रमार्जितमुच्चारप्रस्रवणादिस्थंडिलमिति चतुर्थः तत्र अप्रत्युपेक्षि नि॰९४
तं चक्षुषा अनिरीक्षितं दुःप्रत्युपेक्षितं विभ्रान्तचेतसा निरीक्षितं अप्रमार्जितं रजोहरणवस्त्रांचलादिना अविशो
धितं दुःप्रमार्जितमविधिना प्रमार्जितं तथा च रजोहरणादिना अविशोधितं इह चायमाचारः गृहीतपौषधोऽप्र
त्युपेक्षितां शय्यामारोहति संस्तारकं वा पौषधशालां वा सेवते दर्भवस्त्रं वा शुद्धवस्त्रं वा भूमौ संस्तरणाति कायिका

भूमेश्चागतः पुनरपि संस्तारकं प्रत्युपेक्षते अन्यथा त्वतिचारः स्यात् एवं पीठादिष्वपि वाच्यं तथा पौषधव्रतस्य स
म्यग्यथागममनिःप्रकंपेन चेतसा अननुपालनमनासेवनं तथा ह्याहारादिविषये चतुर्विधे पौषधे प्रतिपन्ने अ
स्थिरचित्ततया क्षुधादिपीडितः सन् चिन्तयति प्रातः प्रभृति निःशेषमोदनघृतपूरखंडमाहारजातं पाचयिष्या
मि इत्याद्यनाचारैरिति पानकानि कारयिष्यामीति शरीरसत्कारपौषधस्थश्चिन्तयति प्रभाते तैलाभ्यंगकुं
कुमादिविलेपनं मज्जनं च करिष्यामीति तथा ब्रह्मचर्यपौषधे चिन्तयति पूर्वक्रीडितानि स्मरतो दीपिकानिव
र्तनवेषाणीति करणीयानीति अव्यापारपौषधे पीदमेकरणीयं अमुकं कारयिष्यामि इदं लप्स्यामि इदं च देयमित्यादि चिन्तय
न्नतिचरति व्रतमिति पंचमः एते अतिचाराः पंच पौषधव्रते इदानीमतिथिसंविभागव्रतातिचारानाह सचित्ते नि
क्खिवणं १ सचित्तपिहणं च २ अन्नववएसो ३ मच्छरियं च ४ चकालाईयं दोसातिहिविभाए ६१ सचित्ते सचेतने पृ
थ्वीजलकुंभोपचुल्लीधान्यादौ निक्षेपणं निक्षेपः साधुदेयभक्तादेः स्थापनमदेयबुद्ध्या अयं भावः श्राद्धोऽदानबुद्ध्या मातृस्थानात्
तथा गृहीतनियमेन साधूनामवश्यं देयं न चैते मुनयः सचित्तनिक्षिप्तं गृह्णन्तीति अपात्रीयपानमपि ततो मया निज
नियमोऽप्याराधितो भविष्यति वस्त्वप्यन्नादिकं रक्षितं भविष्यति एवं कुर्वतोऽतीचारः प्रथमः तथा सचित्तेन स्थगनं

प्र·सा·वृ

९५

ऽपत्रपुष्पफलादिनात्तथाविधपेवत्रच्छायापिधानमाच्छादनं देयमस्त्वस्तुनश्चनिश्रितीयं च सम्यक्षेपेन पानमस्य पारस
ऽपदेशो ऽन्य अपदेशः इंदंहि कीणगजर यतमप्पराद्धिकं यत्नदत्तं सद्यं धीतिव्रतिनः श्रावयत छोकस्य स्मदेयमत्त्वानचत्र
तिनः स्वामिनाः नतुस्तात्तेगदंत्ती ति तिनियमो चितेननभयः शार्कराश्चिकं चाश्चित्तमितिच्छतीयो तिचार ९ तथा मत्स
र कोपः अविधत्तेपरेत्ति मत्सरिकत्तस्यमावो मत्सरिकता नत्पादहतिच रतिचारे कोऽभिप्रायो मार्गितं सन्तत्कुप्य
तिसदपि वस्तु नददातीति अथवा अनेन तावद्रमकेणमार्गितेनदत्तं मुनिभ्यः किमहं ततोपि निकृष्ट इति मानत
तोमात्सर्यात्मरतणादहतनलस्यणात्द्वत्तेतितिचारश्चतुर्थः तथा कालस्य साधूनां मुचितेभिक्षासमयस्यातीतम
तिक्रमो दित्सयानागतभोजनपश्चाद्भोजनद्वारेण च धनं कालातिक्रमो भावः ३ वितोयो भिक्षाकालः साधूनाम
संघमित्वा संयमैवाधुंजानस्य गृहीतातिथिसंविभागनियमस्यातिचारः पंचमः एते दोषा तिथिसंविभागव्रतेऽ इति।
संप्रति भरतेस्मिन् भरते संप्रति भविष्यति च प्रकरणानामार्जिनाणरवं प्रमिविंतां इस भरहभावेजिणानामाइति सुतमंह ९५
विवणितुमाह भरहेतीएसंपइभाविजिणे वंदिमो चउवीसं एरवयमिवि सपइभाविजिणे नाम उवंदे भरतेभार
ते क्षेत्रेऽतीतान् संप्रति वर्त्तमानान् भाविनो भविष्यतश्च जिनान् वंदामहे चतुर्विंशतिं एरवते ऐरावत क्षेत्रेच वर्त्तमति

वर्त्तिनो भाविनश्च नामतो नामानि गृहीत्वा सर्पश्चंद्रसंख्या विशेषणं भारतजिनेष्वपि संबंधनीयं एरवतेऽतीतजिनना
मानि नत्वा यंते ततो वार्त्तमानकम भविष्यज्जिनवंदनमेवोल्लिख्य वंदेभिधास्ययस्तो मिदे सर्प्पः तान्येव नामानि भारत
तीतजिना नामाह केवलनाणी १ निव्वाणी २ सागरो ३ जिणमहायसो ४ विमलो ५ नाहसुतेउ ६ सिरिहर ७ दत्तो
८ दामोयर ९ सुतेउ १० सामिजिणो य ११ सिवासी १२ सुमई १३ सिवगइ १४ जिणो य अत्थाहो अवाहो इतिपाठांतरं
१५ नाहनमीसर १६ अनिलो १७ जसोहरो १८ जिणकयथो य १९ धम्मीसर २० सुद्धमई २१ सिवकरजिणो २२ संदण
णो य २३ संपईए २४ तीउस्सप्पिणिभरहे जिणेसरे नाम उवंदे ९४ केवलज्ञानी निर्वाणी सागरो जिनो महायशाः।
विमलो नाथसुतेजाः अस्मिन् सर्वानुभूतिमाहुः श्रीधरोदत्तदामोदरः सुतेजाइति अन्य मतगाथायां दशात्स्वामिजिनः च
समुच्चये शिवासी अस्मै मुनिसुव्रतमाहुः सुमतिः शिवगतिर्जिनश्चावाधः अस्मैस्तागमाहुः नाथनमीश्वरः नि
लो यशोधरो जिनश्च कृतार्थः अगाथायाम स्यानवधर्मीश्वरः क्वचिज्जिनेश्वरमाहुः शुद्धमति शिवकरजिनः स्यंदन
श्च संप्रतिजिनश्च अतीतोत्सर्पिण्यां भारते जिनेश्वरान् एतान्नामतो वंदेऽहमिति तृतीय गाथार्थः पंचजिनाः भारते वर्त्तमा
न जिनान्नामतस्माह उसभं १ अजियं २ संभवं ३ मभिनंदणं ४ सुमइं ५ पउमप्पहं ६ सुपासं ७ चंदप्पहं ८ सुविहिं ९ सीयलं १०

प्र·सा·वृ·
९६

सेज्जंस ११ वासुपुज्जं च १२ । १३ विमलमणंतं १४ च धम्मं १५ संतिं १६ कुंथुं १७ अरं च १८ मल्लिं च १९ मुणिसुव्वय २० नमिने।
मिं २२ पास २३ वीरं च २४ पणमामि ऋषभं अजितं संभवमभिनंदनं सुमतिं पद्मप्रभं सुपार्श्वं च चंद्रप्रभं सुविधिं शीतलं श्रे
यांसं वासुपूज्यं च विमलमनंतं धर्मं शांतिं कुंथुं अरं च मल्लिं च मुनिसुव्रतं नमिं नेमिमिति यद्वैकदेशे पदसमुदायो
पचारात् रिष्टनेमिं एवं पार्श्वनाथं च महावीरं च प्रणमामि भविष्यदागतेति नाम्ना मत आह जिणपउमनाह १
सिरिसूरदेव २ सुपास ३ सयंपभ ४ सव्वाणुभूय ५ देवसुय ६ उदय ७ पेढाल ८ मभिनंदे ९ पोट्टिल १० सयकि
त्तिजिणं ११ मुणिसुव्वय १२ अमम १३ निक्कसायं च १४ जिणनिप्फुलाय १५ सिरिनिम्ममं च १६ जिणचित्तगुत्तं च
१७ । १८ पणमामि समाहिजिणं १९ संवरय २० जसोहरं २१ विजयं २२ मल्लिं च २३ देवजिणं २४ णंतविरियं २५ भ
द्दजिणं २४ भाविमाहेमि २५ जिनं पद्मनाभं श्रीसूरदेवं सुपार्श्वं स्वयंप्रभं सर्वानुभूतिं देवश्रुतं उदयं पेढालं अभिवं
देदु इति प्रथमगाथायोजना जिनाः पोट्टिलं शतकीर्तिं जिनं मुनिसुव्रतं अममं निःकषायं च समसुव्रं पेजिनं नि
पुलाकं श्रीनिर्ममत्वं जिनं चित्रगुप्तं चेति द्वितीयगाथायोजना इयं संपइ जिणणाहाण एकिंत्ति पासना मो हिं अ
दुणाभाविजिणिंदे नियनामे द्वीपकित्तेमि १० अमि वंदे इत्यत्रापि योजना प्रणमामि समाधिजिनं संवरकं यशोधरं

स = समप्रनवति
पत्र गता गाथेयं
९६

विजयमल्लिं देवजिनं अनंतवीर्यं भद्रजिन अन्ये भद्दकृतमाहुः इति भाविनो भारते जिनाः समवायांगे त्वेवं ना
मानि दृश्यंते यथा महापउमे १ सुरादेवे २ सुपासे य ३ सयंपभे य ४ सव्वाणुभूई अरिहा ५ देवगुत्ते य ६ होक्खई उद
९८ ए ७ पेढाले ८ पुत्तेय ९ पोट्टिले य १० सयए ११ मुणिसुव्वए अरहा सव्वभावविऊ जिणे अममे निक्कसाए य १४ निप्पु
लाए य १४ निम्ममे १५ चित्तगुत्ते १६ समाही य १७ आगमेस्सेणा होक्खई संवरे अनियट्टी य १९ विजए २० विम
ले य २१ देवोववाए अरहा २२ अणंत २३ विजए इय २४ आगमिस्सेणा होक्खई इति आगमिष्यता कालेन
भविष्यतीत्यर्थः एवमन्येष्वपि नाम विषये यत्र क्वचित् मतवायोगाश्रिभिर्विसंवादो दृश्यते तत्र सम्यग् ज्ञानेन रमवसे
रसो भवेत् जिणचंदसिरिवियं आगमिसेणं दिसेणं च सिरिदत्तं पय
येपास मरुदेवसिरिहरं सामिकुट्टमभिवंदे अग्गसेणं जिणमग्गदत्त सिरिवारिसेणं च बालचंदं सिरिवयं अग्गिसे
णं नंदिसेणं च श्रीदत्तं व्रतधरं सोमचंद्रजिनदीर्घसेनं चेति प्रथमगाथायोजना वंदे इतिक्रिया शतायुषं सत्यकिं
उपुलिसेनं जिनं श्रेयांसं सिंहसेनं स्वयंज्वलं उपशांतं देवसेनं चेति द्वितीयगाथायोजना महावीरं पार्श्वं मरुदेवं श्री

प्र.सा.वृ.
६०
१

धरं सोमको इममभिवंदे इति क्रियाश्च गोमिसेनेजिनमग्रद्नं श्रीवाणिषेणंचेति तृतीयगाथार्थः ॥ अथ सांप्रतं पार्श्व
पद्मप्रभलिखितामपि मतं सा चतेषां स्थैवमैरवते सांप्रतिकजिनानां नाम कीर्तिनाः स्वनामभिः अथ नामाविनोजिने
द्वोनैरवतेनिजिनामभिः कीर्त्तयिष्यामितान्येवाह सिद्धत्थं रचनघोसं २ जमघोसं ३ सायरं ४ सुमंगलं ५ पसब्बत्थसिद्ध
इति बाणसामि ७ वंदामि धम्मधयं ८ तह सिद्धसेणं ९ महसेणनाहं १० रविमित्तं ११ सच्चसेणजिणं १२ महाविंदं १३
देवपालं १४ वंदे ९७ सिद्धार्थं पूर्णघोषं पूर्णघोषं यममघोषं सागरं सुमंगलं सर्वार्थसिद्धिं निर्वाणस्वामिनं
देवपालं १४ वंदे ९७ सिद्धार्थं पुण्यघोषं यमघोषं सागरं सुमंगलं सर्वार्थसिद्धिं निर्वाणस्वामिनं
वंदे धर्मध्वजमिति प्रथमगाथार्थः । जिनाः तथा सिद्धसेनं महसेननाथं रविमित्रं सत्यसेनजिनं श्रीचंद्रं २७
केतुं महेन्द्रं दीर्घपार्श्वं च इति द्वितीयगाथार्थः सुव्रतपार्श्वनाथमुकोशलं जिनवरमनंतनाथं विमलं उत्तरं
महर्द्धिदेवनानंदकं वंदे इति तृतीयगाथार्थः जिनाष्टकं अथ परवीकानां तीर्थकृतां मनसंस्थामाह निस्सिणाभवस्स ९८/६०
सप्र मुद्दे वीसाहिं पत्तिणासु तस्स मिरे सिसिचंदम्म गावर२तणसासयमुहदंपनमह निसोसम वसमुदूत्वि रास धिकरा २
तस्स रवा जिनानुमुखससद्दानश्रीमुनिचंद्रपत्तिनतान् शासत सुखदा एकान्न मत भम लोकायमिति अन्न च
चतुर्विंशतिः पंचभिर्गुणिता विंशत्युत्तरं शतं भरतानि सप्तम द्वारविवरणं । इदानीं उसभाइजिणाणं आयमगणाहर

न्निअ उसभे द्वारं विवरीतुमाह सिरिउसहसेण १ पहुसीहसेण २ चारू ३ उघनाह ४ कोधवमाण ५ पज्जोम ६ वियम्भदिन्नप
इण्णो ८ वराहेपप ९ पहुनंद १० कुत्थुहाविय ११ सुभोम १२ मंदर १३ जसा १४ अरिहोर १५ चक्काउह १६ संव १७ कुंभ १८
भिसह १९ मल्लीय २० सुंभोय २१ । १० वरदत्त २२ अज्जदन्ना २३ तरिंदभूई य २४ गणहरा पढमा सिस्सा रिसहाईणं हवं
तु गणहारं पणमामाणं १२ ऋषभसेनप्रभृतिं सिंहसेनचारू वज्रनाभाख्यः चमरः प्रद्योतनविदर्भदत्त प्रभवराहस्य प्रभुनंद
कौस्तुभाव पिसुभोममंदरयशः अरिष्ट चक्रायुधशांब कुंभभिषजमल्लिचक्र शुंभोत्तवरदत्तआर्यदत्तः तथा इंद्रभू
तिश्च एते प्रथमगणधरः शिष्या ऋषभादीनां जिनानां ज्ञातव्या इति प्रगणनानां ८ इदानीं पवत्तिणिद्वारमाह बं
भी १ फग्गू २ सामा ३ अज्जियाय ४ तह कासवी ५ रई ६ सोमा ७ सुमित्ता ८ वारिणी ९ सुजसा १० धारिणी ११ धरणी
१२ धरा १४ पउमा १५ । १२ अज्जासिवा १५ सुहा १६ दामणीय १७ रक्खीय १८ बंधुमइनामा १९ पुप्फवई २० अनि
ला २१ जक्खदिन्ना २२ तह पुप्फचूला य २३ चंदणा २४ सहिया उ पवत्तिणीउ चउवीसजिणवरिंदाणं दुरियाइं हरं
तु सयाण ताणं भविमणुमाणं १४ तत्र ब्राह्मी फल्गुः श्यामा अजिता तथा काश्यपी रतिः सोमा सुमना वारुणी सुयशा धा
रिणी धरणी धरा पद्मा इति प्रथमगाथायां चतुर्दश प्रवर्तिनीनामानि आर्या शिवा शुभा दामिनी रक्षी च बंधुमतिनामा

प्र·सा·वृ
९७

पुष्पवती अनिलायसंवत्तानपा पुष्फचूलाव समुच्चये चंदना महिला उ एता: प्रवर्तिन्य: चतुर्विंशतिजिनेंद्राणां तुरि
ताणि ह्रंतु महासत्वा नामभक्तिपूज्यानां ।। २ इदानीं श्रीअर्हत्त्वस्थानानि विंशतिं इत्यामं द्वारं विवरीतुमाह अरिहंतसिद्ध २
पवयण ३ गुरु ४ थेर ५ बहुस्सुए ६ तवस्सीसु ७ वच्छल्लया एएसिं अभिक्खनाणोवओगे य ९ दंसण १० विणए ११ आव
स्सए य १२ सीलव्वए १३ निरइयारो खणलव १४ तव १५ च्चियाए १६ वेयावच्चे समाहीय १७ ।। १७ अपुव्वनाणग्गहणे
१८ सुयभत्ती १९ पवयणपभावणा या २० एएहिं कारणेहिं तित्थयरत्तं लहइ जीवो २ अत्र प्रथमगाथायामष्टौ का
रणमुक्तानि द्वितीयगाथायां नव तृतीयगाथायां त्रीणि तत्र प्रथमगाथाया व्याख्या अशोकाद्यष्टमहा [illegible]
[illegible] प्रातिहार्यादिरूपां
पूजामर्हन्तीत्यर्हन्तः तीर्थंकराः अपगतसकलकर्मांशाः परमसुखिनः कृतकृत्याः सिद्धाः प्रवचनं द्वादशांगं तदु
पयोगानन्यत्वात् संघो वा प्रवचनं गुरवो यथावस्थितं शास्त्रार्थमिति गुरवो धर्मोपदेशादिदातारः स्थविरा जाति
श्रुतपर्यायभेदभिन्नास्तत्र जातिस्थविराः षष्टिवर्षप्रमाणायुः श्रुतस्थविराः समवायांगधारिणः पर्यायस्थविराः
विंशतिवर्षव्रतपर्यायाः बहुप्रभूतं श्रुतं येषां ते बहुश्रुताः तत्र बहुश्रुतत्वमापेक्षिकं प्रतिपत्तव्यं श्रुतं च त्रिधा सूत्रतोऽर्थ एम· ९७ २

तदुभयतश्च तत्र सूत्रधरेभ्योऽर्थधराः प्रधानाः अर्थधरेभ्योऽप्युभयधराः प्रधानाः इति विचित्रमनशनादिभेदभिन्नं तपो वि
द्यते येषां ते तपस्विनः साधवः सामान्यतः अर्हंश्च सिद्धश्च प्रवचनं च गुरुश्च स्थविरश्च बहुश्रुतश्च तपस्वी च अर्हत्सि
द्धप्रवचनगुरुस्थविरबहुश्रुततपस्विनः सप्त तेषु बहुस्सुए इत्यत्र एकारः प्राकृतत्वात् लाक्षणिकस्तेषु एएसिमिति प्राकृ
तत्वात् सप्तम्यर्थे षष्ठी ततः एतेषु सप्तसु स्थानेषु वत्सलभावो वत्सलता अनुराग यथावस्थितगुणोत्कीर्त्तनं तदनु
रूपोपचारलक्षणा तीर्थकृन्नामकर्मबंधकारणमिति शेषः तथा अभीक्ष्णमनवरतं ज्ञानोपयोगो ज्ञाने आभि
प्रमाणतारदमष्टमं कारणं द्वितीयगाथाया व्याख्या दर्शनं सम्यक्त्वं विनयो ज्ञानादिविनयः स च प्रागेवोक्तः आवश्यमाणो
वा दर्शनं च विनयश्च दर्शनविनयं समाहारः द्वंद्वः तस्मिन् आवश्यके अवश्यकर्त्तव्ये प्रतिक्रमणादौ तस्मिंश्च शी
लानि च व्रतानि च शीलव्रतं अत्रापि समाहारद्वंद्वस्तस्मिन् तत्र शीलानि उत्तरगुणाः व्रतानि मूलगुणाः एतेषु निर
तिचाराः सन् तीर्थकरनामकर्म बध्नातीति क्रियायोगः एतानि च त्रीणि कारणानि तथा क्षणलवे तपसि त्यागे वै
यावृत्ये च समाधिस्तीर्थकरनामकर्मबंधकारणं क्षणलवग्रहणमशेषकालविशेषोपलक्षणं क्षणलवादिषु का
लविशेषेषु निरंतरं संवेगभावनातो ध्यानासेवनतश्च समाधिः क्षणलवसमाधिः तथा तपसि बाह्यांतरभेदभिन्ने यथा

प्र.सा.वृ. ९८

शक्तितो निरंतरं प्रवृत्तिरूपः समाधिः त्यागो द्विधा द्रव्यत्यागो भावत्यागश्च द्रव्यत्यागो नाम आहारोपधिशय्यादीनामप्रायोग्या-
णां परित्यागः प्रायोग्याणां च यतिजनेभ्यो दानं भावत्यागः क्रोधादीनां विवेको ज्ञानादीनां च यतिजनेभ्यो वितरणं
एतस्मिन् द्विविधेऽपि त्यागे मुक्तान्तिक्रमेण यथाशक्ति निरंतरं प्रवृत्तिस्त्यागसमाधिः वैयावृत्त्यं दशविधं तद्यथा आ-
चार्यवैयावृत्त्यं १ उपाध्यायवैयावृत्त्यं २ स्थविरवैयावृत्त्यं ३ तपस्विवैयावृत्त्यं ४ ग्लानवैयावृत्त्यं ५ शैक्षकवैयावृत्त्यं ६
साधर्मिकवैयावृत्त्यं ७ कुलवैयावृत्त्यं ८ गणवैयावृत्त्यं ९ संघवैयावृत्त्यं चेति १० एकैकं च त्रयोदशविधं यथा भक्तदानं १ पानदानं २ आ-
सनदानं ३ उपकरणप्रत्युपेक्षा ४ पादप्रमार्जनं ५ वस्त्रप्रदानं ६ भेषजप्रदानं ७ अध्वनि साहाय्यं ८ दुष्टस्तेनादिभ्यो र-
क्षणं ९ वसतौ प्रविशतो दंडकग्रहणं १० कायिकमात्रसमर्पणं ११ संज्ञामात्रकसमर्पणं १२ श्लेष्ममात्रसमर्पणं १३
चेति एतेषु वैयावृत्त्यभेदेषु यथाशक्ति निरंतरं प्रवृत्तिर्वैयावृत्त्यसमाधिः तृतीयगाथाव्याख्या अपूर्वस्यापूर्वस्य ज्ञान- राम ९८
स्य निरंतरं ग्रहणमपूर्वज्ञानग्रहणं अष्टादशं तीर्थकरनामकर्मबंधकारणं एकोनविंशतितमं श्रुतभक्तिः श्रुत-
विषये बहुमानं विंशतितमं प्रवचनप्रभावना यथाशक्ति प्रवचनार्थोपदेशनादिरूपा एभिरनंतरोक्तैः कारणैस्ती-
र्थकरत्वमनेन जीवः एतानि च कानि विंशतिकारणानि वस्तुमबाच्ये संघोपदपराभिस्तुगुरुगोधम्मो वरामपाईया मु

तस्सो भयधारी बहुस्सुया होंति विरएए १८ जाईस्सु य पवियाए पंडोच्चे पेएति हाउक्कमेणं सदीसगीसो समवाय
धारडंतीसवरिसो य १९ भत्तीपूया वन्नयवुणं वज्जणमवन्नवायस्स आसायणापरिहारो अरहंताईण वच्छल्लं
२० नाणा वउगोमिस्कंदेसणेसु हीयविणय सुहीय आवस्सयजोएसु सीलव्वएसु निरइयारो २१ संवेगभावणा
ज्झाणासेवणा खणलवाइ कालेसु तवकरणं जइजणस्स वि भाग करणेण हमसमाही २२ वेयावच्चं दसहा गुरुमा
ईणं समाहिजणणं च किरियादारेण तह अपुव्वनाणस्स गहणेत्तु २३ आगमबहुमाणो तिथयति स्सयस्सपभा
वणं जेस सत्ती एएहिं कारणेहिं तित्थयरत्तं समज्जिणेइ २४ आख्यानार्थं चैतन्नवांस्य विवहुश्रुतयोगीयानुलो
म्याख्यानिक्कमनिर्दिष्टेषु स्थानेषु तीयगाथायां भक्तिरान्तरे बहुमानविशेषः पूजा यथाविसेन पुष्पफलाहारवस्त्रादि-
भिरुपचारः वर्णस्य श्लाघायाः प्रकरणेन प्रकाशनं वर्जनेय परिहारणमवर्णवादस्य अश्लाघायाः आशातनायाश्च
माशातनायाः परिहारो वर्जनं एतदर्हदादीनां सप्तानां वात्सल्यं वात्सल्यानन्तरं च गाथायां वैयावृत्त्यं भक्तदानादि क्रि-
याहारेणागुर्वादीनां समाधिजननं तत्समनंतरं गाथापूर्वोक्तं प्रकारेण यथाशीलव्रतान्यतिक्रममेव कारणं कृत्वा समा-
धिरिति विभिन्नतीर्थकरगोत्रबंधस्थाने विवस्यतातो वैयावृत्त्यमाचार्यगुर्वादीनां तथा तेषामेव क्रियाहारेण सम

प्र.सा.वृ.
९९

मादिजननैकार्यकरणद्वारेणास्य तत्पादनमिति तथा ऋषभनाथेन वर्द्धमानस्वामिना च पूर्वभवे एतानि समस्तानि स्था
नकानि सर्वाण्यपि स्पृष्टानि मध्यमेषु पुनरजितस्वामिप्रभृतिषु द्वाविंशतितीर्थकरेषु केनाप्येकं केना
पि द्वे त्रीणि वा केनापि सर्वाण्यपि स्पृष्टानीति एतच्च तीर्थकरनामकर्म मनुष्यगतौ वर्त्तमानः पु
रुषः स्त्री नपुंसको वा तीर्थकरभवात् पूर्वं तृतीये भवे प्राप्य बंधमारभते आह तीर्थकरनामकर्मणो जघन्यत उत्कर्ष
तश्च बंधस्थितिरंतःसागरोपमकोटाकोटीप्रमाणा ततः कथमुक्तं तीर्थकरभवात्प्राक्तृतीये भवे बध्यत इति नै
ष दोषः द्विविधो हि बंधो निकाचनारूपोऽनिकाचनारूपश्च तत्रानिकाचनारूपस्तृतीयभवात् प्राक्तनामपि भव
ति जघन्यतोऽप्यंतःसागरोपमकोटाकोटीप्रमाणत्वात् निकाचनारूपस्तु तीर्थकरभवात् प्राक् तृतीयभवे एव
तं च कहं वेइज्जइ अगिलाए धम्मदेसणाईहिं बज्झइ तं तु भयवओ तइयभवोसक्कइत्ताणं इति वचनप्रामाण्यात् ॥ एम. ९९
तच्च निकाचितं बद्धफलं इत्यस्य उदयप्राप्तिं निकाचनारूपश्च बंधस्तृतीयभवादारभ्य यावच्चरमं तीर्थकरजी
र्थकरभवे अपूर्वकरणस्य संख्येयभागाः ततऊर्ध्वं व्यवच्छेदः केवलज्ञानोत्पत्तौ चास्य महाप्रातिहार्यादिरूपे सुरेन्द्रकृते
पूजोपचारे सति सदेवमनुजासुराणां परिषदि स्वानपरिहारेण धर्मदेशनया श्रुतचारित्ररूपधर्मप्ररूपणलक्षणया च ग्लो =

श्लिष्टगात्रदेहसौगंध्यादिभिरतिशयैः पंचत्रिंशता च बुद्धवचनातिशयैश्च तद्वेद्यत इति ॥१०॥ अथ जिनजननीजनक
नामानि एकादशं द्वादशं चाह मरुदेवि १ विजय २ सेणा ३ सिद्धत्था ४ मंगला ५ सुसीमा य ६ पुहवी ७ लक्खण ८ रामा
९ नंदा १० विण्हू ११ जया १२ सामा १३ सुजसा १४ सुव्वय १५ अइरा १६ सिरि १७ देवी य १८ पभावई १९ पउमावई य २० व
प्पा २१ सिव २२ वम्मा २३ तिसला य २४ ॥३२६॥ नाभी १ जियसत्तू २ जियारि ३ संवरे य ४ मेहे ५ धरे ६ पइट्ठे य ७ महसेण
पत्थिवे ८ सुग्गीवे ९ दढरहे १० विण्हू ११ वसुपुज्ज पत्थिवे १२ कयवम्मो १३ सीहसेणो य १४ भाणू १५ विससेणे य १६
॥३२७॥ सूरे १७ सुदंसणे १८ कुंभे १९ सुमित्त २० विजए २१ समुद्दविजए य २२ राया य अस्ससेणे २३ सिद्धत्थे वि य खत्ति
ए २४ ॥३२८॥ भगवत ऋषभस्वामिनो माता मरुदेवी अजितस्वामिनो विजया संभवनाथस्य सेना अभिनंदनस्य सिद्धा
र्था सुमतिनाथस्य मंगला पद्मप्रभस्य सुसीमा सुपार्श्वस्य पृथ्वी चंद्रप्रभस्य लक्ष्मणा सुविधिस्वामिनो रामा शीतल
स्य नंदा श्रेयांसस्य विष्णुः वासुपूज्यस्य जया विमलस्य श्यामा अनंतजिनः सुयशा धर्मनाथस्य सुव्रता शांतिनाथ
स्य अचिरा कुंथुनाथस्य श्रीः अरस्वामिनो देवी मल्लिनाथस्य प्रभावती मुनिसुव्रतस्य पद्मावती नमिनाथस्य वप्रा
अरिष्टनेमेः शिवा पार्श्वनाथस्य वामा वर्द्धमानस्वामिनस्त्रिशला २ तथा आदितीर्थकृत ऋषभस्वामिनः पिता नाभिः

प्र·सा·वृ· अजितस्य जितशत्रुः संभवस्वामिनो जितारिः अभिनंदनस्य संवरः सुमतिनाथस्य मेघः पद्मप्रभस्य धरः सुपार्श्व
१०० स्य प्रतिष्ठः चंद्रप्रभस्य महासेन क्षत्रियो राजा सुविधिस्वामिनः सुग्रीवः शीतलस्य दृढरथः श्रेयांसस्य विष्णुः वासुपूज्य
स्य वसुपूज्यः क्षत्रियः विमलस्य कृतवर्मा अनंतजितः सिंहसेनः धर्मस्वामिनो भानुः शांतिनाथस्य विश्वसेनः कुंथुनाथस्य
सूरः अरस्वामिनः सुदर्शनः मल्लिजिनस्य कुंभः मुनिसुव्रतस्य सुमित्रः नमिनाथस्य विजयः अरिष्टनेमेः समुद्रविज
यः पार्श्वनाथस्य राजा अश्वसेनः वर्द्धमानस्वामिनः सिद्धार्थः क्षत्रियवृत्तिः। इदानीं जिनजननीजनकगतिद्वारं
द्वारमाह। अट्ठण्हं जणणीओ तित्थयराणं तु हुंति सिद्धाओ अट्ठ य सणंकुमारे माहिंदे अट्ठ बोधव्वा ३१ नागेसुं उसभपि
या सेसाणं सत्त हुंति ईसाणे अट्ठ य सणंकुमारे माहिंदे अट्ठ बोधव्वा ३२ अष्टानां तीर्थकृतां ऋषभादीनां चंद्रप्रभा
न्तानां जननीमातरो भवंति सिद्धिगामिन्यो गताः। तदनु सुविधादीनां शांतिनाथपर्यंतानां अष्टौ जननीः सनत्कुमारे तृती लभ
यदेवलोके गताः तथा कुंथुप्रभृतीनां श्रीमहावीरांतानां अष्टौ जननीः माहेंद्रे चतुर्थे देवलोके गता बोधव्या इति तथा १००
नागेषु नागकुमारेषु भवनपतिनिकायवर्तिसुरेषु श्रीऋषभनाथपिता नाभिनामा गत इति शेषः तथा शे
षाणां अजितनाथप्रभृतीनां चंद्रप्रभांतानां सप्तानां पितरो भवंति गताः ईशाने द्वितीयदेवलोके तथा सुविधिप्रभृ

तीनां शांतिनाथांतानां नवानां अष्टौ पितरः सनत्कुमारे तृतीयदेवलोके तथा कुंथुप्रभृतीनां श्रीमहावीरांतानां अष्टौ पि
तरो माहेंद्रे चतुर्थे देवलोके गता बोध्याः। इदानीं उक्कोसजहन्नेहिं संख्याविहरंततित्थनाहाणं ति ३३ त्रयोदशं द्वारं
गाथापूर्वार्द्धेन तथा जन्मसमये विसंख्या उक्कोसजहन्निया तेसिं ति ३४ चतुर्दशं द्वारं गाथापश्चार्द्धेन निर्गणो
तिसत्तरिसयमुक्कोसं जहन्नवीसा य दस य विहरंति जम्मं पइ उक्कोसं वीसं दस हुंति उ जहन्ना सप्तत्यधिकं शत
मुत्कृष्टत एककालं तीर्थकृतां समयक्षेत्रे विहरति पंचसु भरतेषु एकैकस्य भावात् ऐरवतेष्वपि पंचसु तावतामेव भा
वात् पंचसु महाविदेहेषु प्रत्येकं द्वात्रिंशतो विजयेषु कालितेषु तीर्थकृतां षष्ट्यधिकशतस्य सद्भावादेतत्संख्यायाः
संभवइति तथा जघन्यतो विंशतिस्तीर्थकृत एककालं विहरमाणाः प्राप्यन्ते तथाहि जंबूद्वीपस्य पूर्वविदेहे सी
तामहानद्या दक्षिणभागे उत्तरभागे च एकैकस्य सद्भावात् द्वौ अपरविदेहे सीतोदाया महानद्या
दक्षिणभागे उत्तरभागे च द्वौ जिनौ मिलिताश्चत्वारः एवमपरद्वीपद्वयेऽपि महाविदेहेषु प्रत्येकं चत्वारश्चत्वार इति प
चसु अष्टौ विंशतिः भरतैरवतेषु एकांतसुषमारूपभावे तु अमी तु सर्वपोदशे व जघन्यतो विहरंतीति मते
पंचानां महाविदेहानां अपरापरविदेहयोः प्रत्येकमेकैकस्य विहरणसद्भावेन दश जन्मतो तीर्थकृतां प्राप्यमाणत्वात्

तथा जन्मसमये जघन्यासिसोत्कृष्टकाले विहरमाणा ... त्रिंशति र्वा विंशति तीर्थकृतो भवंति यतः सर्वेषामपि
तीर्थकृतामर्द्धरात्रसमय एव जन्म ततो महाविदेहेषु तीर्थकृज्जन्मसमये भरतैरवतक्षेत्रेषु दिवससद्भावेन तीर्थ
कृदुत्पत्त्यभावाद्दशैव त एव प्राप्यंते ननु महाविदेहवर्तिषु विजयेषु चतुर्भ्योऽधिकानामपि तीर्थकृतामुत्पत्तेः सं
भवात्कथमुक्तमुत्कृष्टतो विंशतिरेवेति उच्यते इह हि मेरौ पंडकवने चूलिकायाश्चतसृषु पूर्वादिदिक्षु प्रत्येकं चतुर्यो
जनप्रमाणबाहल्याः पंचयोजनशतप्रमाणायामा मध्यभागेऽर्द्धतृतीययोजनशतप्रमाणायामा मध्यभागेऽर्द्ध
तृतीययोजनशतप्रमाणविष्कंभा अर्द्धचंद्रसंस्थानसंस्थिताः सर्वश्वेतसुवर्णमय्यश्चतस्रोऽभिषेकशिलास्तत्र
चूलिकायाः पूर्वस्यां दिशि पांडुकंबलशिलायां हि तीर्थकराभिषेकसिंहासने द्वे यथा एकमुत्तरत एकं दक्षिणत
तत्र ये शीताया महानद्या उत्तरतः कच्छादिषु विजयेषु तीर्थकरा उत्पद्यंते ते उत्तरे सिंहासने सुरेंद्रैरभिषिच्यं
ते ये पुनः शीताया महानद्या दक्षिणतो मंगलावत्यादिषु विजयेषूत्पद्यंते ते दाक्षिणात्ये सिंहासने तथा ए
कमुत्तरतः एकं दक्षिणतः तत्र शीतोदाया महानद्या दक्षिणतः पद्मादिषु विजयेषु ये तीर्थकरा उत्पद्यंते ते दा
क्षिणात्ये सिंहासनेऽभिषिच्यंते ये पुनः शीतोदाया महानद्या उत्तरतो गंधिलावत्यादिषु विजयेषु जायंते ते उत्त

रा हे सिंहासने त ... चूलिकाया दक्षिणदिग्भागवर्तिन्यां पांडुकंबलशिलायां ये भरतक्षेत्रसमुद्भवास्तीर्थकरास्ते
ऽभिषिच्यंते उत्तरदिग्भागवर्तिन्यां रक्तकंबलशिलायामैरवतक्षेत्रसमुद्भवाः सिंहासनानि च सर्वरत्नमयानि स
र्वाण्यपि प्रत्येकं पंचधनुःशतायामविष्कंभान्यर्द्धतृतीयधनुःशतबाहल्यानीति ततः समधिकाभिषेकसिंहा
सनाभावाद्देवविदेहेषु चतुर्भ्योऽधिकानां तीर्थकृतामेककालमुत्पत्त्यभावाद्विंशतिर्जघन्यतः पुनर्दशैवैककालमु
त्पद्यंते पंचसु भरतेषु पंचस्वैरवतेषु प्रत्येकमेकैकस्य संभवात् भरतैरवतेषु हि जिनजन्मसमये महाविदेहेषु
दिनसद्भावान्नाधिकानामुत्पत्तिरिति ३३।७४ इदानीं जिनगणधरान् त्रिपंचाशत्तमं द्वारमाह चुलसीइं पंचनवइं
बिउत्तरं सोलसुत्तरं च सयं सत्तुत्तरं पणनवइं तेणउई अट्ठसीया य ३३ एकासीई छावत्तरी य छावट्ठी सत्तवन्ना य प
न्ना तेयालीसा छत्तीसा चेव पणतीसा ३४ तेत्तीस अट्ठवीसा अट्ठारस चेव तह य सत्तरस एकारस दस एकारसेव इय ग
णहरपमाणं ३५ भगवत आदितीर्थकरस्य चतुरशीतिर्गणधराः अजितस्वामिनः पंचनवतिः संभवनाथस्य
द्व्युत्तरं शतं अभिनंदनस्य षोडशोत्तरं शतं सुमतिनाथस्य परिपूर्णं शतं पद्मप्रभस्य सप्ताधिकं शतं सुपार्श्वस्य पंचनव
तिः चंद्रप्रभस्य त्रिनवतिः सुविधिस्वामिनः अष्टाशीतिः शीतलनाथस्य एकाशीतिः श्रेयांसस्य षट्सप्ततिः वासुपू

प्र॰सा॰वृ॰ स्य षष्टिः विमलस्य सप्तपंचाशत् अनंतजिनस्य पंचाशत् धर्मस्य चत्वारिंशत् शांतिनाथस्य षट्त्रिंशत् कुं
१०२ थुनाथस्य पंचत्रिंशत् अरजिनस्य त्रयस्त्रिंशत् मल्लिस्वामिनः अष्टाविंशतिः मुनिसुव्रतस्य अष्टादश नमिना
थस्य सप्तदश श्री अरिष्टनेमेरेकादश १९ पार्श्वनाथस्य दश वर्द्धमानस्वामिन एकादश चेति एतदृषभादीनां चतु
र्विंशतेस्तीर्थकृतां यथाक्रमं गणधराणां मूलसूत्रकर्तॄणां प्रमाणं । इदानीं मुनिप्रमाणं द्वारमाह चुलसीइ स
हस्साइं एगं च लक्खं दो तिन्नि तिन्नि तिन्नि लक्खाय वीसहीया तीसहिय तिन्नि य अट्ठारसय एकं चउरासीइ सहस्सा वि
उत्तरी अट्ठसयरी चउसट्ठी बासट्ठी य सट्ठी चत्तालीसा तीसा वीसा अट्ठारस सोलस य पंचउदस सहस्सा एए पमाणं
पमाणं चउवीसाए जिणवराणं चतुरशीतिसहस्राणि मुनीनामाद्यजिनस्य एकं लक्षं मुनीनामजितजिनस्य २ एवं
मुनितीर्थकृतां सर्वत्र संबंधः कार्यो द्वे लक्षे ३ त्रिलक्षाः ४ त्रिलक्षा विंशतिसहस्राधिका ५ त्रि
लक्षाः त्रिंशत्सहस्राधिका ६ त्रिलक्षा ७ द्वे लक्षे ८ द्वे लक्षे ९ एकं लक्षं १० चतुरशीतिसहस्राः ११ द्विस
प्ततिसहस्राः १२ अष्टषष्टिसहस्राः १३ षट्षष्टिसहस्राः १४ चतुःषष्टिसहस्राः १५ द्विषष्टिसहस्राः १६ षष्टिसहस्राः १७
पंचाशत्सहस्राः १८ चत्वारिंशत्सहस्राः १९ त्रिंशत्सहस्राः २० विंशतिसहस्राः २१ अष्टादशसहस्राः २२ षोडशसहस्राः

२३ चतुर्दशसहस्राः २४ एतत्साधुप्रमाणं क्रमेण चतुर्विंशतिजिनवराणां एतेषां सर्वसंख्यामीलने यमष्टचत्वारिं
शत् अट्ठावीसं लक्खा अडयालीसं च तह सहस्साइं सव्वेसिंपि जिणाणं जईण माणं विणिद्दिट्ठं अष्टाविंशति
लक्षा अष्टचत्वारिंशच्च तथा सहस्राणि सर्वेषामपि जिनानां यतीनां मानं परिमाणं विनिर्दिष्टं विनि
श्चितमेतत् यमेव श्रीजिनेंद्रैर्निजकरकमलेन दीक्षितास्तेषामेवैकत्वविवक्षितानां परिमाणं न पुनर्गणधरादि
भिरपि ये दीक्षितास्तेषामतिबहुत्वादिति २६ इदानीं समणीप्रमाणं द्वारमाह तिन्नि य तिन्नि य ३ तिन्नि य
३ छ पंच ५ उ ६ चउ ७ तिगे ८ क्के १ का १ लक्खा उसहे मो तं तदुत्तरीसंख्याणि मासंख्या १ त्रीणि २ त्रीणि ३ षट्
४ पंच ५ चत्वारि ६ चत्वारि ७ त्रीणि ८ एकं ९ एकं १० लक्षाण्येतानि तत्र ऋषभजिनस्य त्रीणि चार्यिकालक्षाणि स
तो वृषभं मा ... जिनं मुक्त्वा तदपरि पूर्वोक्तलक्षाणां उपरि क्रमेणापादेनः सहस्राण्यरंति तानेवाह तीसा
३ तीसा ३ तीस ४ तीस ५ वासाप ६ तीस ७ असीइंय ८ वीसा ९ इस मजिणिदिंदेसु कोवि अज्जियावक्कं त्रि
शत्सहस्राणि सर्वत्र योज्यं षट् त्रिंशत् ३ त्रिंशत् ४ त्रिंशत् ५ त्रिंशत् ६ विंशति ६ त्रिंशत् ७ अशीति ८ विंशति ९ दशम जिनेंद्र
स शीतलस्याद्योपरि आर्यिकापट्कमति अयं भावार्थः श्रीऋषभदेवस्य आर्यिकालक्षत्रयं जातं अजि

प्र.सा.टी. त्तेनाथस्यार्जिकालक्षत्रयं पंचत्रिंशत्सहस्रैरधिकं संभवजिनस्यार्यिकालक्षत्रयं षट्त्रिंशत्सहस्रैरधिकं अभिनं
१०३ दनस्वामिनो लक्षषट्कं त्रिंशत्सहस्रैरधिकं सुमतिजिनस्यार्यिकालक्षपंचकं त्रिंशत्सहस्रैरधिकं पद्मप्रभस्यार्यि
कालक्षचतुष्टयं विंशतिसहस्रैरधिकं सुपार्श्वस्यार्यिकालक्षचतुष्टयं त्रिंशत्सहस्रैरधिकं सुविधिजिनस्या
र्यिकालक्षमेकं विंशतिसहस्रैरधिकं दशमजिनस्य श्रीशीतलस्यार्यिकाणामेकं लक्षमार्यिकाषट्कं चे
ति दशानीश्रेयांसादिजिनस्याधीनानमार्हत्त्वकोटिन्नसहस्सा ११ लक्खा १२ लक्खो पञ्चसमपञ्चअरिट्ठ १३ वा
सही १४ पुणव्वसमठिमहस्से अट्ठियाचउसएहिं १५ असयाहियइगसट्ठी १६।२६ सट्ठीय स[…] पाइ १७ सट्ठिय
८४ गौन्ना १८ पन्नेग १९ चत्त २१ चत्ता २२ अट्ठतीस अडतीसमहस्सा य २४ श्रेयांसजिनस्याधीनामेकं लक्षं सहस्र
त्रयाधिकं श्रीवासुपूज्यस्याधीनामेकं लक्षं श्रीविमलस्यार्यिकालक्षं शतेनाष्टाधिकं श्रीअनंतजिनस्य
द्विषष्टिसहस्राण्यार्यिकाणां श्रीधर्मजिनस्य पुनरार्यिकाणां द्विषष्टिसहस्राणि चतुर्भिः शतैरधिकानि एम.
श्रीशांतिजिनस्यार्यिकाणां एकषष्टिसहस्राणि षड्भिः शतैरधिकानि श्रीकुंथुनाथस्यार्यिकाणां षष्टिःसह १०३
स्राणि षड्भिः शतैरधिकानि श्रीअरजिनस्यार्यिकाणां षष्टिःसहस्राणि श्रीमल्लिजिनस्यार्यिकाणां पंचपंचा

शत्सहस्राणि श्रीमुनिसुव्रतस्यार्यिकाणां पंचाशत्सहस्राणि श्रीनमेरार्यिकाणां एकचत्वारिंशत्सहस्राणि
श्रीनेमेरार्यिकाणां चत्वारिंशत्सहस्राणि श्रीपार्श्वजिनस्यार्यिकाणामष्टत्रिंशत्सहस्राणि श्रीमहावीरजि
नस्यार्यिकाणां षट्त्रिंशत्सहस्राणि ॥ ऋषभस्वामिप्रमुखार्यिकासर्वसंख्यामीलनेयं भवति तद्यथा चोया
लीसं लक्खा छप्पन्नसहस्स चउसयपसमग्गा अज्जा[…] एसो अज्जाणं संगहो महो चउअत्तालिशल्लक्षाः ७४
षट्कं चाशीतिशतसहस्राणि चतुःशताधिकैः समग्राः पूर्णाः आर्याः षट्कं चार्यिकाणां संग्रहः सर्वैरिति ।
।वेउव्वियपत्ति अट्ठारदसहस्सामाहवेउव्वियलद्धीणं वीससहस्सा सयव[…] उव्विमावीससहस्सा चउसय २ इगुणवीस
सहस्स अट्ठसया ३ इगुणवीससहस्स ४ अट्ठारचउसयाओ सोलसहस्स अट्ठसय ६ सत्तसयपन्नास ७ चउदस पन्नरस
९ वारससहस्स दसमे १० ।१५ छगारस ११ दस १२ नव १३ अट्ठ १४ सत्त १५ अउसहस १६ एगवन्नसया १७ सत्तसहस्स
सभिसया १८ दोन्निसहस्सा नवसयपारे १९ दुन्निसहस्सा २० पंचसहस्स २१ पन्नाससयाइं नेमिमि २२ एगारससय
हसपासे २३ सयाइं सत्तेव वीरजिणे २४ ४८ वैक्रियलब्धिमतां नानाविध वैक्रियरूपकरणशक्तानां मुनीनामा
द्यजिनेंद्रस्य विंशतिः सहस्राणि षट्शतान्यधिकानि श्रीअजितजिनस्य विंशतिः सहस्राः सचतुःशताः शतच

प्र·सा·ह त्रुहपाधिका श्रीसंभवजिनेंद्रस्यएकोनविंशतिसहस्राः शताष्टकाधिका श्रीअभिनंदनस्यएकोनविंशतिः सहस्रा
२०४ णि सुमतिनाथस्य चतुःशताधिका अष्टादशसहस्रा श्रीपद्मप्रभस्य षोडशसहस्राणि अष्टोत्तरशताधिकानि श्री
सुपार्श्वजिनस्य शतत्रयाधिकाः पंचदशसहस्राः श्रीचंद्रप्रभस्य चतुर्दशसहस्राः सुविधेस्त्रयोदशसहस्राः श्रीशी
तलस्य द्वादशसहस्राः श्रीश्रेयांसस्य एकादशसहस्राः श्रीवासुपूज्यस्य दशसहस्राणि श्रीविमलजिनस्य नवस
हस्राणि श्रीअनंतजिनस्य अष्टौसहस्राणि श्रीधर्मजिनस्य सप्तसहस्राणि श्रीशांतिनाथस्य षट्सहस्राणि
श्रीकुंथुजिनस्य एकपंचाशत्शतानि पंचसहस्राणि एकशताधिकानीत्यर्थः श्रीअरजिनस्य सप्तसहस्राणि त्रिभिः
शतैरधिकानि श्रीमल्लिजिनस्य द्वौसहस्रौ नवशताधिकौ श्रीमुनिसुव्रतस्य द्वौसहस्रौ श्रीनमिजिनस्य पंच
सहस्राः श्रीनेमिजिनस्य पंचदशशतानि श्रीपार्श्वजिनस्य एकादशशतानि श्रीवीरजिनस्य शतानि सप्तेति।
रदानीं वारजिएकोनविंशद्वाविंशतिबीजुमार एकुकुलसपाठुगालसतसहस्सचारसपचत्रसपमहिमा २ वारे फ़ारस एम·
हस्सा ध दशसहस्सा चत्तसय पन्नासा ५५ ५९ चत्तउई हुँ चुलसीई ७ तहत्तरिं ८ सहिं ८ अठवन्ना य २६ पन्ना सा इसपा २०४
णं २१ सीयाला अह बावाला २२.२४ बत्तीसा २३ बत्तीसा २४ अडतीसा २५ सयाण चउवीसा २६ विसहस्सा २७

सोलसपा १८ चउदस १९ बारस २० दससपाइं २१.२२ अडसपा २३ चउसपा २४ तेनागिसपाइं दुंनि २४ वीरंमि गाउगला
ण जिणाणं चउवीसाए जिणवराणं २५ प्रथमजिनस्य वादिमतीनां द्वादशसहस्रा सार्द्धषट्शताः पंचाशदधि
कैः षड्भिः शतैरधिकाः इत्यर्थः श्रीअजितजिनस्य द्वादशसहस्राः चतुःशताधिकाः श्रीसंभवस्य द्वादशसहस्राः श्री
अभिनंदनस्य एकादशसहस्राः श्रीसुमतिजिनस्य दशसहस्राः पंचाशदधिकषट्शताधिकाः चत्तउई साहिगा।
था सुत्रार्थे द्विशतानामिति पदं सर्वत्र संबध्यते ततः पद्मप्रभस्य वादिनां षण्णवतिशतानां कोऽर्थः नवसह
स्राः षट्शतैरधिकाः इति सुपार्श्वजिनस्य चतुरशीतिशतानां चतुर्भिः शतैरधिका अष्टौसहस्राः चंद्रप्रभस्य ष
ट्सप्ततिः शतानां षड्भिः शतैरधिकानि सप्तसहस्राणीत्यर्थः सुविधिजिनस्य षष्टिः शतानां षट्सहस्रा।
णीत्यर्थः श्रीशीतलजिनस्य अष्टपंचाशच्छतानां पंचसहस्राः अष्टशताधिका इत्यर्थः श्रीश्रेयांसस्य पंचाश
च्छतानां पंचसहस्राणीत्यर्थः श्रीवासुपूज्यस्य सप्तचत्वारिंशच्छतानि चत्वारः सहस्राः सप्तशताधिका इत्यर्थः अष्टच
वायालत्ति अथ चामनंतरेण श्रीवासुपूज्यस्य द्विचत्वारिंशत्शतानि चत्वारः सहस्राः शतद्वयाधिका इत्यर्थः श्रीवि
मलजिनस्य द्वात्रिंशच्छतानि त्रीणि सहस्राणि द्विशताधिकानीत्यर्थः श्रीअनंतजिनस्य द्वात्रिंशच्छतानि त्री।

प्र.सा.वृ. सहस्राणि शतद्वयाधिकानि श्रीधर्मस्य अष्टाविंशतिशतानां सहस्र[illegible]द्वयमष्टशताधिकं सर्व्वं
२०५ श्रीशांतिनाथस्य शतानां चतुर्विंशतिर्द्वे सहस्रे शतचतुष्टयाधिके सर्व्वं श्रीकुंथुजिनस्य द्वे सहस्रे श्रीअरनाथस्य
षोडश शतानि षट्शताधिकं सहस्रमिति सर्व्वं श्रीमल्लिजिनस्य चतुर्दश शतानि शतचतुष्टयाधिकसहस्रमिति स
र्व्वं श्रीमुनिसुव्रतस्य द्वादश शतानि सहस्रमेकं शतद्वयाधिकमिति सर्व्वं श्रीनमिजिनस्य दश शतानि द्वे सहस्र
मिति सर्व्वं श्रीनेमिजिनस्य अष्टौ शतानि श्रीपार्श्वजिनस्य षट् शतानि श्रीवीरस्य चत्वारि शतानि भवन्ति इति वा
द मुनीनां वादसमरेषु सुरासुरेषु अजेयानां यतीनां प्रमाणं चतुर्विंशतिजिनवराणामिति २९ इदानीं अव
धिज्ञानिसंख्यामाह ओहिन्नाणिमुणीणं नउई चउनवइ छन्नवइ सयाणि अट्ठाणवइसयाणि य एकार
स ५ दस ६ नवसहस्सा ७ ५ ९ असई चुलसी ९ बहत्तरि १० सट्ठी ११ चउपन्न १२ अठयाला १३ तेयाला १४ बत्ती एम.
सा १५ तीसा १६ पणुवीस १७ छवीसा १८ । २४ बावीसा १९ अट्ठारस २० सोलस २१ पन्नरस २२ चउदस २३ सयाणि तेर २०५
स २४ साहस्साणपारे ओहिनाणीण वीरस्स २५ तत्रादिजिनस्य अवधिज्ञानमुनीनां नवतिः शतानि नव सहस्राणि
सर्व्वं अजितजिनस्य चतुर्नवतिशतानि नव सहस्राणि चतुर्भिः शतैरधिकानि सर्व्वं श्रीसंभवजिनस्य षण्णवतिश

तानि नव सहस्राणि षड्भिः शतैरधिकानि सर्व्वं श्रीअभिनंदनस्य अष्टानवतिशतानि नव सहस्राणि अष्टशतैरधिका
सर्व्वं श्रीसुमतिजिनस्य एकादश सहस्राणि श्रीपद्मप्रभस्य दश सहस्राणि सुपार्श्व[illegible]स्य नव सहस्राणि अत्र
वा वीसेसादि तृतीयप्रमाणापाद्वितीयपदे वर्जितपाणिनि ग्रंथाग्रं २०० पदमसीसादिपरे सुपार्श्वने नतः श्रीचं
द्रप्रभस्य अशीतिशतानि अष्टौ सहस्राणि सर्व्वं श्रीसुविधिजिनस्य चतुरशीतिशतानि अष्टौ सहस्राणि चतुर्भिः
शतैरधिकानि सर्व्वं श्रीशीतलस्य द्विसप्ततिशतानि सप्तसहस्राणि शतद्वयाधिकानि सर्व्वं श्रीश्रेयांसजिनस्य
षष्टिशतानि सहस्रषट्कमिति सर्व्वं श्रीवासुपूज्यस्य चतुःपंचाशच्छतानि पंचसहस्राणि चतुःशताधिका
नि सर्व्वं श्रीधर्म्मजिनस्य षट्त्रिंशच्छतानि सहस्रत्रयं षड्भिः शतैरधिकमिति सर्व्वं श्रीशांतिनाथस्य त्रिंशच्छ
तानि त्रयः सहस्राणि सर्व्वं श्रीकुंथुनाथस्य पंचविंशतिशतानि सहस्रद्वयं पंचशताधिकमिति सर्व्वं श्रीअर
नाथस्य षड्विंशतिशतानि द्वे सहस्रे षट्शताधिके सर्व्वं श्रीमल्लिजिनस्य द्वाविंशतिशतानि सहस्रद्वयं
द्विशताधिकमिति सर्व्वं श्रीमुनिसुव्रतस्य अष्टादश शतानि सहस्रमेकमष्टशताधिकमिति सर्व्वं श्रीनमिजिनस्य
षोडश शतानि सहस्रमेकं षट्शताधिकमिति सर्व्वं श्रीनेमिजिनस्य पंचदश शतानि एकसहस्रं शतपंचकाधिक

प्रश॰ वृ॰ १०६

१ सर्षः श्रीपार्श्वजिनस्य चतुर्दशशतानि सहस्रमेकं शतञ्च चतुष्टयाधिकमिति सर्षः श्रीमहावीरजिनस्य चत्वारो दशश
तानि सहस्रमेकं शतत्रयाधिकमिति सर्षं केवलिविहारमेकविंशतितमं मिदानीमाह चौरासीसहस्सा उसहे वीसं बावी ग्र॰
स२ अहस्त अजियस्स पन्नरस३ चउदस४ तेरस५ बारस६ एकारस७ दसेव८ ५६ अट्ठम९ सत्तेव१० चसहु
११ वज्जु१२ पंचसहस्स१३ पंचेव१४ अट्ठपंचम१५ चउसहस्सा तिन्नियसमाप१६ बत्तीससमपा अट्ठ बावीससपा
इंटन्नेति कुंथुस्स१७ अट्टावीसं१८ बावीससतरस१९ अट्ठारससमपार२० ५६ सोलस२१ पन्नरस२२ दससप२३ स
मेवससपाहवेति वीरस्स२४ एवं केवलिमाणं समणपसवनाणगिणिंतु२९ केवलिनो विंशतिसहस्रा ऋषभेहूप
भजिनस्य विंशतिसहस्रा त्रिंशतिसहस्रा अपवामनंतरेण द्वाविंशतिः सहस्रा अजिननाथस्य श्रीसंभवस्य पंचद
श सहस्रा श्रीअभिनंदनस्य चतुर्दशसहस्राः श्रीसुमतिनाथस्य त्रयोदशसहस्राः श्रीपद्मप्रभस्य द्वादशसहस्राः श्री प्रश॰
सुपार्श्वस्य एकादशसहस्राः चंद्रप्रभस्य दशैव सहस्राः श्रीसुविधिजिनस्य अष्टौ सहस्राः सप्तसहस्रा पंचश १०६
ताधिकाः इसर्षः श्रीशीतलजिनस्य सप्तसहस्राः श्रीश्रेयांसस्य षट्सहस्राः सार्द्धसपंचशताः इसर्षः श्रीवासुपूज्यस्य
षट्सहस्राः एवं विमलजिनस्य पंचसहस्राः सार्द्धसपंचशताः इसर्षः श्रीअनंतजिनस्य पंचैव सहस्राः श्रीधर्मजिनस्य

अर्द्धपंचमाः सहस्राः अस्याः सहस्रा पंचसप्तत्या इस्यर्षः श्रीशांतिनाथस्य चत्वारः सहस्राः शतत्रयाधिकाः श्रीकुंथुजि
नस्य द्वात्रिंशत्शतानि सहस्रत्रयं शतद्वयाधिकमिति सर्षः एवमनंतरेण द्वाविंशतिशतानि सहस्रद्वयं शतद्वया
धिकमिति सर्षः श्रीअरजिनस्य अष्टाविंशतिशतानि सहस्रद्वयं शतानाष्ट२धिकमिति सर्षः श्रीमल्लिजिनस्य द्वाविंशति
शतानि सहस्रद्वयं शतद्वयाधिकमिति सर्षः श्रीमुनिसुव्रतस्य अष्टादशशतानि सहस्रमेकमष्टशताधिकमिति स
र्षः श्रीनमिजिनस्य षोडशशतानि सहस्रमेकं षट्शतैराधिकमिति सर्षः श्रीनेमिजिनस्य पंचदशशतानि सहस्र
मेकं पंचशताधिकमिति सर्षः श्रीपार्श्वजिनस्य दशशतानि सहस्रमेकं सर्षः श्रीवीरजिनस्य सप्तशतानि एतत्स
र्वेकत्र्याक्रमं सर्वतीर्थंकृतां केवलिमानं मनःपर्यवज्ञानिपरिमाणमिदानीं क्रमरूसर्षः तदेवेदानीं गणपज्जवना
णनिहा विंशतितमद्वारमाह बारससहस्सतिन्नि सपससद्धासत्त१ पंचय२ दिवड्ढं३ एगारस सड्ढचउसपय४ दससहस्सा
चउसपासड्ढा५ दससहस्सा तिन्निसया६ नवदिवड्ढसया य७ अट्ठसहस्साप८ पंचसयसत्तसहस्सा९ सुविहिजिणेसीय
लेवेव१० ६१ वसहस्स११ छेगार१२ मिलो पंचसहस्सा इंपंचपसमपार१३ पंचसहस्सा१४ चउरो सहस्ससयपंचे अमारिप
१५ ६२ चौरीसहस्सतिन्निय१६ तिन्निसमपाहवंति चालीसा१७ सहस्सदुगंपंचसयपार१८ गवन्ना अरजिणिंदस्स१९ । ६२

प्र·सा·वृ
२०७

सत्तरससया सयपन्ना १९ पंचसयाइं सया य २० बारसयसद्धा २१ सहस्सो २२ सय य अद्धट्ठम २३ पंचेव सया वीरस्स २४ ॥ ४ ॥ व्या
ख्या वृषभजिनस्य भगवतो नाभेयतीर्थकृतो द्वादश मनःपर्यवज्ञानिनः सहस्राः पूर्वमाद्विजिनस्य सार्द्धे सप्तशताधिकाः
अजितजिनस्य पंचशताधिकाः संभवजिनस्य सार्द्धं शताधिकास्तथा अभिनंदनस्य मनःपर्यवज्ञानिनामेकादश स
हस्राः सार्द्धषट्शताधिकाः श्रीसुमतेर्दश सहस्राः सार्द्धचतुःशताधिकाः श्रीपद्मप्रभस्य दश सहस्राः शतत्रया
धिकाः श्रीसुपार्श्वस्य नव सहस्राः सार्द्धैकशताधिकाश्चंद्रप्रभस्याष्टौ सहस्राः सुविधेः सप्त सहस्राः पंचशताधिकाः
शीतलस्यैतावंत एव श्रेयांसजिनस्य श्रीवासुपूज्यस्य जिनस्य च षट् षट् सहस्राः इतोऽनंतरं विमलजिनस्य पंच स
हस्राणि पंच शताधिकानि अनंतजिनस्य पंच सहस्राः श्रीधर्मस्य चत्वारः सहस्राः पंचशताधिकाः श्रीशांतिजिन
स्य चत्वारः सहस्राः श्रीकुंथोस्त्रयः सहस्रास्त्रयस्त्रिंशदधिकशतत्रयाधिकाः श्रीअरजिनस्य सहस्रद्विकमेकपंचा एम·
शदधिकपंचशताभ्यधिकं श्रीमल्लेः सप्तदश शतानि पंचाशदधिकानि श्रीमुनिसुव्रतस्य पंचदश शतानि श्री २०७
नमिजिनस्य द्वादश शतानि षष्ट्यधिकानि श्रीनेमेरेकसहस्रः श्रीपार्श्वजिनस्य शतानि सप्त सार्द्धानि सार्द्धानि सप्त शतानी
त्यर्थः श्रीवीरजिनस्य पंचैव शतानीति ॥ २२ ॥ इदानीं चउदसपुव्वित्ति त्रयोविंशतितमं द्वारमाह ॥ चउदसपुव्विसहस्सा चउ

रो अद्धट्ठमाणि पंचसयाणि वीसहियसत्ततीसा २ इगवीससया य पन्नासा ५ पन्नरस चउवीससया य ६ वीससया तीसा ७ दो सहस्स पन्नाससया ९ सय चउदस १० तेरसया इं १२ ॥ ६६ ॥ सय बारस ११ एक्कारस १२ दस १४ नव १५ अट्ठेव १६ छच्च सयसयया १७ दस हियपंचेव सया अरस्स सिरिया १९ ॥ ६७ ॥ सय पंच २० अद्धपंचम २१ चउरो २२ अद्धुट्ठ २३ तिन्नि य सया इं
२४ उसहाइजिणिंदाणं चउदसपुव्वीण परिमाणं ॥ ६८ ॥ तत्रादिजिनस्य चतुर्दशपूर्विणां चत्वारः सहस्राः अर्द्धाष्ट
मानि च शतानि पंचाशदधिकानि सप्त शतानीत्यर्थः श्रीअजितजिनस्य विंशत्यधिकसप्तत्रिंशच्छतानि श्रीसंभवजि
नस्य एकविंशतिः शतानि पंचाशदधिकानि श्रीअभिनंदनस्य पंचदश शतानि श्रीसुमतेः चतुर्विंशतिः शतानि श्री
पद्मप्रभस्य त्रयोविंशतिः शतानि श्रीसुपार्श्वस्य विंशतिः शतानि त्रिंशदधिकानि श्रीचंद्रप्रभस्य द्वौ सहस्रौ श्रीसुवि
धेः पंचदश शतानि श्रीशीतलस्य शतानि चतुर्दश श्रीश्रेयांसस्य त्रयोदश शतानि श्रीवासुपूज्यस्य द्वादश शतानि
विमलजिनस्य एकादश शतानि श्रीअनंतजिनस्य दश शतानि श्रीधर्मस्य नव शतानि श्रीशांतेरष्टैव शतानि श्री
कुंथोः षट् शतानि सप्तत्यधिकानि श्रीअरजिनस्य दशाधिकानि षट् शतानि श्रीमल्लिजिनस्य षट् शतानि अष्टषष्ट्य
धिकानि श्रीसुव्रतस्य शतानि पंच श्रीनमेः अर्द्धपंचमानि शतानि पंचाशदधिकानि श्रीनेमेरर्द्धचतुर्थानि शतानि श्रीपार्श्वजिन

प्र·सा·वृ· २०८

स्वर्गीणि शतानि रहदेवर्षेभ्यः ऋषभादिजिनेंद्राणां क्रमेण चतुर्दश पूर्वविपरिमाणं २३ तद्दानीम हूर्तिर्त चतुर्विंशतितमे हूार
मार पञ्चमस्यासि त्रिलक्षकापंचसहस्रा १ तुलाकुमासंतीलक्षकोवरि अरुनवइर ३२ नेणाउइं ३ अवसीइप ४ । ८९ णगासी ५
वावन्नरि ६ सत्तावन्नाय ७ तहूपपन्नासा ८ एगुणतीसनवासी ९ इगुणासी १० पनार ११ अट्ठेव १२ वञ्चियसहस्स १४ चउरोस
हस्स १५ नउइसहस्समंतिस्स १६ तत्तोए गोलारको उवरिं यणासीय १७ तुलसीय १८ ७१ नेयासी १९ वावंन्नरि २० सत्तरि
२१ इगुहत्तरि य २२ चउसट्ठी २३ एगुणसट्ठिसहस्सा २४ सावगमाणं जिणवेराणं ७३ तत्र प्रथमजिनस्य श्रावकाणां ति
स्रो लक्षा पंचसहस्राधिकाः श्रीअजितादिजिनानां पार्श्वनाथजिनस्य यावत् लक्षद्वयं आदानं द्विलक्षोपरि च
यदधिकं भवति तन्निवेद्यते तत्र द्वितीयगाथापाठे त्रिसहस्रत्रिपदस्य सर्वत्रापि संबंधात् अष्टनवतिसहस्राः अजित
जिनस्य लक्षद्वयमष्टनवतिसहस्राधिकमित्यर्थः त्रिनवतिः श्रीसंभवस्य लक्षद्वयं त्रिनवतिसहस्राधिकमित्यर्थः श्री एप· १०८
अभिनंदनस्य लक्षद्वयमष्टाशीतिसहस्राधिकमित्यर्थः एकाशीतिः सुमतेर्लक्षद्वयमेकाशीतिसहस्राधिकमित्य
र्थः षट्सप्ततिः श्रीपद्मप्रभस्य लक्षद्वयं षट्सप्ततिसहस्राधिकमित्यर्थः सप्तपंचाशच्च श्रीसुपार्श्वस्य लक्षद्वयं सप्तपंचा
शत्सहस्राधिकमित्यर्थः तथा पंचाशच्चंद्रप्रभस्य लक्षद्वयं पंचाशत्सहस्राधिकमित्यर्थः एकोनत्रिंशत् श्रीसुविधेर्लक्ष

द्वयमेकोनत्रिंशत्सहस्राधिकमित्यर्थः श्रीशीतलस्य लक्षद्वयं नवाशीतिसहस्राधिकमित्यर्थः एकोनाशीतिः श्रीश्रे
यांसस्य लक्षद्वयमेकोनाशीतिः सहस्राधिकमित्यर्थः पंचदश श्रीशीतलस्य लक्षद्वयं पंचदशसहस्राधिकमित्य
र्थः अष्टौ च श्रीविमलजिनस्य लक्षद्वयं अष्टसहस्राधिकमित्यर्थः षट्सहस्राः श्रीअनंतजिनस्य लक्षद्वयं ष
ट्सहस्राधिकमित्यर्थः चत्वारि सहस्राः श्रीधर्मजिनस्य लक्षद्वयं चतुर्भिः सहस्रैरधिकमित्यर्थः नवतिः सहस्राः
श्रीशांतेर्लक्षद्वयं नवतिः सहस्राधिकमित्यर्थः ततः श्रीशांतिनाथादनंतरं कुंथुप्रभृतीनां तीर्थकृतां महावीर
पर्यंतानामेकैकलक्षस्य आदानात् लक्षोपरितयस्यास्यानंतरमनुमते । यथा एकोनाशीतिः कुंथोर्लक्षमेकमेकोना
शीतिसहस्राधिकमित्यर्थः चतुरशीतिः श्रीअरजिनस्य लक्षमेकं चतुरशीतिसहस्राधिकमित्यर्थः अशीतिः
श्रीमल्लेर्लक्षमेकं अशीतिसहस्राधिकमित्यर्थः द्विसप्ततिः श्रीमुनिसुव्रतस्य लक्षमेकं द्विसप्ततिसहस्राधि
कमित्यर्थः सप्ततिर्नमेर्लक्षमेकं सप्ततिसहस्राधिकमित्यर्थः एकोनसप्ततिः श्रीनेमेर्लक्षमेकमेकोनसप्ततिस
हस्राधिकमित्यर्थः चतुःषष्टिः श्रीपार्श्वस्य लक्षमेकं चतुःषष्टिसहस्राधिकमित्यर्थः एकोनषष्टिसहस्राः श्रीवीरजि
नस्य लक्षमेकोनषष्टिसहस्राधिकमित्यर्थः इति जिनवरेंद्रचतुर्विंशतेः सर्वेषामपि श्रावकाणां मानं क्रमेण ज्ञातव्यं ॥ २

प्र·सा·उ·
१०९

दानींसहस्राणिनिपंचविंशतितमंद्वारंनिर्दिदिक्षुराह। पढमस्सपंचलरकाचउपन्नसहस्स १ तयणुपणलरका २प
णयालीससहस्सा २ चलरकउणतीससहस्सा ३।७२ सत्तावीससहस्साहियलरकापंच ४ पंचलरका ५ सोलससह
स्स अहियापणलरकापंचउसहस्सा ६।७४ चउपिचउरोलरका ७ अरोलाउवरिसहस्सनेगउई ७ इगनउई इगनउई
९ अडवन्न १० छयाल ११ वत्तीसा १२ चउवीसा १३ चउदस १४ तेरसेव १५ तत्तोतिअलरकजावीरोतदुवरितिनवइगासी
१७ विसत्तरी १८ सयरि १९ पन्नासा २०।७३ अडयालाछत्तीसा २१ इगुवन्न २२ अट्ठारसेवयसहस्सा सहस्साणमाणमेयं
चउवीसाएजिणवराणं ७७ तत्रप्रथमस्यादिजिनस्यश्राविकाणांपंचलक्षाणिचतुःपंचाशत्सहस्राधिकानि
तस्तद्वयमतीर्थकरानंतरंअजितजिनस्यश्राविकाणांपंचलक्षाणि पंचचत्वारिंशत्सहस्राधिकानि श्रीसंभव
स्यषट्लक्षाणिषट्त्रिंशत्सहस्राधिकानिअभिनंदनस्यसप्तविंशतिसहस्राधिकाःपंचलक्षाः पंचसुमतिजिनस्यल एम· १०९
क्षाः पंचेवसहस्राः षोडशाधिकाः श्रीपद्मप्रभस्यलक्षाः पंचपंचसहस्राधिकाः तत उत्तराः पद्मप्रभाद्याः धर्मजिनंपा
वतश्राविकाणांचतस्रो लक्षाः प्रत्येकमुपरित्रिनवत्यादयः सहस्राः कोर्थः सुपार्श्वस्यश्राविकाणांलक्षचतुष्टयंत्रि
नवतिसहस्राधिकं चंद्रप्रभस्यलक्षचतुष्टयमेकनवतिसहस्राधिकं सुविधेर्लक्षचतुष्टयमेकसप्ततिसहस्राधिकं शी

तलस्यलक्षचतुष्टयमष्टपंचाशत्सहस्राधिकंश्रेयांसस्यलक्षचतुष्टयंअष्टचत्वारिंशत्सहस्राधिकं श्रीवासुपूज्यस्य
लक्षचतुष्टयंषट्त्रिंशत्सहस्राधिकंविमलस्यलक्षचतुष्टयंचतुर्विंशतिसहस्राधिकं अनंतस्यलक्षचत्वारिंशत्
हस्राधिकेश्रीवासुपूज्यत्रयचतुर्दशसहस्राधिकेश्रीधर्मस्यलक्षचतुष्टयंत्रयोदशसहस्राधिके ततःशांति
नाथाद्याः प्रत्येकंलक्षत्रयंश्राविकाणांयावन्महावीरंतदुपरित्रिनवत्यादयःसहस्राः तत्रश्रीशांतेर्लक्षत्र
यंत्रिनवतिसहस्राधिकंकुंथोर्लक्षत्रयमेकाशीतिसहस्राधिके अरजिनस्यलक्षत्रयंद्विसप्ततिसहस्राधि
कं मल्लेर्लक्षत्रयंसप्ततिसप्ततिसहस्राधिकं मुनिसुव्रतस्यलक्षत्रयं पंचाशत्सहस्राधिकं श्रीनमेर्लक्ष
त्रयमष्टचत्वारिंशत्सहस्राधिकं श्रीनेमेर्लक्षत्रयंषट्त्रिंशत्सहस्राधिकं श्रीपार्श्वस्यलक्षत्रयमेकोनचत्वा
रिंशत्सहस्राधिके श्रीनमेर्लक्षत्रयमष्टचत्वारिंशत्सहस्राधिके श्रीवीरजिनस्यलक्षत्रयमष्टादशसहस्राधि
के श्राविकाणांमानमेतच्चतुर्विंशतेर्जिनवराणामिति २५ ॥इदानींजिनजनकनिरूपणंषड्विंशतितमंद्वारमाह॥
जरकाणगोमुहमहजरक २ तिमुह ३ ईसर ४ तुंबुर ५ कुसुमो ६ मायंगो ७ विजय ८ अजिय ९ बंभो १० मणुउय ११ सुरकु
मारो १२ छम्मुह १३ पयाल १४ किन्नर १५ गरुडो १६ गंधव्व १७ तहयजरिकंदो १८ कूवर १९ वरुणो २० भिउडी २१

प्र·सा·वृ· गोमेधु २२ दामणा २३ मयंगो २४ ७९ पढमाभञ्जर स्सासिर्षउ नामे तत्राद्यजिनस्य गोमुखो यक्षः सुवर्णव
११० र्णो गजवाहनश्चतुर्भुजो वरदाक्षमालिकायुक्तदक्षिणपाणिद्वयो मातुलिंगपाशकान्वितवामपाणिद्वय
श्च अजितनाथस्य महायक्षाभिधो यक्षश्चतुर्मुखः श्यामवर्णः करिवाहनोऽष्टपाणिर्वरदमुद्गराक्षसू
त्रपाशकान्वितदक्षिणपाणिचतुष्टयो बीजपूरकाभयांकुशशक्तियुक्तवामपाणिचतुष्कः श्रीसंभवजिनस्य
त्रिमुखो नाम यक्षस्त्रिवदनः त्रिनेत्रः श्यामवर्णो मयूरवाहनः षड्भुजो नकुलगदाभययुक्तदक्षिणकरत्र
यो मातुलिंगनागाक्षसूत्रयुक्तवामपाणित्रयश्च श्रीअभिनंदनस्येश्वरो यक्षः श्यामकांतिर्गजवा
हनश्चतुर्भुजो मातुलिंगाक्षसूत्रयुक्तदक्षिणकरकमलद्वयो नकुलांकुशान्वितवामपाणिद्वयश्च श्रीसुम
तेस्तुंबरुर्यक्षः श्वेतवर्णो गरुडवाहनश्चतुर्भुजो वरदशक्तियुक्तदक्षिणपाणिद्वयो गदानागपाशयुक्तवाम प्र·
पाणिद्वयश्च श्रीपद्मप्रभस्य कुसुमो यक्षो नीलवर्णः कुरंगवाहनश्चतुर्भुजः फलाभययुक्तदक्षिणपाणि ११०
द्वयो नकुलाक्षसूत्रयुक्तवामपाणिद्वयश्च श्रीसुपार्श्वस्य मातंगो यक्षो नीलवर्णो गजवाहनश्चतुर्भुजो बि
ल्वपाशयुक्तदक्षिणपाणिद्वयो नकुलांकुशयुक्तवामपाणिद्वयश्च श्रीचंद्रप्रभस्य विजयो यक्षो हरितवर्ण

स्त्रिनेत्रो हंसवाहनो द्विभुजो दक्षिणहस्ते चक्रो वामहस्ते मुद्गरश्च श्रीसुविधिजिनस्याजितो यक्षः
श्वेतवर्णः कूर्मवाहनश्चतुर्भुजो मातुलिंगाक्षसूत्रयुक्तदक्षिणपाणिद्वयो नकुलकुंतकलितवामपाणिद्व
यश्च श्रीशीतलस्य ब्रह्मा यक्षश्चतुर्मुखस्त्रिनेत्रः सितवर्णः पद्मासनोऽष्टभुजो मातुलिंगमुद्गरपाशकाभय
युक्तदक्षिणपाणिचतुष्टयो नकुलगदांकुशाक्षसूत्रयुक्तवामपाणिचतुष्टयश्च श्रीवासुपूज्यस्य कु
मारो यक्षः श्वेतवर्णो हंसवाहनश्चतुर्भुजो मातुलिंगबाणान्वितदक्षिणपाणिद्वयो नकुलधनुर्युक्तवामहस्त
द्वयश्च श्रीविमलस्य षण्मुखो यक्षः श्वेतवर्णः शिखिवाहनो द्वादशभुजः फलचक्रबाणखड्गपाशाक्षसूत्रयुक्त
दक्षिणपाणिषट्को नकुलचक्रधनुःफलकांकुशाभययुक्तवामपाणिषट्कश्च श्रीअनंतस्य पातालो यक्षस्त्रि
मुखो रक्तवर्णो मकरवाहनः षड्भुजः पद्मखड्गपाशयुक्तदक्षिणपाणित्रयो नकुलफलकाक्षसूत्रयुक्तवामपा
णित्रयश्च श्रीअनंतस्य पातालो यक्षस्त्रिमुखो रक्तवर्णः कूर्मवाहनः षड्भुजो बीजपूरकगदाभययुक्तदक्षिणपा
णित्रयो नकुलपद्माक्षमालायुक्तवामपाणित्रयश्च श्रीशांतिनाथस्य गरुडो यक्षो वराहवाहनः क्रोडवदनः श्या
मवर्णश्चतुर्भुजो बीजपूरकपद्मान्वितदक्षिणकरद्वयो नकुलाक्षसूत्रयुक्तवामपाणिद्वयश्च श्रीकुंथोर्गंधर्वयक्षः

प्र॰सा॰वृ॰ श्यामवर्णो हंसवाहनश्चतुर्भुजो वरदपाशकान्वितदक्षिणपाणिद्वयो मातुलिंगांकुशाधिष्ठितवामकरद्वयश्च
२११ श्रीअरजिनस्य यक्षेन्द्रो यक्षः षण्मुखस्त्रिनेत्रः श्यामवर्णः शंखवाहनो द्वादशभुजो बीजपूरकबाणखड्गमुद्गर
पाशकाभययुक्तदक्षिणकरषट्को नकुलधनुष्फलकशूलांकुशाक्षसूत्रयुक्तवामपाणिषट्कश्च श्रीमल्लिजि
नस्य कुबेरो यक्षश्चतुर्मुख इन्द्रायुधवर्णो गजवाहनोऽष्टभुजो वरदपरशुशूलाभययुक्तदक्षिणपाणिचतुष्टयो
बीजपूरशक्तिमुद्गराक्षसूत्रयुक्तवामपाणिचतुष्टयश्च अस्मिन्कुबेरस्थाने कुबेरो माङ्गः मुनिसुव्रतस्य वरुणो
यक्षश्चतुर्मुखस्त्रिनेत्रः धवलवर्णो वृषभवाहनो जटामुकुटमण्डितोऽष्टभुजो बीजपूरकगदाबाणशक्तियुक्तद
क्षिणकरचतुष्टयो नकुलपद्मधनुःपरशुयुतवामपाणिचतुष्टयः श्रीनमिजिनस्य भृकुटिर्यक्षश्च
तुर्मुखस्त्रिनेत्रः सुवर्णवर्णो वृषभवाहनोऽष्टभुजो बीजपूरकशक्तिमुद्गराभययुक्तदक्षिणकरचतुष्टयो नकु एम॰
लपरशुवज्राक्षसूत्रयुक्तवामकरचतुष्टयश्च श्रीनेमिजिनस्य गोमेधो यक्षस्त्रिमुखः श्यामकान्तिः पुरुषवाहनः २११
षड्भुजो मातुलिंगपरशुचक्रान्वितदक्षिणकरत्रयो नकुलशूलशक्तियुक्तवामपाणित्रयश्च श्रीपार्श्वजिन
स्य वामनो नामान्तरेण पार्श्वनामा यक्षो गजमुख उरगफणामण्डितशिराः श्यामवर्णः कूर्मवाहनश्चतुर्भुजो च

तुर्भुजो बीजपूरकोरगयुक्तदक्षिणपाणिद्वयो नकुलभुजगयुक्तवामपाणियुगश्च श्रीवीरजिनस्य मातंगो
यक्षः श्यामवर्णो गजवाहनो द्विभुजो नकुलयुतदक्षिणभुजो वामकरधृतबीजपूरकश्चेति ॥ इदानीं जिन
देवीउ इति सप्तविंशतितमं द्वारमाह ॥ देवी चक्केसरि १ अजिया २ दुरियारि ३ कालि ४ महाकाली ५ अच्चुय
६ संता ७ जाला ८ सुतारया ९ असोय १० सिरिवच्छा ११ पवरा १२ विजयंकुसा १३ १४ पन्नत्ति १५ निव्वाणि १६ अच्च
चुया १७ धरिणी १८ वइरोट १९ छुत्त २० गंधारि २१ अंब २२ पउमावई २३ सिद्धा २४ ॥ तत्राद्यजिनस्य चक्के
श्वरी देवी मतान्तरेणाप्रतिचक्रा सुवर्णवर्णा गरुडवाहना अष्टभुजा वरदबाणचक्रपाशयुक्तदक्षिणपाणि
चतुष्टया धनुर्वज्रचक्रांकुशयुक्तवामपाणिचतुष्टया चेति श्रीअजितजिनस्याजिता मतान्तरेणाजितबला
देवी गौरवर्णा लोहासनाधिरूढा चतुर्भुजा वरदपाशकाधिष्ठितदक्षिणकरद्वया बीजपूरकांकुशालंकृतवाम
पाणिद्वया च श्रीसंभवस्य दुरितारिर्देवी गौरवर्णा मेषवाहना चतुर्भुजा वरदाक्षसूत्रभूषितदक्षिणभुजद्वया फ
लाभयान्वितवामकरद्वया च श्रीअभिनंदनस्य काली नामा देवी श्यामकान्तिः पद्मासना चतुर्भुजा वरदपाशाधि
ष्ठितदक्षिणकरद्वया नागांकुशालंकृतवामपाणिद्वया च श्रीसुमतेर्महाकाली देवी सुवर्णवर्णा पद्मा

प्र·सा·वृ·
११२

हना चतुर्भुजा वरदपाशाधिष्ठितदक्षिणकरद्वया मातुलिंगांकुशयुक्तवामपाणिद्वया चेति श्रीपद्मप्रभस्याच्युताम
तान्तरेण श्यामा देवी श्यामवर्णा नरवाहना चतुर्भुजा वरदबाणान्वितदक्षिणकरद्वया कार्मुकाभययुक्तवामपाणिद्व
या च श्रीसुपार्श्वस्य शांतादेवी सुवर्णवर्णा गजवाहना चतुर्भुजा वराक्षसूत्रयुक्तदक्षिणकरद्वया शूलाभययुक्त
वामहस्तद्वया च श्रीचंद्रप्रभस्य ज्वालामालान्तरेण भृकुटिर्देवी पीतवर्णा वरालकाख्यजीवविशेषवाहना चतुर्भुजा
खड्गमुद्गरान्वितदक्षिणकरद्वया फलकपरशुयुतवामपाणिद्वया च श्रीसुविधेः सुतारादेवी गौरवर्णा वृषभवा
हना चतुर्भुजा वराक्षसूत्रयुक्तदक्षिणकरद्वया कलशांकुशान्वितवामपाणिद्वया च श्रीशीतलस्याशोकादे
वी नीलवर्णा पद्मासना चतुर्भुजा वरदपाशयुक्तदक्षिणपाणिद्वया फलांकुशयुक्तवामपाणिद्वया च श्री
श्रेयांसस्य श्रीवत्सा देवी मतान्तरेण मानवी गौरवर्णा सिंहवाहना चतुर्भुजा वरदमुद्गरान्वितदक्षिणकरद्वया कल   राम·
शांकुशयुक्तवामकरद्वया च श्रीवासुपूज्यस्य प्रवरादेवी मतान्तरेण चंडा श्यामवर्णा तुरगवाहना चतुर्भुजा वरदश   ११२
क्तियुक्तदक्षिणकरद्वया पुष्पगदायुक्तवामकरद्वया च श्रीविमलस्य विजया मतान्तरेण विदिता देवी हरितवर्णा
पद्मासना चतुर्भुजा बाणपाशयुक्तदक्षिणकरद्वया धनुर्नागयुतवामपाणिद्वया च श्रीअनंतजिनस्यांकुशा देवी

गौरवर्णा पद्मासना चतुर्भुजा खड्गपाशयुक्तदक्षिणपाणिद्वया फलकांकुशयुक्तवामकरद्वया च श्रीध
र्मस्य पन्नगा देवी मतान्तरेण कंदर्पा गौरवर्णा मत्स्यवाहना चतुर्भुजा उत्पलांकुशयुक्तदक्षिणपाणिद्वया
पद्माभययुक्तवामपाणिद्वया च श्रीशांतिनाथस्य निर्वाणी देवी कनकरुचिः पद्मासना चतुर्भुजा पुस्तकोत्प
लयुक्तदक्षिणपाणिद्वया कमंडलुकमलकलितवामकरद्वया च श्रीकुंथोरच्युता देवी मतान्तरेण बलाभि
धाना कनकच्छविर्मयूरवाहना चतुर्भुजा बीजपूरकशूलान्वितदक्षिणपाणिद्वया - भुषुंढिपद्मान्वित वामपा
णिद्वया च श्रीअरजिनस्य धारणी देवी नीलवर्णा पद्मासना चतुर्भुजा मातुलिंगोत्पलयुक्तदक्षिणपाणि
द्वया पद्माक्षसूत्रान्वितवामपाणिद्वया चेति श्रीमुनिसुव्रतस्य अछुप्ता देवी मतान्तरेण नरदत्ता कनकरुचिर्भद्रास
नारूढा चतुर्भुजा वराक्षसूत्रयुक्तदक्षिणभुजद्वया बीजपूरकशूलयुक्तवामकरद्वया च श्रीनमिजिनस्य गांधारी
देवी श्वेतवर्णा हंसवाहना चतुर्भुजा वरदखड्गयुक्तदक्षिणकरद्वया बीजपूरककुंतकलितवामकरद्वया च श्री
नेमिजिनस्याम्बा देवी कनकरुचिः सिंहवाहना चतुर्भुजा आम्रलुंबिपाशयुक्तदक्षिणभुजद्वया पुत्रांकुशान्वि
तवामकरद्वया च श्रीपार्श्वजिनस्य पद्मावती देवी कनकवर्णा कुर्कुटसर्पवाहना चतुर्भुजा पद्मपाशान्वितदक्षि

ण करद्वयपल्लवा कुशाधिष्ठितवामकरद्वया च । श्रीवीरजिनस्य सिद्धायिका देवी हरितवर्णा सिंहवाहना चतुर्भुजा
पुस्तकाभयप्रदान्वितदक्षिणकरद्वया बीजपूरकवीणा- न्वितवामकरद्वया चेति अत्र संग्रहकारेण यक्षाणां देवीनां च
केवलानि नामान्येवाभिहितानि न पुनर्नेत्रवर्णादिस्वरूपं निरूपितमस्माभिः सुखावबोधहिताय निर्वाणकलिका
द्यनुसारेण किंचित्तदीयवस्त्रवर्णप्रहरणादिस्वरूपं निरूपितमिति ॥ २७ ॥ इदानीं तणुमाणं तित्थयराणं ति अष्टाविंश
तितमं द्वारमाह पंचधणुस्सय पढमो कमेण पन्नासहीण जा सुविही २०॰ दसहीण जा अणंतो ५॰ पंचूणा
जा जिणो नेमी ३८२ नवहत्थपमाणो पाससामी सत्तहत्थ जिणवीरो उस्सेहअंगुलेणं सरीरमाणं जिणवरा
णं ३८३ तत्र प्रथमो जिन ऋषभस्वामी पंच धनुःशतः पंचधनुःशतानि अर्थाद्देहप्रमाणं पसमत पायं च धनुः
शतप्रमाणशरीरः अयमर्थः ततोऽजितादयः क्रमेण पंचाशता पंचाशता धनुषां हीना यावत्सुविधिजिनः कोऽर्थः
पंचभ्यो धनुःशतेभ्यः पंचाशत्पंचाशत्यासु ततो अजितजिनस्य चत्वारि धनुःशतानि पंचाशदधिकानि दे
हमानमेवं संभवस्वामिनश्चत्वारि धनुःशतानि अभिनंदनस्य पंचाशदधिकानि त्रीणि धनुःशतानि सुमतेः
त्रीणि धनुःशतानि पद्मप्रभस्य पंचाशदधिके द्वे धनुःशते सुपार्श्वस्य द्वे धनुःशते चंद्रप्रभस्य सार्द्धं धनुःशतं सुविधि

स्वामिनः पूर्णमेकं धनुःशतं दशहीणजा अणंतो त्ति सुविधेरनंतरं यावदनंतजिनस्तावत्तीर्थकृतां तनुमानविषये
क्रमेण दशभिर्दशभिर्हीना वक्तव्या ततोऽयमर्थः सुविधिजिनतनुमानं धनुःशतं तस्माद्दशसु पतितेषु शीतल
स्य नवतिर्धनूंषि देहमानं एवं श्रेयांसस्याशीतिर्धनूंषि वासुपूज्यस्य सप्ततिः विमलस्य षष्टिः अनंतजिनस्य
पंचाशद्धनूंषि पंचूणा जाव जिणो नेमि त्ति अनंतजिनादनंतरं तीर्थकृतः क्रमेण पंचभिः पंचभिर्न्यूना वक्तव्या
यावन्नेमिजिनस्तत्रायमर्थः अनंतजिनदेहमानात्पंचाशद्धनुर्लक्षणात्पंचसु पतितेषु धर्मजिनस्य पंचचत्वा
रिंशद्धनूंषि देहमानं एवं शांतिनाथस्य चत्वारिंशद्धनूंषि कुंथुनाथस्य पंचत्रिंशद्धनूंषि अरस्वामिनस्त्रिंशत् मल्लि
जिनस्य पंचविंशतिः मुनिसुव्रतस्य विंशतिः नमिनाथस्य पंचदश अरिष्टनेमेर्दश धनूंषि नव हस्तप्रमाणः पार्श्व
स्वामी सप्तहस्तप्रमाणश्च वीरजिनः ॥ इत्येवमुत्सेधांगुलेन प्रमाणेन शरीरमानं जि
नवराणां विज्ञेयमिति । सांप्रतं लांछनानीति एकोनत्रिंशत्तमं द्वारमाह । वसह १ गय २ तुरय ३ वानर ४ कुं
च ५ कमलं च ६ सत्थिओ ७ चंदो ८ मयर ९ सिरिवच्छ १० गंडो ११ महिस १२ वराहो य १३ सेणो य १४ वज्जं १५ हरिणो १६
छगलो १७ नंदावत्तो १८ कलस १९ कुम्मो य २० नीलुप्पल २१ संख २२ फणी २३ सीहो य २४ जिणाण चिंधाइं ३८४

प्र.सा.वृ.
२५४

वृषभो गजस्तुरगो मर्कटः क्रौंचः कमलं च स्वस्तिकः चंद्रो मकरः श्रीवत्सो महिषो वराहश्च श्येनश्च वज्रं हरिणश्छ
गलको नंद्यावर्त्तश्च कलशः कूर्म्मश्च नीलोत्पलं शंखः फणी सिंहश्च जिनानां नाभेयादीनां चिह्नानि लांछनानि क्रमेण
ज्ञातव्यानीति ॥ इदानीं त्रिंशत्तमं द्वारमाह पउमाभवासुपुज्जा रत्ता ससिपुप्फदंत ससिगोरा सुव्वयनेमी का
ला पासो मल्ली पियंगाभा ३८६ वरतवियकणयगोरा सोलस तित्थंकरा मुणेयव्वा एसो वन्नविभागो चउवीसा
ए जिणिंदाणं ८७ पद्मप्रभवासुपूज्यौ जपापुष्पवद्रक्तौ शशिपुष्पदंतौ चंद्रप्रभसुविधी शशिगौरौ चंद्रवद्धवलौ मु
निसुव्रतनेमिनाथौ इंद्रनीलमणिवत्कालौ पार्श्वमल्लिजिनौ प्रियंग्वाभौ नीलावित्यर्थः वरमकृत्रिमं तापितं यत्कनकं त
द्वद्गौराः शेषाः षोडश तीर्थंकरा ज्ञातव्याः एष वर्णविभागश्चतुर्विंशतेस्तीर्थंकराणामिति ॥ इदानीं व्रतपरिवार ए
कत्रिंशत्तमं द्वारमाह एगो भगवं वीरो पासो मल्ली य तिहिं तिहिं सएहिं भगवं पि वासुपुज्जो छहिं पुरिससएहिं निक्खं राम.
तो ८८ उग्गाणं भोगाणं राइन्नाणं च खत्तियाणं च चउहिं सहस्सेहिं उसहो सेसा उ सहस्सपरिवारा ८९ तत्र एको भ २५४
गवान् वीरो वर्द्धमानस्वामी प्रव्रजितः न केनापि सह तेन व्रतं गृहीतमित्यर्थः पार्श्वनाथो भगवांश्च मल्लिश्च त्रिभिस्त्रिभिः
शतैः सह व्रतमग्रहीत अत्र च मल्लिस्वामी स्त्रीणां पुरुषाणां च प्रत्येकं त्रिभिः त्रिभिः शतैः सह प्रव्रजितस्ततो मिलिता

नि षट्शतानि भवंति यत्सूत्रे त्रिभिः शतैरित्युक्तं तत्केवलाः स्त्रियः पुरुषा वा गृहीताः द्वितीयः पुनः पक्षः सम्यग्विवि
क्षितत्वेनेति संप्रदायः स्थानांगटीकायामप्युक्तं मल्लिजिनः स्त्रीशतैस्त्रिभिस्त्रिभिरिति भगवानपि वासुपूज्यः षड्भिः पु
रुषशतैः सह निष्क्रांतः समस्तकांतारान्निर्गतः प्रव्रजित इति यावत् उग्राणामारक्षकस्थानीयानां भोगानां गुरुस्थानीया
नां राजन्यानां मित्रस्थानीयानां क्षत्रियाणां सामंतादीनां संबंधिना चतुर्भिः सहस्रैः सह ऋषभजिनः प्रथमजिनः
निष्क्रांतो व्रतं जग्राहेत्यर्थः शेषास्तु वीरपार्श्वमल्लिवासुपूज्यनाभेयव्यतिरिक्ता जिना अजितादय एकोनविंश
तिः सहस्रपरिवाराः एकैकपुरुषसहस्रसहिताः प्राव्राजिषुरिति । इदानीं सव्वाउयं ति द्वात्रिंशत्तमं द्वारमाह चउरासीई
१ बावत्तरि २ सट्ठी ३ पन्नासमेव ४ लक्खाइं चत्ता ५ तीसा ६ वीसा ७ दस ८ दो ९ एगं च पुव्वाणं १० चउरासी ११ बावत्तरी
य १२ सट्ठी य १३ होइ वासाण तीसा य १४ दस य १५ एगं १६ एवमेए सयसहस्सा ९० पंचाणउइ सहस्सा १७ चउरासीई य
१९ पंचवन्ना य २० तीसा य २१ दस य २२ सयं च बावत्तरिं चेव २४ ९१ तत्र प्रथमजिनस्य सर्वायुश्चतुरशीतिः पूर्वाणां लक्षा
णि श्रीअजितस्य द्विसप्ततिः पूर्वलक्षाः श्रीसंभवस्य षष्टिः पूर्वलक्षाः ६० श्रीअभिनंदनस्य पंचाशत्पूर्वलक्षाः ५० ४
सुमतेः चत्वारिंशत्पूर्वलक्षाः ४० ५ पद्मप्रभस्य त्रिंशत्पूर्वलक्षाः ३० ६ सुपार्श्वस्य विंशतिः पूर्वलक्षाः २० ७ श्रीचंद्रप्रभ

प्र.सा.वृ. ११५ स्य द्वे पूर्वलक्षाः २ सुविधेर्द्वे पूर्वलक्षे सेरशीतलस्य एकं पूर्वलक्षं तथा श्रेयांसस्य चतुरशीतिवर्षाणां शतसहस्रा
णि लक्षाणि सर्वायुः श्रीवासुपूज्यस्य द्विसप्ततिवर्षलक्षाः श्रीविमलस्य षष्टिवर्षलक्षाः श्रीअनंतस्य त्रिंशद्वर्षलक्षाः
श्रीधर्मस्य दशवर्षलक्षाः श्रीशांतेरेकं वर्षलक्षं तथा कुंथोः पंचनवतिवर्षसहस्राः श्रीअरजिनस्य चतुरशीति
वर्षसहस्राः श्रीमल्लेः पंचपंचाशद्वर्षसहस्राः श्रीसुव्रतस्य त्रिंशद्वर्षसहस्राः श्रीनमेर्दशवर्षसहस्राणि श्रीनेमे
रेकं वर्षसहस्रं श्रीपार्श्वनाथस्य एकं वर्षशतं सर्वायुः श्रीवीरजिनस्य द्विसप्ततिर्वर्षाणीति। इदानीं जिनानाम
णयपि वाच्यानि तत्र पश्चिमानंतरमाह। समणो भगवं वीरो तेसीसाए सह निव्वुडपासो वट्टीसएहिं पंचहिं सएहिं ने
मी उ सिद्धिंगत ९२ पंचहिं समणसएहिं मल्ली संती उ नवसएहिं ति अट्ठसएणं धम्मो सएहिं छहिं वासुपूज्ज जि
णा ९४ सत्तसहस्सा णंतइजिणस्स विमलस्स छस्सहस्साइं पंचसयाइं सुपासे पउमाभे तिन्नि अट्ठसया ९५ दससहि एम·
हस्सेहिं उसहो सेसा उ सहस्सपरिवुडा सिद्धाणिस्य अणउदुवासपरीनिव्विय चरकम्मभाणं ९६ तत्र एकस्य काकीसन् ११५
भगवान् श्रीवीरो निर्वृतो निर्वाणपर्यायोऽत्र पश्चिमशतानां साधूनां सह निर्वृतः पार्श्वजिनः षट्त्रिंशद्युतैः पंचभिः शतैः
सह नेमिजिनः सिद्धिंगतः पंचभिः श्रमणशतैः सह मल्लिजिनः शांतिजिनस्तु नवभिः श्रमणशतैः समं अष्टाभिः शतैः

सह धर्मजिनः शतैः षड्भिः सार्द्धं वासुपूज्यजिनः सिद्धिंगतः तथाऽनंतजिनस्य निर्वाणं गच्छतः सप्तसहस्राणि परिवारो
विमलनाथस्य षट्सहस्राणि पंचशतानि च सुपार्श्वसुपार्श्वस्य पद्माभपद्मप्रभस्य त्रीणि पंचोत्तराणि शतानि
श्रमेऽनुचराणां पञ्चोत्तराणि शतानीति आख्यानपंक्ति आवश्यकटिप्पनके तु पद्मप्रभतीर्थकृद्वृषभे त्रीणि पञ्चोत्तरशतानि
नि साधूनां निर्वृत्ता सवगतं च त्रिशतमष्टोत्तरं शतानि मल्लिपर्षदि त्रीणि शतानि विवुत्तुर्विंशसाधिकानीति पावदितिआ
ख्याने तत्त्वपुनः केवलिनो वदंति तथा दशभिः सहस्रैः सह ऋषभः प्रथमजिनः परमानंदश्रियमाशिश्लेष परो
षाः पुनरजितसंभवाभिनंदनसुमतिपद्मप्रभसुविधिशीतलश्रेयांसकुंथुनाथारजिननमिसुव्रतनमिलक्षणाः
द्वादशतीर्थंकराः प्रत्येकं सहस्रपरिवारपरिवृताः परिनिर्वृताः परिनिर्वृताष्टकर्मभराः संतः सिद्धा इति। ३३२
इदानीं निर्वाणगमनस्थानानि चतुस्त्रिंशदुत्तरमंतद्वारमाह। अट्ठावयचंपुज्जिलपावासम्मेयसेलसिहरेसु उसभवे
सुपुज्जनेमीवीरो सेसा य सिद्धिगया ९८ अष्टापदे चंपायां उज्जयंते पावापुर्यां सम्मेतशैलशिखरेषु यथासं
ख्यं ऋषभो वासुपूज्यो नेमिजिनो वीरश्च शेषजिना अविंशतिः सिद्धिगताः। अष्टापदपर्वते श्रीऋषभस्वामी सि
द्धिमगमत् चंपायां नगर्यां वासुपूज्यः उज्जयंतगिरौ नेमिनाथः अपापायां नगर्यां श्रीमहावीरः शेषास्तु उक्तव्यति

इक्का अजितादयो विंशतितीर्थंकृतः संमेतशैलशिखरे इति ३७ संप्रति जिनांतराणि पंचत्रिंशद्वारमाह, इत्तो जि
णे निव्वाणं गयंमि उसभसामिउ अजिउ पन्नासकोडिलक्खेहिं सायराणं समुप्पन्नो ९८ तीसाए संभवजि
णो दसहिं अभिनंदणो जिणो नवहिं उ सुमइजिणो तो उप्पन्नो कोडिलक्खेहिं ९९ नउईसहस्सेहिं कोडी
ण वोलियाण पउमाभो नवहिं सहस्सेहिं तउ सुपासनामो समुप्पन्नो १०० कोडिसएहिं नवहिं जाव चंदप्पहो।
जणाणंदो नउईसागरकोडीहिं सुविहिजिणो देसिउसमए सीयलजिणो महप्पा नवकोडीहिं नवहिं जि
हिट्ठो कोडीए सेयंसो ऊणाइ इमेण कालेण सागरसएण एगेण तह य छावट्ठिवरिसलक्खेहिं छव्वीसह
स्सेहिं तउ पुणो अंतरं सुणि २ चउप्पण्णाओ हिं वसुपुज्जजिणो जगुत्तमो जाउ विमलो विमलगुणोहो तीसहिं
अयरेहिं समइहिउ ३ नवहिं अणंतो हि णो तो चउहिं धम्मो उ धम्मकरधवलो तिहि ऊणएहिं संतो तिहिं चउभागेहिं राम· २१६
पलियस्स १ भागेहिं टेहिं कुंथू पलियस्स अद्धेण गयभाएणं कोडिसहस्सूणेणं वासाण जिणोसेण अरिउ
मल्लीति सद्दालहिंउ जाउ वासाण कोडिसहस्सेण चउप्पन्नवाससयसहस्सेहिं सुव्वउ सिद्धो ७ जाउ वहिं नमिना
हो पंचहिं लक्खेहिं जिणो वरो नेमी पासो अद्धट्ठमसयपण्णरियते सीयसहस्सेहिं ८ अद्धाइज्जसएहिं गएहिं वीरो ति

णे वीरो जाउ दूसमअइदूसमाणं दोण्हं पि उ चत्तसहस्सेहिं ९ पुन्ना इक्का कोडाकोडी उसभजिणाउ इमेण कालेण
भणिया अंतरदाराए यं समयपारसारेण २ इतो जिननिर्वाणात्संख्यानांतरं जिनोत्पत्तिर्जिनानामंतराणां स्वरू
पस्येतत्प्ररूपणा किंचिल्लेशतो प्रदेशो अत्र च लक्खेहिं इत्यादिपदेषु सप्तम्यर्थे तृतीया तत्र ऋषभस्वामिनः स
काशाद् जितोऽजितः पंचाशत्कोटिलक्षेषु सागरोपमानां गतेषु समुत्पन्नः सिद्धत्वेन तु निर्देशः प्राधान्येन।
अनेकार्थत्वात् समुत्पन्नः सिद्धः इत्यर्थः ततः समुत्पन्नो जात इति ३ एवं उसभसामिजिणाउ इत्यादिपदेषु अवधौ पंच
मी अवधिश्चावधिश्चाभिविधिमर्यादा चेति तत्र प्रत्यभिविधौ पंचमी समुत्पन्नो जात इति व्याख्येयं ततः ऋषभ
स्वाम्यादिजन्मकालादारभ्याजितादिजन्मकालमानं स्यात् ततश्च ऋषभस्वामिनः सर्वायुःकालेनाधि
धिके पुर्व्वसुषमदुःषमाकस्य एकोननवतिपक्षेषु अवशिष्यमाणेषु श्रीमहावीरस्वामिनः सिद्धिः प्रसज्येत आग
मेन तु न्यूनाधिके भुक्तैकोननवतिपक्षेष्ववशेषेषु श्रीमहावीरसिद्धिरुक्ता आगमविरोधप्रसंगेन नाभिविधौ पंच
मी किंतु मर्यादायामेव तत्रापि परिसमुत्पन्नो जात इति व्याख्येयं तदा ऋषभस्वाम्यादिनिर्वाणकालादारभ्यायो
क्तमजितादिजन्मकालमानं स्यात् ततश्चायमर्थः जिनांतरकालमानेरेव तत्र परिकल्पितपूर्वः श्रीमदजिता

द्विजिनत्रयोविंशतिः सर्वायुःकालमानं तु जिनांतरकालांतर्भूतत्वादधिकमायुर्गृहीतमित्यतः येन नोत्सर्पिण्यां।
श्रीमन्महावीरसिद्धिः प्रसंगेन तन्नैव तद्विवृतं तस्मात् ऋषभस्वामिसिद्धिनिर्वाणात् यथोक्तकालेन अजितनाथः समु-
त्पन्नः सिद्धः स्युरेवमाख्यातमेनास्यपेक्षितत्वान्निर्वाणमेव वर्णितमिति श्रीअजितनिर्वाणात् त्रिंशत्सागरोपमको-
टिलक्षेषु गतेषु श्रीसंभवस्समुत्पन्नः सिद्धश्च संभवानंतरं दशसु सागरोपमकोटिलक्षेषु गतेषु श्रीअभिनंदनजिनः समु-
त्पन्नो निर्वृतश्चेत्यर्थः तदनंतरं नवसु कोटिलक्षेषु गतेषु सुमतिजिनेंद्रः समुत्पन्नो मुक्तो जातः तदनंतरं नवतिसह-
स्रेषु सागरोपमकोटीनां व्यपगतेषु पद्मप्रभुः समुत्पन्नः शिवश्रियमवापेत्यर्थः तदनंतरं नवसु कोटीनां सहस्रे-
षु गतेषु श्रीसुपार्श्वनामा जिनः समुत्पन्नो निर्वाणमगच्छदित्यर्थः सुपार्श्वानंतरं नवसागरोपमकोटिशतेषु न-
वसु गतेषु जातः सिद्धत्वेन चंद्रप्रभो जननानंदो जगदानंदकारी तदनंतरं नवतौ सागरोपमकोटिषु गतासु सुवि-
धिजिनो देशितः कथितः सिद्धत्वेन एवमाप सिद्धांते सुविधेरनंतरं च शीतलजिनो महात्मा सागरोपमकोटिषु न-
वसु गतासु निर्दिष्टः कथितो मुक्तत्वेनेति तदनंतरमनेन कालेन सागरोपमैकशतेन षट्षष्टिवर्षलक्षैः षड्विंश-
तिवर्षसहस्रैरूना या सागरोपमकोटी तस्यां गतायां श्रेयांसः सिद्धत्वेन जातः तदुपरोक्तेनेरे मुनि ततस्तस्मात्

श्रेयांसजिनात्सरोऽग्रतोऽनंतरं इत्यर्थः इति समासप्रकारेण प्रकारांतरं भणिष्यमाणेषु अतिक्रांतेषु च समा-
णां वासुपूज्यादयो जिनाः सिद्धा इति एतदेवाह चउप्पन्ना अयरेहिं मिसादि श्रेयांसादनंतरं चतुःपंचाशत्सु अ-
तरेषु सागरोपमेषु गतेषु वासुपूज्यो जिनो जगदुत्तमो जातः सिद्धत्वेनेति तदनंतरं च विमलजिनो विमलगुणो
यस्त्रिंशत्सतरेषु गतेषु रजोरहितः कर्मनिर्मुक्तो जातः सिद्ध इत्यर्थः तदनंतरं नवसु अतरेषु गतेषु अनंतो जातो
निर्वृत इति तदनंतरं चतुर्षु अतरेषु गतेषु धर्मस्तु धर्मनामा जिनो धर्मधुराधवलो मोक्षं जगामेति तदनंत-
रं त्रिषु अतरेषु चतुर्भागीकृतस्य पल्योपमस्य त्रिभिर्भागैर्न्यूनेषु गतेषु श्रीशांतिनाथः शिवश्रियमशिश्रियत्
तदनंतरं चतुर्भागीकृतस्य पल्योपमस्यार्द्धरूपो भागो गतः तन्मध्याद्भागद्वितये गते कुंथुजिनो निर्वृतस्त-
दनंतरं एकस्मिन् पल्योपमचतुर्भागे वर्षकोटिसहस्रन्यूने गते श्रीअरजिनेश्वरो भगवान् सिद्धत्वेनेति तदनंतरं
मल्लिजिनस्त्रिशल्यरहितो वर्षाणां कोटिसहस्रे गते जातः सिद्धत्वेनेति तदनंतरं चतुःपंचाशद्वर्षलक्षेषु गतेषु
सुव्रतः शोभनव्रतः सिद्धः तदनंतरं षट्सु वर्षलक्षेषु गतेषु नमिनामा सिद्धः तदनंतरं पंचसु वर्षलक्षेषु गतेषु जिन-
वरो नेमिः सिद्धः तदनंतरं पार्श्वजिनो [illegible] सार्द्धसप्तशतैः समधिकेषु त्र्यशीतिवर्षसहस्रेषु सिद्धिपदं प्रपेदे

प्र.सा.टी.
११८

मर्हन्नंतरं सार्द्धं वर्षशतद्वयेन तेसतिर्थो जिनेश्वरो जातः सिद्धत्वेनचि अत्रच एकोननवतिपक्षेष्वपरिपूर्णेषु तृती
यारके श्री आदिनाथः सिद्धः श्रीमहावीरश्च एकोननवतिपक्षेष्वपरिपूर्णेषु चतुर्थारके सिद्धः एवं चतुर्थारककालसमा
नः सर्वजिनान्तरकालः संपन्नः चतुर्थारकश्च द्विचत्वारिंशद्वर्षसहस्रन्यूनसागरोपमकोटीकोटिप्रमाणः ततो द्विचत्वारि
शद्वर्षसहस्रसहिते जिनांतरकालमाने सागरोपमकोटीकोटिः परिपूर्णा स्यात् दुसमेत्यादि दुषमांतिदुषमपोः पंचम
षष्ठारकयोर्द्वयोरपि संबंधिभिर्द्विचत्वारिंशद्वर्षसहस्रैः सहितेन श्रीऋषभजिनादिनिर्वाणादनेन पूर्वभणितेन जिनान्त
रकालमानेन पूर्यते संपूर्णा भवति कोटीकोटिरेका सागरोपमानामिति भणितेन मंतरद्वारमेतत्समयानुसारेण सिद्धा
न्तानुसारेण एषा च सागरोपमकोटाकोटिरेवं पूर्यते यथा पंचाशत्सागरोपमकोटिलक्षाण्यावदृषभजिनाजिनांतरेण
त्रिंशत्कोटिलक्षाः संभवस्य दशसागरोपमकोटिलक्षाः अभिनंदनस्य नवसागरोपमकोटिलक्षाः सुमतिजिनस्य एवं एम
पंचाशत्त्रिंशद्दशनव — मीलिता नवनवतिकोटिलक्षाः संजातास्ततः सागरोपमकोटीनां नवतिसहस्राः पद्मप्रभस्य न ११८
वकोटिसहस्राः सुपार्श्वस्य एवं नवनवतिकोटिसहस्रा जाताः एकसहस्रोऽवशिष्यते तन्मध्यान्नकोटिशतानि चंद्रप्रभस्य
ततः पोंसेकक्कोटिशतमध्यान्नवतिसागरोपमकोटयः सुविधिजिनस्य तत्र दशकोटयः शीतलस्य एका कोटिः श्रेयांसस्येति

मिलितं कोटिशतं तच्च चंद्रप्रभसंबंधिषु नवकोटिशतेषु मील्यते ततो जातं कोटिसहस्रमेतच्च पूर्वोक्तेषु नवनवति
सागरोपमसहस्रेषु प्रक्षिप्यते जातमेकं सागरोपमकोटिलक्षं तच्चापि नवनवतिकोटिलक्षेषु प्रक्षिप्यते ततो जाता
सागरोपमकोटाकोटिरेकेति यावच्छ्रेयांसस्य सागरोपमकोटिरेका अभिहिता सा न परिपूर्णा ग्राह्या किंतु सागरोप
मशतेनैकेन षट्षष्टिवर्षलक्षैः षड्विंशतिवर्षसहस्रैश्च न्यूना ग्राह्या एषैकैकसागरोपमशतादिकः काल एक
कोटेः सकाशात् एवं पूर्यते यथा तत्र पंचाशत्सागरोपमानि तावद् वासुपूज्यस्य त्रिंशद्विमलस्य नवानंतस्य चत्वारि
धर्मस्य एवं सप्तनवतिसागरोपमाणि जातानि तदनु शांतिनाथस्य त्रीणि सागरोपमाणि परं न तानि संपूर्णानि किं
तु चतुर्भागीकृतस्य पल्योपमस्य संबंधिभिस्त्रिभिर्भागैर्न्यूनानि तदनु द्वौ भागौ चतुर्भागीकृतस्य पल्योपमस्य संबंधिनौ
कुंथुनाथस्य एको भागः पल्योपमसंबंधी श्रीअरजिनस्य सोऽपि चैकोऽपरिपूर्णः किंतु वर्षाणां कोटिसहस्रेणैकेन न्यू
नः स च कोटिसहस्रो मल्लिजिनस्य एवं च सागरोपमकोटेर्यदपकृष्टं सागरोपमशतमासीत्तदिदं परिपूर्णमभूदिति
प्र नेषट्षष्टिवर्षलक्षाः षड्विंशतिवर्षसहस्राः ते इति पाद्यंते तत्र चतुःपंचाशल्लक्षाः मुनिसुव्रतस्य षड्लक्षाः नमिजिनस्य पंचल
क्षा नेमिजिनस्य मिलिताः पंचषष्टिर्वर्षलक्षाः अर्द्धाष्टमशतसमधिकत्र्यशीतिसहस्राः पार्श्वजिनस्य सार्द्धे द्वे शते श्री

श्रीअजितस्य एवं पार्श्ववीरयोरंतरमानमीनं— नवनुरशीतिसहस्राः जाताः । रोषा श्चएकविंशतिवर्षसहस्रप्रमितदुषमा
तिदुःखसंवंधिनो एकविंशतिवर्षसहस्रप्रमितानि दुःषमासंवंधिनश्चेति मिलितानि द्विचत्वारिंशत्सहस्राणि एषः घोरयःपश्चा
त्कृतानि चतुरशीतिसहस्रेषु क्षिप्यंते ततः समजनि लसंतच्च पूर्वोक्तपंचषष्टिवर्षलक्षेषु क्षिप्तप्रमितिर्जाता षट्षष्टि
वर्षलक्षाः षट्त्रिंशत्सहस्राश्च ततः श्रेयांसजिनकोटेर्मूनापासागरशतषट्षष्टिवर्षलक्षाः षड्विंशतिसहस्राश्च
क्षिप्तारोति परिपूर्णकोटिश्चजाता एषु दर्शितामिसहस्रः ऊसागरोपमकोटाकोटिरिति संप्रति प्रकारांतरेण सर्व
तीर्थकृच्चक्रवर्तिवासुदेवानामंतराणि यस्य तीर्थकृतः काले ये चक्रवर्त्तिवासुदेवा अभवन् तेषां रूपाणि वपुः
प्रमाणं सर्वोपरि— पश्चात्सम् अर्थमाह ॥ वत्तीसं घरयाइं काउं तिरियायया हिं रेहाहिं । उड्ढाययाहि काउं पंच घराइं तओ पढमे एप.
पन्नरस जिणा निरंतर सुन्नदुगं ति जिण सुन्नतियं च । दो जिण सुन्न जिणिंदो सुन्न जिणो सु २२५
न्न दोन्नि जिणा २२ बिइयपंतिठवणा दो चक्कि सुन्न तेरस पणा चक्कि सुन्न चक्कि दो सुन्न हा चक्कि सुन्न दु चक्कि दु सुन्नं
च २३ तइयपंतिठवणा दस सुन्न पंच केसव पण सुन्नं केसि सुन्न केसी य । दो सुन्न केसवो विय सुन्न दुगं केसव ति
सुन्नं २४ चउत्थपंतिठवणा उसहभरहाण दोण्ह वि उच्चत्तं पंचधणुसयाइं हिंति अजियसगराण दोण्ह वि उच्चत्तं चा

रि अद्धं च २५ पन्नासं दस धणुपरिहाणी जिणाण नेयाओ ता जाव पुप्फदंतो धणुसयमेगं भवे उच्चो २६ नउइ धणु ।
सीयलस्सा सेसेसु तिसु दसमारणा पुरउ जाव धम्मु पुरिससीहो अह तेसिं मेहोइ २७ कमसो अट्ठीस सत्तरि सत्तीय
न्ना सत्तरस पण पालाए हवंति धणु पासाना पासत्तदु च मघवस्स २८ ईयाल धणुस्स दुसणंकुमारस्स चक्कवट्टिस्स सं
तिस्स पंचत्ताला कुंथुजिणिंदस्स पणतीसा २९ तीसं धणु तिअरस्स उ इगतीसं पुरिसपुंडरीयस्स अट्ठावीसं सु
भूमस्स चेव इह धणुणि दत्तस्स ३० मल्लिस्स य पणवीसा वीसं च धणूणि मुणिसुव्वयजिणंमि नाओ पणसं सोलस य पन्नरसेव
मिनारदोसिणा ३१ जासजपनामसस पण्णे मीकराहोण दस धणु उच्चत्तं सत्तधणु बंभदत्तो नव रयणीओ य पासस्स
३२ वीरस्स सत्त रयणी उच्चत्तं मणिपमाण पसमद्धहा पंच मघायपत्तिरिदिकमेण एवं बेमि वोच्छामि ३३ उसहभरहो
णा दोण्हवि चुलसीई पुव्वसयसहस्साइं अजियसगराण दोण्हवि बावत्तरि सयसहस्साइं पुव्वउ जह कमेणं सु
दीपणां सत्तत्तरीसाये बीसाइ सदो वेवपतलक्ख गो चेव पव्वाणं ३५ सगसत्तरि विद्दूणं तुलसी ईवासस्सयसहस्साइं
पुव्वजिणाकेसीणं धम्मो ता जाव तुम्ह मिएणं ३६ कमसो वावत्तरि सहि तीस दस बेच सयसहस्साइं मघवस्स च ।
क्किणो पुण पंचेव य वाससयसहस्साइं ३७ तिन्नि य वाससयसहस्सा कुमारोसंतिस्स य वाससहस्सके मंगउ पचाणउइ सहस्सा कुंथु

स्स विण्णाउयं भणियं २० चुलसीइ सहस्साइं तु आउयं होइ अरजिणिंदस्स पणसट्ठिसहस्साइं आउं सिरिपुंडरीयस्स
सट्ठिसहस्स सुभूमे चउप्पन्ना सहस्स कुंथुनिदत्तस्स पणपन्नसहस्साइं मल्लिस्स विन्नाउयं भणियं २३ मुणिसुव्वयमहपउमाणं
तीससहस्साइं आउयं भणियं वाससहस्सा आउं नारायणस्स भवे २५ दसवाससहस्साइं नमिहरिसेणाणं तु
तिन्नेव वाससहस्साइं आउं जयनामचक्किस्स २८ वाससहस्सो आउं नेमीकण्हाण होइ दोण्हंपि सत्तयवास
सयाइं चक्कीसरबंभदत्तस्स ३२ वाससयं पासस्स य बावत्तरी वरवीरस्स इय वत्तीसघराइं समयविहिणा भणि
याइं ७४ इत्यमक्षरपंक्तिकालेख्योपदर्शनार्थं पट्टिका समुन्नमापन्ना स्थाप्यते न तिर्यक् तत्र तिर्यगायताभिस्त्रयस्त्रिं
शता रेखाभिर्द्वात्रिंशत् गृहकाणि कृत्वा ऊर्ध्वायताभिः षड्भी रेखाभिः पंच गृहकाणि क्रियंते कृत्वा च ततस्तत्र प्रथमगृ
हकमध्ये प्रथमे गृहके तिर्यग्वे स्थाप्या द्वात्रिंशद्गृहकान्येकैकं पंचदश तावन्नगृहकेषु क्रमेण पंचदश जिना ऋषभा
द्या धर्मनाथपर्यंता निरंतरं स्थाप्यंते ततो गृहकद्वये शून्यद्विकं ततो गृहकत्रये शांतिनाथकुंथ्वरजिनाः क्रमेण स्था
प्यंते ततो गृहकत्रये शून्यत्रिकं ततो गृहकद्वये क्रमेण मल्लिमुनिसुव्रतौ स्थाप्येते तदनंतरं एकस्मिन् गृहके शून्यं तत एक
स्मिन् गृहके नमिजिनः स्थाप्यते ततः एकस्मिन् गृहके शून्यमेकं ततः परस्मिन् गृहके नेमिजिनस्ततः परस्मिन् शून्यं ततः प

रस्मिन् गृहकद्वये क्रमेण पार्श्वजिनो वीरजिनश्चेति प्रथमपंक्तिस्थापना अथ द्वितीयपंक्तिस्थापनोच्यते तत्र प्रथ
मगृहकद्वये क्रमेण भरतः सगरश्च चक्रवर्त्ती स्थाप्येते ततस्त्रयोदशगृहकेषु क्रमेण शून्यानि त्रयोदश ततः क्रमेण पंच
गृहकेषु पंच चक्रवर्त्तिनो मघवत्सनत्कुमारशांतिकुंथ्वराभिधानाः स्थाप्यास्ततः शून्यं तदनंतरं गृहके सुभूमश्चक्रवर्त्ती ततो
गृहकद्वये क्रमेण शून्यद्वयं तदनंतरं गृहके महापद्मश्चक्रवर्त्ती तदनंतरं गृहके शून्यं तदनंतरं गृहकद्वये क्रमेण हरिषे
णजयनामानौ चक्रवर्त्तिनौ ततः परस्मिन् गृहके शून्यं ततः परस्मिन् गृहके चक्री ब्रह्मदत्तः ततः परयोः गृहकयोः क्रमेण
द्वे शून्ये इति द्वितीयपंक्तिस्थापना। इदानीं तृतीयपंक्तिस्थापना दशसु गृहकेषु क्रमेण दश शून्यानि ततः पंचसु
गृहकेषु क्रमेण पंच केशवा वासुदेवास्त्रिपृष्ठद्विपृष्ठस्वयंभुपुरुषोत्तमपुरुषसिंहाभिधानास्ततो गृहकेषु क्रमेण दश
शून्यानि ततः पंचसु गृहकेषु क्रमेण पंच शून्यानि तत्र पूर्वोक्तमिति पंचानां शून्यानां समाहारः पंचशून्यमिति
समाहारद्विवचनमेकवचनं ततः परस्मिन् गृहके केशवो वासुदेवः पुरुषपुंडरीकाभिधानस्ततः परस्मिन् गृहके शून्यं ततः प
रस्मिन् गृहके केशवो दत्ताभिधानस्ततः परस्मिन् गृहकद्वये क्रमेण शून्यद्वयं ततः परस्मिन् गृहके केशवो नारायणनामा त
तः परस्मिन् गृहकद्वये क्रमेण शून्यद्वयं ततः परस्मिन् गृहके केशवः कृष्णाभिधानस्ततः परस्मिन् गृहकत्रये क्रमेण

प्र·सा·टी
१२१

ध्यमत्रयमिति तृतीयगृहपंक्तिस्थापना इदानीं चतुर्थपंक्तिस्थापना तत्र प्रथमगृहके ऋषभजिनभरतचक्रिणोर्द्व
योरप्युच्चत्वं कायस्य पंचधनुःशतानि द्वितीयगृहके अजितजिनसगरचक्रिणोर्द्वयोरप्युच्चत्वं चत्वारि धनुःशतानि सा
र्द्धानि ततः संभवादीनां पंचाशत्पंचाशद्धनुःपरिहाणिस्तावद्यावत्स्यादंतः सुविधिजिनोच्चत्वं शतमेकं भवेदुक्तं च प्र
थमपर्यस्तृतीयगृहके संभवजिनस्य चत्वारि धनुःशतानि दृश्यमाने चतुर्थगृहके अभिनंदनस्य त्रीणि धनुःशतानि सा
र्द्धानि पंचमगृहके सुमतिजिनस्य त्रीणि धनुःशतानि षष्ठगृहे पद्मप्रभस्य द्वे धनुःशते सार्द्धे सप्तमगृहे सुपार्श्वस्य द्वे
धनुःशते अष्टमगृहे चंद्रप्रभस्य धनुःशतं सार्द्धं नवमगृहके धनुःशतमेकं सुविधेरिति ततो दशमगृहके शीतलस्य
नवतिधनूंषि पुरतोनंतरं श्रेयांसत्रिपृष्ठादीनां यावद्धर्मजिनपुरुषसिंहौ तावन्नेयानुगमिदं धनुर्दशकहान्यादिकं राम
क्रमशो भवति अयमर्थः एकादशे गृहके श्रेयांसजिनत्रिपृष्ठवासुदेवयोरशीतिधनूंषि ततो द्वादशके गृहके वा १२१
सुपूज्यजिनद्विपृष्ठवासुदेवयोः सप्ततिधनूंषि ततस्त्रयोदशगृहे विमलजिनस्वयंभूवासुदेवयोः पंचचत्वारिंशद्ध
नूंषि तथा चतुर्दशके गृहे मघवतश्चक्रवर्त्तिनो द्विचत्वारिंशद्धनूंषि तदर्द्धं च रत्निद्वयमित्यर्थः पंचदशकगृहे एकच
त्वारिंशद्धनूंषि तदर्द्धं च सनत्कुमारस्य चक्रवर्त्तिनः अथ षोडशगृहे शांतिजिनस्यापि पूर्णानि चत्वारिंशद्धनूंषि एकोन।

विंशतितमे गृहके कुंथुजिनेंद्रस्य पंचत्रिंशद्धनूंषि विंशतितमगृहके त्रिंशद्धनूंषि अरजिनस्य एकविंशतितमे गृहके
पुरुषपुंडरीकस्य वासुदेवस्य एकोनत्रिंशद्धनूंषि द्वाविंशतितमे गृहके सुभूमचक्रवर्त्तिनः अष्टाविंशतिर्धनूंषि त्रयोविं
शतितमे गृहके दत्तस्य वासुदेवस्य षड्विंशतिर्धनूंषि चतुर्विंशे गृहे मल्लिजिनस्य पंचविंशति धनूंषि पंचविंशति
तमे गृहके सुव्रतजिनपद्मचक्रवर्त्तिनोर्विंशतिर्धनूंषि षड्विंशतितमे गृहके नारायणस्य वासुदेवस्य धनूंषि षो
डश सप्तविंशतितमे गृहे नमिनाम्नो हरिषेणचक्रिणः पंचदश धनूंषि अष्टाविंशतितमे गृहे जयचक्रवर्त्तिनो
द्वादश धनूंषि एकोनत्रिंशत्तमे गृहे नेमिनाथकृष्णाभिधानवासुदेवयोर्दश धनूंषि उच्चत्वं त्रिंशत्तमे गृहे ब्रह्मद
त्तचक्रिणः सप्त धनूंषि एकत्रिंशद्गृहके पार्श्वजिनस्य नव हस्ताः द्वात्रिंशत्तमे गृहके श्रीवीरजिनस्य सप्त हस्ता
स्तनुमानं एवमुच्चत्वं सर्वेषां प्रथमजिनादीनां भणितं इदानीं पंचमगृहकपंक्तिनिविष्टं सर्वेषां जिनादीनां क्रमे
णायुष्कं तत्स्थापितदेवाह उसहभरहाणमिच्चादि वृषभजिनभरतचक्रिणोर्द्वयोरपि प्रथमगृहके चतुरशीति
पूर्वशतसहस्राणि लक्षाणि आयुः द्वितीयगृहे अजितजिनसगरचक्रिणोर्द्वयोरपि द्विसप्ततिपूर्वलक्षाणि
ततः परतो यथाक्रमं संभवादिजिनानामायुषो यावत् पंचाशच्चत्वारिंशत्त्रिंशद्विंशतिर्दशद्व्येकलक्षपूर्वाणि।

प्र.सा.वृ. १२२ मिति ॥ अथ मध्ये ऽन्तरेषु तृतीयगृहके संभवस्य षष्टिः पूर्वलक्षाः सर्वायुश्चतुर्थगृहके अभिनंदनस्य पंचाशत्पूर्वलक्षाः पंच-
मगृहे सुमतिजिनस्य चत्वारिंशत्पूर्वलक्षाः षष्ठगृहे पद्मप्रभस्य त्रिंशत्पूर्वलक्षाः सप्तमगृहे सुपार्श्वस्य विंशतिः पूर्वलक्षाः
अष्टमगृहे चंद्रप्रभस्य दश पूर्वलक्षाः नवमगृहे सुविधेर्द्वे पूर्वलक्षे दशमगृहे शीतलस्य एकं पूर्वलक्षमिति तथा ए-
कादशे गृहे श्रेयांसजिनत्रिपृष्ठवासुदेवयोश्चतुरशीतिर्वर्षलक्षाः सर्वायुः ततोऽनंतरं जिनकेशिनां तीर्थकृद्वासुदेवानां पा-
वदूर्ध्वमुखसिंहैतावत्समयेषु तुल्यमायुस्तद्देवदर्शयति क्रमप्राप्तस्य द्विकस्य परिपाट्या द्वासप्ततिः षष्टि-
स्त्रिंशद्दश च शतसहस्राणि वर्षलक्षाणि अथ मध्ये द्वादशगृहे वासुपूज्यद्विपृष्ठवासुदेवयोर्द्विसप्ततिर्वर्षलक्षाः
त्रयोदशगृहे विमलजिनस्वयंभूवासुदेवयोः षष्टिर्वर्षलक्षाः चतुर्दशे अनंतजिनपुरुषोत्तमवासुदेवयोस्त्रिं-
शद्वर्षलक्षाः पंचदशे धर्मजिनपुरुषसिंहवासुदेवयोर्दशवर्षलक्षा इति तथा षोडशगृहके मघवच्चक्रिणः एम. १२२
पंचवर्षलक्षाः सप्तदशगृहके सनत्कुमारचक्रवर्तिनस्त्रीणि लक्षाणि अष्टादशगृहे शांतिजिनचक्रवर्तिनो
वर्षलक्षमेकं एकोनविंशतितमगृहे कुंथोर्जिनचक्रिणः पंचनवतिवर्षसहस्राः सर्वायुर्भणितं विंशतितमगृहे
अरस्य जिनस्य चक्रिणश्चतुरशीतिर्वर्षसहस्राण्यायुर्भवति एकविंशतितमगृहे पंचषष्टिर्वर्षसहस्राण्यायुः पुरु-

षपुरुषसिंहवासुदेवस्य द्वाविंशतितमगृहे षष्टिर्वर्षसहस्राः सुभूमचक्रिणस्त्रयोविंशे गृहे षट्पंचाशद्वर्षसहस्रा
भवंति दत्तस्य वासुदेवस्य चतुर्विंशतितमगृहे पंचपंचाशद्वर्षसहस्राणि मल्लिजिनस्यायुर्भणितं पंचविंशतित-
मगृहे मुनिसुव्रतजिनस्य महापद्मचक्रिणस्त्रिंशद्वर्षसहस्राण्यायुर्भणितं षड्विंशतितमगृहे द्वादशवर्षसहस्राण्यायुर्ना-
रायणवासुदेवस्य भवेत सप्तविंशतितमगृहे दशवर्षसहस्राणि नमिजिनहरिषेणचक्रिणोर्द्वयोरपि भवंतीति अ-
ष्टाविंशतितमगृहे त्रीणि वर्षसहस्राण्यायुर्जयनाम्नश्चक्रिणो भवति एकोनत्रिंशत्तमगृहके वर्षसहस्रमेकं अ-
रिष्टनेमिजिनकृष्णवासुदेवयोर्द्वयोरपि भवति त्रिंशत्तमे गृहके सप्तवर्षशतानि ब्रह्मदत्तस्य एकत्रिंशत्त-
मगृहे वर्षशतं पार्श्वजिनस्य द्वात्रिंशत्गृहे द्वासप्ततिर्वीरजिनस्य सर्वायुरिति द्वात्रिंशद्गृहकाणि समयप्रवि-
धानेन भणितानि स्थापना चेयं । इदानीं तीर्थव्योच्छेदं त्रि-
षष्टितमं द्वारमाह पुरिमंतिम अट्ठट्ठंतरेसु तित्थस्स नत्थि
वोच्छेउ मज्झिल्लएसु सत्तसु एत्तियकालं तु वोच्छेउ चउभा-
गं चउभागो तिन्नि य चउभाग पलिय चउभागो तिन्नेव पव

ऋ	अ	सं	अभि	सु	प	सु	चं	सु	शी	श्रे	वा	वि	अ	ध	०	०	शां	कुं	अ	०	०	०	म	मु	०	न	०				
भ	स	०	०	०	०	०	०	०	०	०	०	०	०	०	मघ	स	शां	कुं	अर	०	सु	०	०	०	म	०	०	ह	ज		
०	०	०	०	०	०	०	०	०	०	०	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	०	०	०	०	[illegible]	०	[illegible]	०	०	[illegible]					
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]				

[illegible]	०	०	
जि	०	०	९
०	०	०	[illegible]
[illegible]	[illegible]	[illegible]	[illegible]
०	०	०	०

प्र. सा. वृ. २२३ उभागश्चतुर्भागोपचतुर्भागो इह हि चतुर्विंशतेस्तीर्थकृतां त्रयोविंशतिरन्तराणि भवन्ति पयाचनसहस्राणामपुलीनां
श्रीराप्येवान्तराणि तत्र पूर्वेषु श्रीऋषभादिजिनानां सुविधिपर्यन्तानां नवानां तीर्थकृतामष्टस्वप्यन्तरेषु तथा पश्चिमेषु चरम
जिनाद्यादीनां महावीरान्तानां नवानां जिनानामष्टस्वपि शुभस्थानेष्वन्तरेषु तीर्थस्य चतुर्वर्णस्य श्रमणसंघस्य नास्ति व्यवच्छे
दो मध्यमेषु पुनः सुविधिप्रभृतीनां शान्तिनाथपर्यन्तानां तीर्थकृतामन्तरेषु सप्तसु एतावन्मात्रं वक्ष्य
माणं कालं यावत्तीर्थस्य व्यवच्छेदः तदेवाह चउभागेत्यादि सुविधिशीतलयोरन्तरे पल्योपमस्य चतुर्भागीकृतस्य ए
कश्चतुर्भागस्तावत्कालं तीर्थव्यवच्छेदो हूहूर्म्मवार्त्ताप्यिनवनक्षेम पर्यन्तः तथा शीतलश्रेयांसयोरन्तरे पल्योपमस्य च
तुर्भागीकृतस्य चत्वारो भागास्तीर्थव्यवच्छेदस्तथा श्रेयांसवासुपूज्ययोरन्तरे पल्योपमसंबंधिनस्तस्य चतुर्भागास्तीर्थ
व्यवच्छेदस्तथा वासुपूज्यविमलजिनयोरन्तरे पल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदस्तथा विमलानन्तजिनयोरन्तरे प्र. २२३
पल्योपमसंबंधिनस्तस्य चतुर्भागास्तीर्थव्यवच्छेदस्तथा वासुपूज्यविमलजिनयोरन्तरे पल्योपमस्य चतुर्भागस्तीर्थ
व्यवच्छेदस्तथा विमलानन्तजिनयोरन्तरे पल्योपमसंबंधिनस्तस्य चतुर्भागास्तीर्थव्यवच्छेदस्तथानन्तधर्मयोरन्तरे प
ल्योपमस्य चतुर्भागस्तीर्थव्यवच्छेदस्तथा धर्मशान्तिनाथयोरन्तरे पल्योपमचतुर्भागस्तीर्थव्यवच्छेद इति सर्वाग्रेण

भागमीलने त्रीणि पल्योपमानि एकचतुर्भागहीनानि जातानि ३६ इदानीं दसआसायणाउ त्ति सप्तत्रिंशत्तमं द्वारमाह
तंबोल १ पाण २ भोयण ३ पाहणह ४ थीभोग ५ सुवण ६ निट्ठुवणं ७ मुत्तु ८ च्चारं जूयं ९ वज्जे १० जिणमंदिरस्संतो ताम्बूल
पानभोजनोपानत्स्त्रीभोगस्वपननिष्ठीवनानि मूत्रं प्रश्रवणं उच्चारं पुरीषं द्यूतं तमेव काश्चिज्जैयेत तीर्थकृदाशातना
हेतुत्वाज्जिनमन्दिरस्यान्तर्विवेकीजनः इति आसायणाउ चुलसीइत्ति अष्टात्रिंशत्तमं द्वारमाह खेलं केलिं कलिं कला
इत्यादिवृत्तचतुष्टयमिदं व्याख्यायते खेलं १ केलिं २ कलिं ३ कला ४ कुललयं ५ तंबोल ६ मुग्गालयं ७ गाली
८ कंगुलिया ९ सरीरधुवणं १० केसे ११ नहे १२ लोहियं १३ भत्तोसं १४ तय १५ पित्त १६ वंत १७ दसण १८ विस्सामणं १९ दाम
णं २० दंत २१ अच्छी २२ नह २३ गंड २४ नासिय २५ सिर २६ सोत्त २७ छवीणमलं २८ मंत २९ मीलणं ३० लक्खं ३१
विभंजणं ३२ भंडार ३३ दुट्ठासणं ३४ छाणी ३५ कप्पड ३६ दालि ३७ पप्पड ३८ वडी ३९ विस्सारणं नासणं ४० अक्कं
दे ४१ विकहं ४२ सरत्थघडणं ४३ तेरिच्छसंठावणं ४४ अग्गीसेवणं ४५ रंधणं ४६ परिक्खणं ४७ निसीहियाभंजणं
४८ छत्तं ४९ वाहण ५० सत्थ ५१ चामर ५२ मणणेगत्तं ५३ अब्भंगणं ५४ सच्चित्ताणमचाय ५५ चायमचित्ते ५६ दिट्ठी
ए नो अंजली ५७ साडेगत्तरसंगभंग ५८ मउडं ५९ मौलि ६० सिरसेहरं ६१ हुड्डु ६२ जिंदुयगिड्डियाइरमणं ६३ जोहार ६४ भं

प्र·सा·वृ
१२५

उक्किपं ६५ रेकारं ६६ धरणं ६७ रणं ६८ विवरणं वालाणं ६९ पल्हत्थियं ७० पाऊ ७१ पायपसारणं ७२ पुडपुडी ७३ पंकं ७४ रउ
७५ मेहुन्नं ७६ जूया ७७ जेमणं ७८ गुज्झं ७९ विज्जं ८० वणिज्जं ८१ सेज्जं ८२ जलं ८३ मज्जणं ८४ एमाइयमवज्जकज्जमुज्जुओ वज्जे
जिणिंदालए ४२ तत्र जिनभवने इदमिदं च कुर्वन्नाशातनाः करोतीति ताम्मयीर्ये आयं ज्ञानादीनां निःश्रेयसक
स्माल्लाभप्रवृत्तानि नानाविकल्पानि ज्ञानानि शातयंति विनाशयंतीत्याशातना तत्र खेलं श्लेष्माणं जिनमंदिरे त्य
जति तथा केलिं क्रीडां करोति तथा कलिं वाक्कलहं विधत्ते तथा कलां धनुर्वेदादिकाः कलापामिव तत्र शिक्षते
कुल्लयं गंडूषं विधत्ते तांबूलं तत्र चर्वयति तांबूलसंबंधिनम् उद्गालमाची तत्र मुंचति गालीर्जकारमकारादिकास्त
त्र ददाति तथा कंगलिकां लघ्वीं महतीं च विधत्ते तथा शरीरस्य धावनं प्रक्षालनं कुरुते तथा केशान्मस्तकादिभ्यस्तत्रो
त्तारयति तथा नखान् हस्तपादसंबंधिनः करोति तथा लोहितं शरीरान्निर्गतं तत्र विसृजति तथा मक्कोपं सुखादि
कं तत्र खादति तथा चर्मत्वगादिसंबंधिनीं पातयति तथा पित्तं धातुविशेषम् औषधादिना तत्र पातयति तथा वांतं
वमनं करोति तथा दशनान् दंतान् क्षिपति तत्संस्कारं वा कुरुते तथा विश्रामणाम् अंगसंबाधनं कारयति तथा दामनं
बंधनमजादितिरश्चां विधत्ते तथा दंताक्षिनखगंडनासिकाशिरःश्रोत्रच्छवीनां संबंधिनां मलं जिनगृहे त्यजति तत्र च **रम·**
१२५

वि· शरीरं शोषाश्च तत्र दत्तप्रवाह इति मध्यमवृत्तं तथा मंत्रं भूतादिनिग्रहलक्षणं मंत्रादिकार्यपर्यालोचनरूपं वा कुरुते त
था मीलनं स्वकीयपरिवारादिकृत्ये निमित्तं यापत्र वृद्धपुरुषाणां तत्रोपवेशनं तथा लेख्यकं व्यवहारादिसंबंधि तत्र कुरुते
तथा विभजनं विभागं वा भ्रातृदायादीनां तत्र विधत्ते भांडागारं निजद्रव्यादेर्विधत्ते तथा दुष्टासनं पादोपरिपादस्थापनादि
क्रमेणोपवेशनं कुरुते तथा छगणीं गोमयपिंडं कर्पटं वस्त्रं दालिं मुद्गादिद्विदलरूपां पर्पटवटके च प्रसिद्धे तत एते
षां विस्तारणं उद्धापनकृते विस्तारणं तथा नाशनं नंष्टपदायादादिभयेन चैत्यस्य गर्भगृहादिष्वंतर्द्धानं तथा आक्रं
दं रुदितं विशेषं पुत्रकलत्रादिवियोगे तत्र विधत्ते तथा विकथा विविधं कथां रमणीयमरणपादिसंबंधिनीं कुरु
ते तथा शराणां बाणानामिषूणां च घटनं शस्त्रस्येति पाठे तु शराणां अस्त्राणां बंधनं शरादीनां घटनं त
था तिरश्चां गवाश्वगजादीनां संस्थापनं तथा अग्निसेवनं शीतार्तो सेवते तथा रंधनं पचनं अन्नादीनां तथा परी
क्षणं द्रम्मादीनां तथा नैषेधिकीभंजनं भवस्य चैत्यस्य वा हि चैत्यादौ प्रविशद्भिः सामाचार्या त्रिनैषेधिकीकरणीया
तत्तस्याश्च करणं भंजनं आशातनेति द्वितीयवृत्तार्थः तथा छत्रस्य तथा उपानहोस्तथा शस्त्राणां खड्गादीनां त
था चामरयोश्च देवगृहाद्बहिः अमोचनं मध्ये वा धारणं तथा मनसोऽनेकाग्रत्वं नानाविकल्पनमिस

र्थः तथाभ्यंजनं तैलादिना तथा सचित्तानां पुष्पतांबूलपत्रादीनामनागो बहिर्मोचनं तथासागःपरिहरणमजि
एरूति अजीवानां हारादीनां मुद्रिकादीनां बहिर्मोचने हि अहो भिक्षाचराणामयं धर्म इत्यवर्णवादो दुष्टलोके विधी
यते तथा सर्वज्ञप्रतिमायां दृष्टौ दृग्गोचरतायां नांजलिकरणमंजलिविरचनं तथा एकशाटकेन एकोप
रितनवस्त्रेणोत्तरासंगाभंगः उत्तरासंगस्याकरणं तथा मुकुटे किरीटं मस्तके धरति तथा मौलिं शिरोवेष्टनविशेष
रूपं करोति तथा शिरःशेखरं कुसुमादिमयं धत्ते तथा हुड्डां पणबंधनं नालिकेरादिविषयं विधत्ते तथा जिंदुह
लिकं दुकं गिंदुका तत्क्षेपणी वक्रयष्टिका ताभ्यामादिशब्दाद्गोलिका कपर्दिकादिभिश्च रमणं क्रीडनं तथाज्ञो
त्कारकरणं पित्रादीनां तथा भांडानां विटानां क्रियाकक्षावादनादिका इति वृत्तौ प्रवर्तनं तथा रेकारं तिरस्कार राम.
प्रकाशकं रे रुद्र दत्त इत्यादि वक्ति तथा धरणकं रोधनमधमर्णादीनां तत्र यातरणं संग्रामकरणं त १२५
था विवरणं बालानां विजटीकरणं तथा पर्यस्तिकाकरणं तथा पादुका पादत्राणादिमपं चरणप्रसारणमकरणं तथा
पादयोः प्रसारणं स्वैरं निराकुलतायां तथा पुटपुटिकादापनं तथा पंकं कर्दमं करोति निजदेहावयवप्रक्षाल
नादिना तथा धूली रजो धूलीत पादादिलग्नं प्रेरयति तथा मैथुनं मैथुनस्य कर्म तथा यूकां मस्तकादिभ्यः क्षि

पति वीक्षयति वा तथा जेमनं भोजनं तथा गुह्यं लिंगं तथा संवृतस्याकरणं जुहुमिति तु पादेषु रूढं पुरुहाहुपुहादि
तथा विज्ञप्तिर्वैद्यकं तथा वणिज्यमिति वाणिज्यं क्रयविक्रयलक्षणं तथा शय्यां कृत्वा तत्र स्वपिति तथा जलपयः
पानाद्यर्थं तत्र मुंचति वा तथा मज्जनं स्नानं करोति एवमादिकमवद्यं सदोषं कार्यं कर्तुकामो जनस्तेनाशातनो वा
वर्जयेज्जिनेन्द्रालये जिनमंदिरे एवमादिकमित्यनेनेदमाह नैकैवमेतावत्य एवाशातनाः किंत्वन्यदपि यत्किंचिते
हमनवद्यभाषादिकं जिनालये तदप्याशातनास्वरूपं ज्ञेयं नत्वेवंतर्हि तपाशायेत्यादिगाथापंचकोक्ताशातनामध्ये दशकस्य
प्रतिपादितत्वाच्चतुराशातनानां चेत् द्वाशकोपलक्षितत्वेनैवतास्मानत्वादयुक्तमिदं द्वारं तरपिति चेन्नसामा
मामिधाने पि बालादिबोधनार्थं विभिन्नविशेषाभिधाने किं यन एव यथा ब्राह्मणाः समागता वशिष्ठोपि समागत
इति सर्वमनवद्यं नन्वेता आशातना जिनालये क्रियमाणा गृहिणां कंचन दोषमावहति उतैवमेवनकरणीः
पासत्र ब्रूमो न केवलं गृहिणां सर्वसावद्यकरणोद्यतानां भवभ्रमणादिकं दोषमावहति किंतु निरवद्याचाररता
नां मुनीनामपि दोषमावहंतीत्याह आसायणा उभवभमणकारणं इय विभाविय जइणो मलमलिण त्ति न जि
णमंदिरम्मि निवसंति ररसमउ एतो आशातनाः परिहर्तुं विधेयं यदपि यतयो भवभ्रमणकारणमितिविभा

प्र॰सा॰वृ॰
१२६

अपत्रयोऽस्नानकारित्वेन मलमलिनदेहत्वान्न जिनमंदिरे निवसंति इति समयः सिद्धांतः तमेव समर्थयन्नाह भा।
ष्योक्तं दर्शयति दुब्भिगंधमलस्सावि तणुरप्पेसण्हाणिया उहा वायवहो वावि तेण ठंति न चेइए ४२ एनामक्षरार्थः स्ना।
पितापि दुरभिगंधमलप्रस्वेदस्राविणी तथा द्विधा वायुपथोऽधोवायुनिर्गम उच्छ्वासनिर्गमश्च पेटात् मुखेन
अपानेन च वायुवहो वापि वातवहश्च तेन कारणेन न तिष्ठंति यत श्रेयसे जिनमंदिरे यदो वसंति मिथ्यैस्ते आशा
तना भीरुभिः कदाचिदपि न गंतव्यमित्याह तिन्नि वा कड्ढई जाव थुईओ तिसिलोइया ताव तत्थ अणुन्नायं कारणेण परेण
तु ४४ तत्र यः कोपोत्सर्गानंतरं पाठ्यते तावत् कर्षति प्रमाणनीमर्थः किंविशिष्टा इत्याह त्रिश्लोकिकाः त्रयः
श्लोकाः वृत्तविशेषरूपास्त्रिधा प्रमाणयास्ताः तथा सिद्धाणं बुद्धाणं प्रत्येकं श्लोको यो वेयावच्चगराणमिति तृतीयः
प्रत्येकोऽपि न तो कायोत्सर्गनिरतिनस्तृतीय इति अन्ये तु न गाथा द्वयं स्तुतिश्च चतुर्थी गीतार्थचरणेनैव क्रियते गीतार्थाचरणं रम॰
१२६
तु मूलगणधरभणितमिति एवं विशेषमेव संदिग्धोऽपि मुनिभिः तावत्कालमवस्थातुं जिनमंदिरे अनुज्ञातमवा
स्थानं पतीनां कारणेन पुनर्धर्मश्रवणाद्यर्थं समुपस्थितभविकजनोपकारादिना परतो पि चैत्यवंदनापाश्चात्योऽपि
यतीनामवस्थानमनुज्ञातं शेषकाले साधूनां जिनाशातनादिभयान्नानुज्ञातमवस्थानं तीर्थंकराणां परिहार्य मित्त

तोऽन्यतीर्थिकैरप्येवमाशातना परिहियंते गृहस्थैस्तु सुतरां परिहरणीया इति इयं नीर्थकृदाज्ञाभंगश्च महतेऽनर्थाय
संपद्यते एतासु चाशातनापरिहरणमिह संदिग्धं विसासाशातनाद्वारं ४० सांप्रतिमष्ट महाप्रातिहार्याणीति एको
नचत्वारिंशद्द्वारमाह कंकेल्लि १ कुसुमवुट्ठी २ देवज्झुणि ३ चामरा ४ सणाइं च ५ भावलय ६ भेरि ७ छत्तं ८ जयं
ति जिणपाडिहेराइं ४५ तत्र प्रतिहारा इव प्रतिहाराः सुरपतिनियुक्ता देवास्तेषां कर्माणि कृत्यानि प्रातिहार्याणि त
सौ तु काडिमश्चेति कर्माणि धत्त नामश्चोतदशोकवृक्षरत्नपल्लवपुष्पवन्नासयंतिकाविकसदसमानकुसुमसमु
चितिः शरदविरलमलपरिलोलद्भ्रमरसमाकृष्टमाणभ्रमरं ध्वनिनिकुरंबरणरणायां शिशिरीकृतसमवसरणमह
प्र
मज्जननिकरः प्रवरतो विराजितमनोरमाकारः शालविशालशोभाकंकेल्लिर्वक्रीकृतः जिनस्योपरि देवैर्विधीय
ते तथा जलस्थलजविकुर्वणाविरचितानां पंचवर्णानां विकस्वराणामधः कृतवृंतानां सुपरिमलानां कुसुमानां
प्रकरवृष्टिना नु संवृष्टिः क्रियते तथा मालसतरसुधारसमसहोदरः स्वरमससविधिपरे शापृहृतमुक्तापथ्यापारमसारितव
दनैः कुरंगकुलैः कुलैरुत्कर्णैरुत्कर्णमानः सकलजनानंदप्रमोदप्रदायी दिव्यध्वनिर्देवैर्वितन्यते तथा कमनीयकां
डकदलीप्रकारैस्तेनु रदलीसच्छिरसाविच्छुरितरौक्ररुचिरैस्ताविज्ञासविचित्रपवित्रनिः सपन्नरत्नविसरविनिर्मि

स॰सा॰वृ॰
१२७

रत्नकिरणांकुरजालोल्लसितदिशि स्वप्रमाणोपेतः कांतकांतकांचनमयोद्दंडदंडमणीपद्मासचामरश्रेणिविराजते
ते तथा अतिभास्वरसद्रायरत्नराजिस्कंधबंधविकटोत्कटदंष्ट्राकरालसज्जीवायमानसिंहरूपालंकृतमनेकमणिकां
उरत्नखचितविनिर्यद्दीप्तकिरणावलीविलुप्यमानविलसत्तमस्कांडं वरं सिंहासनं चाग्रतो चविरचितं तथा शातकाल
विलक्षरत्नेरमयूखमंडलप्रचंडचंडरुचीविमंडलमिव दुरालोकं तीर्थकरस्याग्रतः प्रकृतिभासुरान्नदीप्य निरुपमः
पातालकमुच्छ्रितप्रभापटलं अपि च जिनशिरसः पश्चाद्भागेन प्रेंखत्प्रमाणं भामंडलमासमंतते तथा तत्रस्था
रम्भोकारभीतभुवनोदरविवरतोमेघघोरमहारवः कंपते तथा भूर्भुवः स्वस्त्रयैकस्वाम्यादिसंसूचकं शारदेंदुकुंदकुसु
दावदातं प्रलंबमानमुक्ताफलपटलावचूलमालामनोरमं च त्रयमतिपवित्रमातपत्रं अतिशयशोभानिहार्याणीति
नेश्वराणां त्रयमेतानि तत्र किंकिणि श्रीमहावीरस्य द्वात्रिंशद्धनुरुच्छ्रितः शेषाणां तु ऋषभस्वाम्यादीनां यानि नाथपर्यं
तानि त्रयोविंशतेर्मिनीर्थकृतां निजनिजशरीरमानाद्द्वादशगुणाः यदुक्तं उसभस्स तिन्नि गाउय वत्तीसधणूणि
वद्धमाणस्स सेसजिणाणं असोउ सरीराओ बारसगुणोउ इति ननु महावीरस्यापि किं नापि निजशरीरमानाद्द्वादशगु
णोऽशोकपादपः प्रतिपादितो यदुक्तं सायपकरस्सोत्तो श्रीमहावीरस्य समवसरणस्थाने अशोकवरपादपं तिण्णाउ चुया [illegible]

एम
१२७

उत्तारसगुणोसकोविउव्वत्ति मन्त्रायमिदमप्रघनेष्टि अत्रोच्यते केवलस्यैवशोकतरोस्सन्निधानमुक्तमिह चुस्सालत्र
सालहितस्पततोः चापि केवलो द्वादशगुणएव सत्यं सत्प्रहस्तमानश्रीमहावीरशरीरद्वादशगुणीकृतमन्नेकवि
शतिधनूंषि भवंति सालवृक्षोप्येकादशधनुः प्रमाणस्ततो मिलितानि द्वात्रिंशद्धनूंषि भवंते इति संप्रदायः स
मवायांगेप्युक्तं वत्तीसधणुयाइं चेइयरुक्खो उवद्धमाणस्स निच्चोउगो असोगो उच्छन्नो सालरुक्खेणं तद्वीकाव।
निच्चोउगो त्ति निसर्वदा कृतुरेवबुध्यादिकालो यस्य स नित्यर्तुकः असोगो त्ति अशोकाभिधानो यक्षः समवसर
णभूमिमध्ये भवति उच्छन्नो सालरुक्खेणं ति अवछन्नः शालिवृक्षेणेति एतत्तवचनादेव शोकस्योपरिसा
लिवृक्षोपिकंचिदस्तीत्यवसीयत इति तथा आयोजनभूमिकुसुमवर्षविक्षेपेकृष्यादि कृतं चनमः केचन मे
यंतितनु विकचकांतकुसुमप्रचयनिचितायां समवसरणभुवि जीवदयापारिकांतः कारुणीनां श्रमणानां कथम
वस्थानगमनादिकं कर्तुंयुज्यते जीवविघातहेतुत्वादिति नवकेचिदुत्तरयंति तानि कुसुमानि चित्तान्येवभवंति
विकुर्वाणपाणएवदैवैस्तेषां विहितत्वादिति एतेषांयुक्तमयतोनननत्रविकुर्वितान्येवपुष्पाणिभवंति जलजस्थल
जानापिकुसुमानां संभवात्तेवन रनार्ष्यविंटगाढ़सुरभिंजलस्थलंयदिव्यकुसुममनोहारी वर्षति समंतेणाद

स·मा·वृ·
१२८

सहृद्वलंक्कुसुमवृष्टिं सिद्धांतवचनादवं श्रुत्वाः परे सद्भूद्यं समभ्यागतरमंति यत्र ग्लनिनस्तिष्ठंति तत्र द्देशे देवाः पुष्पा
णि किरंतीति एतद्रधुक्तरा भासेन खलु तयो धनैः कांक्षीभूता वस्त्या मा लेपतत्रैवदेशेऽवस्थापस्थानस्य प्रयोजनेनागमना
गमन्यूदेशापितत्रसंभवाद्विति तस्मान्निश्चित्लगीतार्थसमतमिद मुक्तसमवचरीयते यथा एकयोजनमात्रायां समवस
रणधरणात्रयमादिनिनमृगाभुराद्रिलोकसमदैपिनणरस्पमाबाधाकाविक्तघातेषामाजानुमात्रप्रमाणा स्थिताभाम
मंदमकरंदसंपन्नसमादिष्ठानंदमंदाममुकुंदकुमदकमलवकुलमालतीविकचकिलमसत्कुसुमसमूहानाम
प्युपरिसंचरिसोस्याग्नेचमुनिनिकरेविबुधजननिचये न काचिनवाधा प्रसत्तसुधारसस्निग्धमानानाभिववद्भृतः
समुच्छास तेषामापनीयघातो श्चिंतनीयनिरूपमतीर्थकरप्रभावादिहंभमारागप्रसारादेवेति तथाहि अध्वनि वि
घयेपर्श्वपस्वंवचः केचिदाचक्षते ननु सकलजननाल्हादीयीजातसरार्का राशाशाहिसमिश्रितपरिकल्पिततस्थि राम·
दुग्धाक्षमरोदरस्तीर्थकरस्यैवधनिरसोकर्षप्रतिहारकृतत्वमस्यापुस्यते यक्कमिदमुदितमुदासनिभिस्तीर्थकृतो १२८
मपदपमेधरीमामनो समयदार्थसाधानिशापिन्नाध्वशास्तिनास्मभावनएवयांयदामालकौशिक्यादिभ्रासएगेम
मजनोपकारायदेशनां भगवान्विधत्ते नदादैवैरप्यपपार्श्ववर्त्तिभिरतिमनोहरवेणुवीणाकूनक्काणितकाणेनस

एवतीर्थकृदरूपं कलनात्क्रियते यथा मधफरगानमत्रूननस्यागताग्रायनीज्वननीतरवोऽभुषमवैणिकवैराणिक्रा
दिवैणुवीणादिरवैरितीत्येताश्चतीर्थेन प्रतिहारदेवकृतमस्यतविरुध्यतेइति सर्वसमंजसं इहानीं चउतीसातिसया
णं तिवत्वारिंशत्रमंदारमाहृ रयतीयसेयरहितउद्देहे१ धवकन्नार्मंसमराहिएतदे२ आहारोरीहारोअहिस्सारसुरहिणे
सासा४५६ जंमाकुरंमिविउरी एकारसकम्मखयभवेइगीणं स्वत्तेत्तोयएगमेत्तेतिजयपत्रएगामारुंवक्कुडविं२१०न
भासासलनातिरिमुराणघम्मावबोहयावाणी६ पुव्वभवरोगाउवसमंति नयहुंतिवेरा१८४० दुभिक्ख१ डमर१० दु
म्मारि१३ ईई२२ अइवुट्ठि२३ आणाभिवुट्ठी२४ हुंतिजयवहुतणीयसरूभामंडल२५ चउ१९ सुराइयागुणवीसा
मयसिंहासणसपयपीढं२६ वत्ततयरं२७ रयणज्झसियचामर२८ धम्मचक्कर१९ ४५ सहजगयणगयपणट्टियाइ१ ये
चदिसंमाइ्दिवमारातिमा३अतर्णसोउ२१ विअरनवपड हृतस्य२१ चउमुहमुत्तिचउक्क३१ मत्तिणिकंचणतारपमाल
तिग२२ नवकणयपंकयाइ अहोमुहाकंटयाहुंति५२ निच्चमबट्ठियकेसा पढक्कणोचित्तिकेसरोमनहा२६ इंदियत्थ
सापंचविमणोरमा२७ हुंति छम्मिमिउऊ२५२ गंधोदगस्सवुट्ठी२९ वुट्ठीकुसुमाणपंचवन्नाणं३० दिंतिपयपाहिणाउत
उणा३१ पवणोविअणुकूलो३२५४ पणमंतिदुमा३२ वज्जंतिदुंदुही उच्चहीरघोसाउ३४ चउतीसाइसयाणंसंगिणिणं

प्र॰ सा॰ वृ॰
१२९

द्वाराङ्कं तिरूमा ५४ रजो मलः रोगो व्याधिः स्वेदः प्रस्वेदस्तैः रहितं तैर्विरहितस्य कृपलेपस्वाभाव्यात् लोकोत्तरगंधरूप
रसं बंधुरश्च लोकोत्तरं कृत्वा देहः शरीरं तथा गोक्षीरधारावद्धवलं पांडुरं अविश्रं च मांसं रुधिरं तथा आहारो अभ्यवहरणं नीहा
रो मूत्रपुरीषोत्सर्गस्तौ क्रियमाणौ न दृश्येते इत्यर्थः मांसचक्षुषां न पुनरवध्यादिलोचनेन पुंसां तथा विकचोत्पल
वत्सुरभयः श्वासोच्छ्वासाः एते चत्वारोऽप्यतिशयाः जिनानां जन्मतोऽपि जाता इदानीमेकादशातिशयाः कर्म
क्षयजाः कर्मणां ज्ञानावरणादीनां चतुर्णां घातिकर्मणां क्षयात् जाताः कथ्यंते इति शेषः तद्यथा योजनमात्रे यो
जनप्रमाणेऽपि क्षेत्रे समवसरणभुवि जगज्जनः सुरनरतिर्यग्जनप्रभूतोऽपि कोटीकोटीप्रमाणोऽपि मातीत्यर्थः परस्पर
संबाधया सुखेनावतिष्ठते तथा वाणी अर्द्धमागधीभाषा भगवतोऽभिधीयमाना नरतिर्यक्सुराणां प्रत्येकं नि
जभाषया स्वस्वभाषया कृत्वा धर्मावबोधिका धर्मावबोधदा भवति अपरमर्थः योजनव्यापिनी एकरूपापि भ
गवतो भारती वारिदविमुक्तवारिवदाश्रयानुरूपतया परिणमतीत्युक्तं देवा दैवीं नरा नारीं शबराश्चापि
शाबरीं तिर्यंचोऽपि हि तैरश्चीं मेनिरे भगवद्गिरं तद्धेव विधनुव नाद्भुतमत एवानंतरेणापुनर्यदनेकसत्त्वोपकारः
क्रियते कथमिति तथा पूर्वोत्पन्ना रोगा ज्वरारोचकादयः उपशाम्यंति अपूर्वाश्च नोत्पद्यंते तथा न च वैरभवं

ति पूर्वभवनिबद्धानि जातमत्स्यानि च वैराणि परस्परविरोधास्तथा दुर्भिक्षं दुःकालः तथा डमरं स्वचक्रपरचक्रभयो
त्थिप्लवः तथा दुष्टदेवतादिकृतं सर्वगतं मरकं दुर्मारिश्च भयाई तथा ईतयः प्रचुरशलभशुकमूषकाद्याधान्यादिविनाश
कास्तथा निर्वृष्टिरतिजलपातस्तथा अनावृष्टिः सर्वथा जलपाताभावः एते च रोगादयो यत्र यत्र भगवान् विहरति त
त्र तत्र च चतसृषु दिक्षु प्रत्येकं पंचविंशतियोजनमध्ये न जायंते यदुक्तं समवायांगेऽपि जओ जओ वि य णं अरिहं
तो भगवंतो विहरंति तओ तओ वि य णं पणवीसाए जोयणाणं ईई न भवइ मारी न भवइ सचक्कं न भवइ परचक्कं
न भवइ अइवुट्ठी न भवइ अणावुट्ठी न भवइ दुब्भिक्खं न भवइ पुव्वुप्पण्णा वि य णं उप्पाइया वाही खिप्पामेव उवस
मंति त्ति यत्पुनर्नागरीकापायापिदश्वस्थानके जिनेऽपि महावीरस्य भगवतः सप्रभावप्रशमितयोजनमध्यगतवैर
मारिविड्वरदुर्भिक्षाद्युपद्रवस्यापीति तथा जितत्रिरसः पश्चाद्भागे अतिभासुरतया जितदूरतरणिमण्डलकृतहाद
शांगेन्ताः प्रभातिभामंडलस्य प्रभा परलक्ष्म्यापोतः अपरासुरचितानां देवकृतानामतिशयानामेकोनविंशतिः
कथ्यते तत्र आकाशवद्दृश्यतेऽस्वच्छोपो स्फाटिकमणिरत्नमयं सिंहासनं सपादपीठपादपीठयुक्तं तथा व्रजत्र
यमति पवित्रं तथा जिनस्योपरितोऽन्येऽनन्तछत्रं धुपताकाकास्त्रस्मुदास्मगं गोणिः तपलरत्नमयः पोषध्वजापे सपा

एम
१२९

तिमहत्वादिंद्रध्वजोऽध्वजत्वादिंद्रध्वजः तथोभयोपार्श्वयोर्यक्षहस्तगते सिते चामरे धरतः यक्षम
तिषिंतं स्फुरत्किरणचक्रं धर्मप्रकाशकं धर्मचक्रं एतानि च सिंहासनादीनि पंचापि यत्र यत्र प्रगुरुर्विहरति तत्र तत्र ग
मनगतानि गच्छंति तथा यत्र भगवांस्तिष्ठति तत्र विचित्रपत्रपुष्पपल्लवसच्छत्रध्वजघंटापताकादिपरिवृतः
शदुर्भवस्य शोकवृक्षस्तथा चतुर्मुखत्वं चतुर्दिशां मूर्तिचतुष्कं तत्र पूर्वाभिमुखं भगवान्स्वयमुपविशति शेषासु च त
सृषु दिक्षु प्रतिरूपकाणि तीर्थकराकृतिमंति तीर्थकरप्रभावादेव च तीर्थकररूपानुरूपाणि सिंहासनादियुक्ता।
नि देवकृतानि भवंति शेषदेवादीनामप्यस्माकं स्वयं कथयतीति प्रतिपत्त्यर्थं तथा समवसरणे मणिकांचन
तारचितशालत्रिकं तीर्थकरप्रसादात् लभकाले प्रथमं नानाप्रकारनिक्षिप्तमणिरत्नमयो वैमानिकसुरैर्विरच्यते
द्वितीयो मध्यवर्ती कनकमयो ज्योतिष्कविबुधैर्विधीयते तृतीयस्तु बहिर्भूतस्तारको रजितरजत
तमयो भवनपतिदेवैर्विरच्यते तथा कनकपंकजानि नवसंख्यानि कांचनकमलानि नवनीतस्पर्शानि क्रियंते
तत्र द्वयोर्भगवान्स्वकीयक्रमकमलयुगलं विन्यस्य विहरति अन्यानि सप्त पद्मानि पृष्ठतस्तिष्ठंति तेषां च पद्य
मश्रिमं तत्स्वाद्स्मात्संक्रमं कुर्वतो भगवतः पुरतो भवंति तथा यत्र भगवान्विहरति तत्र तत्राधोमुखाः कंटकाः संपद्य

ते तथा नित्यमवस्थिता अवस्थितमात्राः श्मश्रुरूपाः भावाः प्रभो भगवतस्तिष्ठंति आसते केशरोमनखाः केशाः शिरःकूर्च
कूसाः रोमाणि शेषशरीरसंभवानि नखाः पाणिपादजास्तथा इंद्रियार्था विषयाः पंचापि स्पर्शरसरूपगंध
शब्दरूपाश्च मनोज्ञानाममभावेन मनोज्ञानां च प्रादुर्भावेन मनोरमाः मनःप्रीणका भवंति तथा षडपि ऋतवो वसंता
द्याः शरीराप्यायकसुखस्पर्शादिकसंपादकत्वेन सर्वदा विकाशितकुसुमादिसमृद्ध्या च मनोरमाश्च अनुकूलाः भ
वंति तथा यत्र भगवांस्तिष्ठति तत्र पांशुप्रसरप्रशमनार्थं गंधोदकवृष्टिर्घनघनसारादिमिश्रमनोहारिवा
रिवृष्टिस्तथा वृष्टिः कुसुमानां मंदारपारिजातकचंपकादीनां पंचवर्णानां श्वेतरक्तपीतनीलकालानां तथा
शकुनाः पक्षिणो ददति प्रदक्षिणां यत्र भगवांस्तत्र चानि तत्र चाथशिषंदिप्रमतयः प्रदक्षिणागतयो भवंतीत्यर्थः
तथा पवनः संवर्तकवातो योजनं यावत् क्षेत्रशुद्धिविधायकत्वेन सुरभिशीतलमंदत्वेन च अनुकूलः सुखहेतुर्भवति
ति यदुक्तं समवायांगे सीयलेणं सुहफासेणं सुरभिणा मारुएणं जोयणपरिमंडलं सव्वओ समंता संपमज्जिज्ज
इत्ति तथा यत्र भगवान्व्रजति तत्र द्रुमाः पादपाः प्रणमंति नम्रा भवंति तथा यत्र भगवान्सलीलं संचरति त
त्र चाधीते दुंदुभयो महत्या ढक्काः सजलजलदवद्गंभीरध्वनया पिधीयाः दुंदुभिहुंजिनेंद्रा तिशयानाञ्च तल्लिखाद्य

त्रुसर्गमेकादशानामेकोनविंशः तेऽष्टमीलने च भवन्ति इह च यत्समवायांगे नामतः किंचिदन्यथात्वमपि दृश्यते तथा
तोत्तरमवगंतव्यं मतांतरबीजानि तु सर्वज्ञविज्ञेयानीति ४० इति चतुस्त्रिंशदतिशयाः संप्रति दोषा अष्टादशेति एक
चत्वारिंशत्तमं द्वारमाह अन्नाण१ कोह२ मय३ माण४ लोह५ माया६ रई य७ अरई य८ निद्दा९ सोय१० अलियव
यण११ चोरिया१२ मच्छर१३ भयाय१४ पाणिवह१५ पेम कीला१६ पसंग१७ हासा य जस्स इय दोसा अट्ठार
स वि पणट्ठा नमामि देवाहिदेवं तं ५० अज्ञानं संशयानध्यवसायविपर्ययात्मकं मोहरूपं क्रोधः कोपः जातिरूपव
लश्रुततपोलाभलक्ष्मीभिरष्टधा मदः कुलबलैश्वर्यरूपविद्यादिभिरहंकारकरणं मानः परप्रधर्षणानिबंधनं वा मनो
दुरभिनिवेशामोचनं युक्तोक्ताग्रहणं वा लोभो गृद्धिः माया दंभः रतिरभीष्टपदार्थानामुपरि मनः प्रीतिः अरतिरनि
ष्टसंप्रयोगसंभवं मनोदुःखं निद्रा स्वापः शोकश्चित्तवैधुर्यं अलीकवचनं वितथभाषणं चौरिका परद्रव्यापहारः
मत्सरः परसंपदसहिष्णुता भयं प्रतिभयं प्राणिवधः प्राणवधः प्रेम स्नेहविशेषः क्रीडाप्रसंगः क्रीडायामास
क्तिः हासो हास्यं इति यस्य दोषा अष्टादशापि प्रनष्टाः --- देवाधिदेवं तमिति इदानीं अरिहचउक्कंति द्विचत्वारिंश
त्तमं द्वारमाह जिणनामा नामजिणा केवलिणो सिवगया य भावजिणा ठवणजिणा पडिमाउ दव्वजिणा भाविजि

णजीवा ५८ जिनाश्चतुर्द्धा नामजिनाः स्थापनाजिनाः द्रव्यजिना भावजिनाश्चेति तत्र जिनानां तीर्थकृतां नामानि ऋ
षभाजितसंभवादीनि नामजिनास्तथा अष्टमहाप्रातिहार्यादिसमृद्धिमालामनुभवंतः केवलिनः समुत्पन्नकेवल
ज्ञानाः शिवगताश्च परमपदस्था भावतः सद्भावतो जिना भावजिनाः गाथानुलोम्याच्चानानुपूर्व्या भावजिनाः
आख्याताः स्थापनाजिनाः प्रतिमाः काञ्चनमुक्ताशैलमरकतादिभिर्निर्मिता द्रव्यजिनास्ते जिनत्वेन भाविनो भविष्य
ज्जीवाः श्रेणिकादय इति इदानीं निष्क्रमणतप इति त्रिचत्वारिंशत्तमं द्वारमाह सुमइत्थ निच्चभत्तेण निग्गओ वा
सुपुज्जो जिणो चउत्थेण पासो मल्ली वि य अट्ठमेण सेसा उ छट्ठेण सुमतिरत्रास्यामवसर्पिण्यां चतुर्विंशते
तीर्थकृत्सु मध्ये नित्यभक्तेन निर्गतो गृहवासात्प्रव्रजितः तथा वासुपूज्यो द्वादशतीर्थकृच्चतुर्थेन एकेनोपवासे
न प्रव्रजितः पार्श्वस्त्रयोविंशतितमतीर्थकृन्मल्लिरपि च एकोनविंशतितमतीर्थकृदष्टमेन त्रिभिरुपवासैः प्रव्रजितः
शेषा ऋषभादयो विंशतिर्जिनाः षष्ठेनोभाभ्यामुपवासाभ्यां निष्क्रान्ताः इति इदानीं ज्ञानतप इति च
तुश्चत्वारिंशत्तमं द्वारमाह अट्ठमभत्तंतम्मि य पासोसहमल्लिरिट्ठनेमीणं वसुपुज्जस्स चउत्थेण छट्ठभत्तेण सेसाणं ६०
अष्टमभक्तान्ते उपवासत्रयपर्यंते श्रीपार्श्वजिनऋषभस्वामिमल्लिनाथारिष्टनेमीनां केवलज्ञानमुत्पेदे वासुपूज्य

प्र॰सा॰ह॰
१३२

एव चतुर्थेन एकेनोपवासेन ऋषभस्य । शेषाणामजितस्वामिप्रभृतीनां एकोनविंशतेस्तीर्थकृतां षष्ठभक्तेन द्वाभ्यामुपवा
साभ्यां चेति ॥ सम्प्रति निर्वाणतपो त्रिपंचचत्वारिंशदुत्तरशततमं द्वारमाह । निव्वाणमंतकिरिया सा चउदसमेण पढमजिणना
हस्स । सेसाण मासएणं वीरजिणिंदस्स छट्ठेणं ६१ निर्वाणगमनं द्वादशं मासं चतुर्दशभक्तेन उपवासषट्केन प्रथमजि
नस्य ऋषभस्वामिनः । शेषाणां पुनरजितादीनां पार्श्वनाथपर्यन्तानां द्वाविंशतेर्जिनानां मासेन त्रिंशतोपवासैः वीरजिने
न्द्रस्य षष्ठेनोपवासद्वयेनेति ॥ इदानीं भाविजिनेश्वरजीवत्रिषष्ट्युत्तरशततमं द्वारमाह । प्रथमं तत्प्रस्तावनागाथामाह । वी
रस्स भगवओ निव्वाणगमणकालाओ दूसमकालस्स जिणमओ सहस्स इगवीस ... जिणेनेहा थुणिमो ६२ अत्र षष्ठीयं
स्पर्शे वृत्तिपाठ अप्यपेक्षी ततो वीरजिन श्रीमहावीरस्वामिनो भगवतः तस्य सिद्धिगमनादुपरि मुक्तान्ते
दुःषमा चतुरशीति वर्षसहस्रेषु प्राग्‍दृश्यमानः पद्मनाभप्रमुखस्तीर्थंकरो चतुर्विंशतिर्जिना ये भविष्यन्ति तान् वयं स्तुमो ना
